सरस्वतीभवन–अध्ययनमाला

[११]

रामाज्ञापाण्डेयविरचिता

व्याकरणदर्शनभूमिका

[द्वितीयं संस्करणम्]

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

SARASVATĪBHAVANA-STUDIES

[Vol. 11]

VYĀKARAṆADARŚANABHŪMIKĀ

OF

PT. RĀMĀJÑĀ PĀṆḌEYA

Edited by

GAURINATH SASTRI

Research Publication Supervisor

DR. BHĀGĪRATHA PRASĀDA TRIPĀṬHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute

Sampurnanand Sanskrit Vishvavidyalaya

VARANASI

1982

Published by—
Director Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi.

[This book has been published out of generous grant from University Grants Commission, New Delhi]

Available at—
Sales Department
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002 (India)

Second Edition : 1000 Copies
Price —Rs. 28-00

Printed by
Tara Printing Works,
Varanasi.

सरस्वतीभवन-अध्ययनमाला

[११]

रामाज्ञापाण्डेयविरचिता

व्याकरणदर्शनभूमिका

सम्पादकः

श्रीगौरीनाथशास्त्री

कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

अनुसन्धानप्रकाशनपर्यवेक्षकः

डॉ. भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणस्याम्

२०३९ तमे वैक्रमाब्दे   १९०४ तमे शकाब्दे   १९८२ तमे खैस्ताब्दे

प्रकाशकः—
अनुसन्धानसंस्थाननिदेशकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

[ग्रन्थोऽयं विश्वविद्यालयानुदानायोगतो लब्धेनार्थिकसाहाय्येन मुद्रापितः प्रकाशितश्च]

प्राप्तिस्थानम्—
विक्रयविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१००२.

द्वितीयं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्---२८:०० रूप्यकाणि

मुद्रकः
तारा प्रिंटिंग वर्क्स
वाराणसी ।

प्रस्तावना

पण्डितप्रवरवैयाकरणमूर्धन्यश्रीरामाज्ञापाण्डेयविरचितस्य व्याकरणदर्शनभूमिकाभिधानस्य ग्रन्थरत्नस्य सम्पादनेन मम स्वान्तं नितरां प्रसीदति। यतो हि विश्वस्य सनातनं सर्वविध-कल्याणसाधकं च साहित्यं मन्त्रब्राह्मणात्मको वेद एव। व्याकरणं तस्याङ्गतया प्रख्यातमस्ति। तथा हि गोपथब्राह्मणे **'षडङ्गविदस्तत्तथा धीमहे'**[1] इत्युक्त्या **'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'**[2] इति महाभाष्योक्त्या च वेदस्य षट्संख्याकानि अङ्गानि सन्तीति ज्ञायते। तानि च—शिक्षा, कल्पः, निरुक्तम्, छन्दः, ज्योतिषम्, व्याकरणं च प्रसिद्धान्येव। उक्तं च—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते[3] ॥ इति।

अपरं चास्य व्याकरणस्याङ्गान्तरापेक्षया प्राधान्यमप्युक्तं भगवता भाष्यकृता—**'प्रधानं च षट्सु अङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति'**[4] इति।

एवं च यथा शरीरस्य रक्षार्थमङ्गानां महती आवश्यकताऽस्ति, तथैव वेदानां स्वरूपस्य तदर्थस्य चावगमाय शिक्षाद्यङ्गानामस्ति महत्प्रयोजनम्; किं पुनस्तत्र मुखस्थानीयस्य व्याकरणस्य।

'अथ किमिदं व्याकरणम्? किं च तस्य दर्शनत्वम्?' व्याकरणमस्ति वेदस्यान्यतमं महनीयमङ्गं सप्रयोजनं चेति ज्ञातम्। इदानीं तल्लक्षणनिर्वचनेन विशेषतः स्वरूपं जिज्ञासित-मस्ति। तन्निरूप्य दर्शनस्य लक्षणम्, व्याकरणे दर्शनत्वसंघटनं च विधीस्यते।

तत्र व्याक्रियन्ते, साधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते (पृथक्कृत्य ज्ञायन्ते) येन तद् व्याकरणमिति करणव्युत्पत्त्या असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिपूर्वकसाधुशब्दविषयक-ज्ञानकरणं व्याकरणमित्यर्थो योगशक्त्या लभ्यते। यथा—गावी, गोणी, गोता इत्यादिभ्योऽ-साधुशब्देभ्यो गो इति साधुशब्दस्य पृथक्कृत्य बोधनं व्याकरणशास्त्राधीनम्। पृथक्कृतिश्च **'गच्छतीति गौः', 'गमेर्डो प्रत्ययः कर्तरि औणादिकः'** इत्येवं प्रकृतिप्रत्ययविश्लेषणपूर्विका।

एवं च साधुशब्दबोधकशास्त्रत्वं शब्दगतसाधुत्वबोधकशास्त्रत्वं वा व्याकरणस्य लक्षणं पर्यवसितम्। इतरत् सर्वमसाधुशब्दज्ञानं प्रकृतिप्रत्ययादिज्ञानं परिचायककोटावेव प्रविष्टम्, न तु लक्षणशरीरे निविष्टम्। डित्थादिशब्दे प्रकृत्यादिकल्पनायाः प्रायोऽदर्शनात्।

---

१. गो० ब्रा० पू० १–२७। २. म० भा० पस्पशा० १-१।
३. पाणिनीयशिक्षा–४१-४२। ४. म० भा० पस्पशा० १-१।

लक्ष्यलक्षणे व्याकरणमिति व्याचक्षाणेन भाष्यकृताऽपि लक्ष्यगतसाधुत्वलक्षकशास्त्रं व्याकरणमिति प्रत्याय्यते, येन च पूर्वोक्तं लक्षणं साधु समर्थ्यते। **'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः'** इत्युक्त्या वाक्यपदीयकृताऽपि उक्तं तल्लक्षणे साधुसम्मतिः प्रकाश्यते।

अथ व्याकरणस्य स्वरूपपरिचायनानन्तरं दर्शनत्वं विमर्शनीयमस्ति। तत्र दृश्यते आत्मतत्त्वं विचार्यते येन तद्दर्शनमिति निर्वचनेन आत्मतत्त्वविचारकशास्त्रत्वं दर्शनलक्षणं पर्यवस्यति। भारतीयदर्शनानामेष स्वभावो यत् सर्वेषां जीवानां कृते कल्याणमार्गं दर्शयेत्, स च मार्ग आत्मतत्त्वविवेचनात्मक एव। तथा च श्रुतिः[1]—**'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'** इति। एतदनुगुणम्—**'आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'**[2] इति श्रुतिरात्मसाक्षात्कारलक्षणं मोक्षं तदुपायभूयं श्रवणादिकं च प्रतिपादयन्ती साक्षादेव दर्शनपदव्यपदेश्यतां भजते।

एवमेव—**'सर्वं खल्विदं ब्रह्म'**[3], **'अयमात्मा ब्रह्म'**[4] इत्याद्याः श्रुतयो ब्रह्मसूत्राणि च दर्शनपदेन व्यवह्रियन्ते। एतद्विषये व्याकरणं पश्चात्पदं न भवति। यतश्चास्तीदमपि आत्मतत्त्व-विवेचनम्। उक्तं च—

> दृष्ट्वारूपे व्याकरोत् सत्यानृते प्रजापतिः।
> अश्रद्धामनृते दधाच्छ्रद्धां सत्ये प्रजापतिः[5]॥ इति।

'प्रजापतिः शब्दोपादानकसृष्टिविधाताः वैयाकरणः संमिलिते सत्यानृते पृथक्कृत्य परमार्थ-भूते सत्ये वस्तुनि श्रद्धामसत्येऽनात्मनि अश्रद्धां प्रत्यतिष्ठिपत्' इत्यर्थिकयाऽनया श्रुत्या सत्यासत्य-विवेचनलक्षणं दर्शनत्वं व्याकरणस्य सुस्पष्टं प्रतिपाद्यते।

किं च प्रकृतिप्रत्ययौ असत्यौ, तदपेक्षया पदानि सत्यानि, ततोऽपि वाक्यानि, पश्यन्त्यादिकं च सर्वं जगदसत्यम्, सर्वापेक्षया पराख्यं वाग्ब्रह्म सत्यमित्येवं निगूढं तात्पर्यम्।

एवमेव—**'नामरूपे व्याकरवाणि'**[6] इति श्रुतिरपि संश्लिष्टयोः शब्दार्थयोः पृथक्कृतिं बोधयन्ती व्याकरणस्य सत्यासत्यविवेचनलक्षणं दर्शनत्वं प्रकाशयति।

'वाग्वै ब्रह्म'[7], **'वाग्घि ब्रह्म'**,[8] **'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते'**[9] इत्याद्याः श्रुतयोऽपि वाचो व्याकृतिरूपोपासनया व्याकरणस्य दर्शनत्वं सम्यक् प्रतिपादयन्ति।

एकैव वाग् व्याकृताव्याकृताभेदेन द्विविधाऽस्ति। तत्र व्याकृतापदेन पश्यन्ती-मध्यमा-वैखरीणां ग्रहणम्, अव्याकृतापदेन सर्वधर्मरहिताया नित्यायाः पराख्यवाचो ग्रहणमिति सिद्धान्तोऽस्ति।

किं च विदितमेवास्ति समेषां यत् पुरा सकलन्यायबीजगर्भितः संग्रहनामा लक्षश्लोकात्मको दर्शनग्रन्थो महामुनिव्याडिनिर्मित आसीत्। कियता कालेन नष्टे तस्मिन् संग्रहे व्याकरणस्य विलुप्तप्रायं[10] दर्शनत्वं पुनर्भगवान् पतञ्जलिरुज्जीवयामास महाभाष्यरचनया। पुनस्तच्छिष्य-

---

१. शुक्लयजुः–३१-१८। २. बृहदा० उ०–२।४।५। ३. छान्योग्य० उ०–३।४।१। ४. बृहदा० उ०–२।५।१९। ५. शुक्लयजुः–१९।१७। ६. छान्योग्य० उ०–६।३।२। ७. बृहदा० उ०–४।१।२। ८. ऐ० ब्रा०–२।१५। ९. उद्धृता–शा० भा०–१-३-८ सू० २८। १०. वाक्यपदीयम्–२।४८२-८४, ८६।

परम्परया श्रीमर्तृहरिसम्पादितवाक्यपदीयरचनया च तद्व्याकरणदर्शनं भृशं वर्धितं पोषितं चाभवत् ।

किं बहुना—अस्य दर्शनस्य स्फोटवाद-शब्दाद्वैतवादप्रभृतिसिद्धान्तान् खण्डनमण्डनविधया व्याख्यातवन्तोऽन्येऽपि दार्शनिका दर्शनत्वं सम्मानयन्त्येव ।

एवं व्याकरणस्य दर्शनत्वे निर्णीते सत्यस्य दर्शनस्य काचन भूमिर्निर्देष्टव्या, यत्र चास्य दर्शनस्य प्रतिष्ठा भवेत् । सा चेयं भूमिका षट्स्वध्यायेषु निरूपिताऽस्ति । तत्र च शब्दार्थनिरूपणाध्यायः प्रथमः, शब्दार्थसम्बन्धनिरूपणाध्यायो द्वितीयः, साधननिरूपणाध्यायस्तृतीयः, गुणनिरूपणाध्यायश्चतुर्थः, क्रियानिरूपणाध्यायः पञ्चमः, वृत्तिनिरूपणाध्यायः षष्ठ इत्येवं क्रमिकी स्थितिः षण्णामध्यायानाम् ।

तत्र प्रथमाध्याये व्याकरणस्य स्वरूपवर्णनप्रसङ्गे पश्यन्त्या वाचो वेदरूपत्वं प्रतिपादयता ग्रन्थकारेण व्याकरणं सर्वपदार्थापेक्षया पवित्रमिति सोल्लासं प्रत्यपादि । प्रकृतेर्मातृरूपत्वम्, प्रत्ययस्य च पितृरूपत्वम्, उभयोः सम्भूतिस्थानं पश्यन्ती एव । एतयोरर्थसम्बन्धोऽपि तत्रैवानुस्यूतोऽवतिष्ठते, शब्दार्थसम्बन्धस्य नित्यत्वात् ।

प्रतिमायाः, प्रणवस्य च पश्यन्त्या सहैक्यमपि द्रष्टव्यम् । तदनु, पाणिनेः शिष्टत्वम्, व्याकरणस्य सर्ववेदपारिषद्यम्, अष्टाध्यायीस्वरूपम्, इन्द्रियविषययोः संस्कारः, बाह्यान्तरभेदेन स्फोटद्वैविध्यम्, शब्दसृष्ट्युत्पत्तिप्रक्रिया चेत्यादयो विषयाः सूक्ष्मेक्षिकया विवेचिताः सन्तिः ।

तत्र शब्दसृष्टिप्रक्रियाप्रस्तावे इत्थं निरुक्तिमस्ति—यथा हि सूक्ष्मं वटबीजं विवृद्धं सदाविर्भूतचैतन्यं वृक्षात्मना दृश्यते; तथैव तत्स्फोटरूपं शब्दब्रह्म स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिविशिष्टं सत् सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलरूपेण प्रकाशरूपं वैखरीपर्यन्तशब्दराश्यात्मना विमर्शात्मना चार्थकक्षामाश्रित्य सत्त्वरजस्तमोरूपेण बुद्ध्यहङ्कारेन्द्रियादिना सूक्ष्मस्थूलभूतात्मना च परिणमति ।

तत्र सर्वमपि बीजं वर्तुलाकृति अङ्कुरोत्पत्तिकाले दलद्वयेन विभक्तं भवति, तथैव प्रणवरूपः शब्दोऽपि बिन्दुर्वर्तुलाकृतिरेव सृष्ट्युन्मुखत्वे विभक्तो भवति ।

पुनश्च ऋक्सामयजुरादिप्रातिशाख्यानुसारेण शैवशाक्ततन्त्रानुसारेण च वर्णोपन्यासः सोपपत्तिकं कृतोऽस्ति । तत्र सर्वेपि विषया आर्षप्रभावप्रभवा इत्यप्युक्तम् ।

तदग्रे च प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः पञ्च प्रमाणानि, तेषु च शब्दस्य मुख्यं प्रमाणत्वमभ्युपेतम् । स्फोटविभागः कल्पनाप्रसूतः, अष्टानां पदार्थानां स्वरूपं चालोचनीयमस्ति ।

शब्दार्थसम्बन्धनिरूपणाख्ये द्वितीयाध्याये वाच्यवाचकभावकार्यकारणभावरूपसम्बन्धविमर्शः कृतोऽस्ति । तत्र बहुशो वाक्यपदीयं प्रमाणत्वेन निर्दिष्टमस्ति ।

तृतीये गुणनिरूपणाध्याये—'सत्त्वे निविशतेऽपैति' इत्यादिना गुणस्वरूपं सोपपत्तिकं निरूपितम् ।

एतत्प्रसङ्ग एव –

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥

इति याज्ञवल्क्यस्मृतिरपि सम्यग् विवेचिताऽस्ति ।

चतुर्थे साधननिरूपणाध्याये—साधनपदव्यपदेश्यानि कारकाणि निरूपितानि सन्ति । तत्र कृधातोर्निष्पन्नानि कर्तृ-कर्म-करण-अधिकरणपदान्येव स्वार्थभूतं वास्तविकं कारकं बोधयन्ति । एवं च कर्मादीनि चत्वार्य्येव मुख्यानि कारकाणि । सम्प्रदानापादानयोस्तु न मुख्यं कारकत्वम्, अपि तु गौणमेव । एतत्सर्वं तस्मिन्नध्याये द्रष्टव्यमस्ति ।

पञ्चमे क्रियानिरूपणाध्याये धात्वर्थभूता क्रिया, तत्परिच्छेदका भूतभविष्यदादिकाल-भेदाश्च निरूपिताः सन्ति । स्वातन्त्र्याऽपरपर्याया कालशक्तिः लिङ्गसंख्यादिश्च सोपष्टम्भं निरूपितोऽस्ति ।

षष्ठे वृत्तिनिरूपणाध्याये—कृद्वृत्तिं परित्यज्य चतस्र एव वृत्तयः सिद्धान्तिताः ।

यत्तु श्रीनागेशभट्टेन एकशेषं विहाय चतस्रो वृत्तयो व्याख्याताः, तन्मतं खण्डितमत्र ।

एवं च महता परिश्रमेण प्रतिभातिशयेन च षट्सु अध्यायेषु प्रतिष्ठापितैषा व्याकरण-दर्शनभूमिका पञ्चमे विश्वसंस्कृतपरिषन्महोत्सवावसरे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाश्य-माना सती बहुजनहिताय, बहुजनसुखाय च भूयादिति साधुवादवितरणपुरस्सरं विरमति—

श्रीविश्वेश्वरपुर्यां
विजयादशम्याम्
वि० सं० २०३८

श्रीगौरीनाथशास्त्री
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

भूमिका

पाणिनीयं व्याकरण शिक्षानिरुक्तज्योतिषप्रभृतिषु षडङ्गेष्वन्यतमं समाम्नायते सूरिभिः। सर्वशास्त्रोपकारकत्वादपि पाणिनीयस्य व्याकरणस्य निर्विचिकित्सं शीर्षण्यताऽभ्युपेयते। एवं सत्यपि सांख्ययोगन्यायवैशेषिकवेदान्तमीमांसेति षडदर्शनातिरिक्तमास्तिकं किमपि सप्तमं दर्शनं सुधीवरैर्नास्थीयत इति विदन्त्येव कोविदा निश्चप्रचम्। व्याकरणातिरिक्तेषु नाम पञ्चस्वपि वेदाङ्गेषु दार्शनिकानि तत्त्वानि नैव समासाद्यन्ते। तेषामन्यतमं व्याकरणमेव तादृशं वेदाङ्गं यत्र खलु द्वेधा प्रवृत्तिर्दृश्यते—१. पदसाधुत्वलक्षणात्मिका २. दर्शनात्मिका चेति। यद्यपि कैश्चित् पाणिनीयैः सूत्रैर्द्वितीया प्रवृत्तिरपि व्याकरणस्याभिलक्ष्यते सूल्बणम्, तथापि न्यायमीमांसावेदान्तादिवत् तत्राष्टाध्याय्या न सूत्र्यन्ते दर्शनतत्त्वगुम्फकानि सूत्राणि स्वातन्त्र्येण। व्याडिविभावितो व्याकरणदर्शननिरूपकः संग्रहग्रन्थो नोपलभ्यते साम्प्रतम्। कात्यायनीयेषु वार्त्तिकेष्वपि पदसाधुत्वप्रधानानि कार्याणि निर्दिश्यन्ते। व्याकरणदर्शनप्रतिपादकान्येव तत्त्वानि न प्रस्फुटानि। पातञ्जले महाभाष्ये तु व्याकरणदर्शनतत्त्वानि प्रसङ्गतो व्याख्यातानि, न तु प्राधान्यतः। महाभाष्यमाधारीकृत्य वैयाकरणशिरोमणिना भर्तृहरिणा प्रणीतं वाक्यपदीयम् इत्याख्यं ग्रन्थरत्नं नूनं पदसाधुत्वलक्षणप्रक्रियाविधुरं प्रामुख्यतो व्याकरणदर्शनपक्षं समुद्भासयति। अनेनैकेनैव ग्रन्थेन नूनं व्याकरणदर्शनप्रतीपताशङ्काशङ्कुर्निविशङ्कं शक्यते समुत्खातुम्। यद्यपि माधवाचार्यादिभिर्विपश्चिद्भिः सर्वदर्शनसंग्रहादौ व्याकरणदर्शनस्य कानिचन तत्त्वानि समुल्लिखितवता पाणिनीयदर्शनमप्यन्यतमत्वेन समाश्रुतम्, तथापि तत्र नैव कोऽप्यर्थो यथावन्निरूपितो येन प्रेक्षावतां जिज्ञासूनां लब्धपरम्परोत्कलिका शाम्येत्। वैयाकरणसिद्धान्तमञ्जूषायां लघुमञ्जूषायाञ्च यद्यपि नागेशभट्टेन व्याकरणस्य बहून् दार्शनिकविषयानधिकृत्य माधवाचार्यापेक्षया प्रशस्यतरं व्यधायि पल्लवनम्, तथापि तत्र दर्शनान्तरीयसंस्कारसांकर्येण व्याकरणदर्शनविषयाणां घनान्धकारव्याप्तगुहानिक्षिप्तपदार्थवन्नास्ति प्रभाभास्वरता। वाक्यपदीयं खलु महार्घो बोधमणिर्न सुकरः सर्वेषामिति गवेषणाकोविदैर्व्याकरणजगति तादृशग्रन्थस्यावश्यकत्वमनुभूतं यत्रानुबन्धचतुष्टयादिनिर्देशनपुरस्सरं समनुष्ठिताः स्युर्ब्रह्मजीवजगन्मायादिविचाराः।

श्रीमत्पण्डितरामाज्ञापाण्डेयमेतादृशग्रन्थरचनादिशि प्रैरयद् डॉ० आर्० वेनिस्-महोदयः १९१४ तमे ख्रीस्ताब्दे। डॉ० टी० के० लद्दूमहोदयैर्ज्ञानयज्ञपुरोहितैः श्रीपाण्डेयाय विनिर्दिष्टो ग्रन्थसंग्रथनविधिर्नाम। वर्षचतुष्टयं श्रीपाण्डेयेन विषयसम्बद्धोऽनुशीलितोऽनूनको ग्रन्थराशिः। धिषणागर्भपरिपुष्ट आभ्यन्तरो ग्रन्थो बहिरागमनाय श्रीपाण्डेयं प्रैरयत् १९१८ तमे ख्रीस्ताब्दे। अनुपलब्धजनेर्वर्षाणां षड्विंशति यावन्मनसि

निधीयमानस्य ग्रन्थरूपतया क्रमशोऽवतरणमुपक्रान्तं १९४७ ख्रीस्ताब्दाद् डॉ० सम्पूर्णानन्दमहोदयानां प्रेरणया। श्रीपाण्डेयेन पुनरसौ व्याकरणविषयको ग्रन्थौघः प्रारम्भि परिशीलितुम्।

पूर्वं ग्रन्थपरिशीलनात् प्रतीकरूपेणाऽऽत्मना संगृहीता सामग्री नारोचत श्रीपाण्डेयमानसाय। त्रयस्त्रिंशद्वर्षोत्तरं दृष्टिः परिपुष्टिमुपेता तदीया। स्वकीया दोषाः प्रतिभासन्ते स्म मुकुरप्रतिबिम्बिता इवेति दोषज्ञतापदवीमसौ समासादयत्। परकीयदोषदर्शनपटिमाऽसाधारणो हि साधारणजनानाम्। स्वकीयदोषसमुद्भावनं नामाऽऽत्मदर्शनम्। श्रीपाण्डेयस्योक्तिस्तत्र स्वदनीया—'तस्मिन्नेव वत्सरे (१९४७ ख्री०) अगस्तमासे मया पुनरप्यपेक्षितविषयाणां परिपुष्ट्यै ग्रन्थास्तद्दृष्ट्या द्रष्टुमारब्धाः। पूर्वं ये विषयाः प्रतीकरूपेण गवेषितास्ते तु साम्प्रतं न रोचन्ते मे। द्वयोराकाशपातालयोरिव तारतम्यदर्शनात्' इति।

इत्थं श्रीपाण्डेयमहाभागेन व्याकरणदर्शनस्य स्वरूप-सम्बन्ध-विषयाधिकारीति चतुष्टयमिह व्याकरणदर्शनभूमिकायां निर्वर्ण्य शब्दब्रह्मजीवजगन्मायादिविचारः प्रवर्तितः। एकैव परा वाणी व्याकृताव्याकृतरूपभेदेन द्वेधा विभज्यते। तत्र पश्यन्त्यादित्रयीं व्याकृतात्मिकां वाणीमाश्रित्य व्याकरणविषयः प्रकृतिप्रत्ययादिविभागः प्रवर्त्तते। पश्यन्ती-प्रतिभा-प्रणवेत्यादयः शब्दाः व्याकरणापरपर्याया एव। प्रकृतिपदेन माता, प्रत्ययपदेन च पिता गृह्यते। तत्र नामरूपात्मकौ शब्दार्थौ शक्तिशक्तिमन्तौ जडचेतनात्मकौ बोध्यौ। सच्चिदानन्दस्वरूपा परा वाग् विद्योतते—'स्वरूपज्योतिरेवान्तः परा वागनपायनी' इति। पश्यन्त्या एव रूपद्वयं चकास्ति—प्रकृतिरूपमुपादानकारणमेकम्, अपरं च प्रत्ययरूपं निमित्तकारणमिति। इदं च परम्पराद्वयं पश्यन्तीमेव कामधेनुमाश्रित्य समुपक्रान्तम्। कालाख्या स्वातन्त्र्यशक्तिस्तत्रैव विराजते। अविद्यादयः शक्तयोऽपि तद्विजृम्भितम्। सैव पश्यन्तीरूपेण सर्वशब्दबीजा, प्रतिभारूपेण च सकलार्थप्रसवेत्यभ्युपगन्तव्यम्। एतत्प्रकाशेनैवान्ये प्रकाशाः प्रकाशन्तेऽग्निसूर्यादयः। एवं च पश्यन्तीरूपव्याकरणज्ञानमन्तरा पराख्यब्रह्माधिगतिः कल्पकोटिशतैरन्यैरुपायैर्दुर्लभैवेति सुगमोऽयं पन्थाः समवलम्ब्यतां वास्तविकीं मुक्तिमभीप्सुभिस्तत्त्वज्ञानकुशलैर्विद्वत्प्रवरैरिति धिया श्रीपाण्डेयेन व्याकरणदर्शनस्य भूमिका प्रस्ताविता।

यथा कश्चिदनुसन्धाता स्वकीयस्यानुसन्धानस्य संक्षिप्तं विवरणं (synopsis) पूर्वं प्रस्तौति, तदाधृत्य च निबध्नाति गवेषणाग्रन्थम्, तथैव श्रीपाण्डेयमहोदयः स्वकीयामनर्घ्यां गवेषणां व्याकरणदर्शनभूमिका, व्याकरणदर्शनपीठिका, व्याकरणदर्शनप्रतिभा चेति व्यभाजयत् त्रिषु भागेषु वर्ण्यविषयविभाजनानुसारेण।

विभागत्रयात्मकस्य ग्रन्थस्य संग्रथनोत्तरमेव प्रथमतोऽयं भागो मुद्रणार्थं प्रेषितो मुद्रणालयमिति विज्ञायतेऽस्यां व्याकरणदर्शनभूमिकायां द्वयोः पीठिकाप्रतिभयोः संक्षिप्तस्यार्थस्य यथास्थानमुपन्यासेन। एकत्र स व्याहरति—'अयं विषयः—(द्रव्यपद-

वाच्यतारूप:) प्रतिमायां प्रकटयिष्यते' इति, 'विस्तरस्तु प्रतिमायां द्रष्टव्यः' इति। 'एतत् सर्वं पीठिकायां विस्तरेण विवेचयिष्यते' इति। पाणिनीयव्याकरणदर्शनस्य मूलभूतम्—१. सर्ववेदपारिषदं पाणिनीयं व्याकरणम्, २. प्रातिशाख्यानि, ३. शिक्षापद्धतयः, ४. निरुक्तम् इति वाङ्मयं चकास्ति। श्रीपाण्डेयमहोदयेन वाङ्मयमिदमविकलं निर्मथ्य व्याकरणदर्शनभूमिकादयस्त्रयोऽपि भागाः प्रणीताः सन्ति।

स्फोटभेदनिरूपणान्ते सृष्टिक्रमो निरूपितो व्याकरणदर्शनभूमिकायामस्याम्। यद्यपि पाणिनीयेषु सूत्रेषु, कात्यायनीयेषु वार्त्तिकेषु पातञ्जले च महाभाष्ये सृष्टिक्रमो न विवेचितः, तथापि श्रीपाण्डेयेन पाणिनीयव्याकरणसिद्धान्तानवलम्ब्य श्रुतिप्रामाण्यान्निरुक्तसन्दर्भाच्च प्रयत्नोऽयं समनुष्ठितः। निरुक्तमाश्रित्य परिणामवाद आस्थितो न तु विवर्त्तवादः। स्फोटाख्यं शब्दब्रह्म प्रकाशरूपं वैखरीपर्यन्तशब्दराश्यात्मना विमर्शात्मना चार्थश्रेणिमवलम्बमानं सत्त्वरजस्तमोरूपेण बुद्ध्यहङ्कारेन्द्रियादिना सूक्ष्मस्थूलभूतात्मना परिणमते। सृष्टिप्रकरणे यद्यपीन्द्रियाणामपि सृष्टिर्भाष्यादपि प्रतीयते, तथापि तस्या व्याकरणविषयाभावान्नेह ग्रन्थे समुपन्यासः। ज्ञानस्य शब्दरूपेण परिणामो व्याहृतः।

एवं तावच्छब्दसृष्टिप्रक्रियामभिधाय वैखरीरूपः सूक्ष्मः शब्दो व्याकरणेनानुशिष्यते। तत्र स्वरव्यञ्जनसम्भूतिम्, वर्णोच्चारणप्रक्रियां चोक्त्वा 'वायोरणूनां ज्ञानस्य' इति वाक्यपदीयोक्तो दर्शनभेदो विवेचितः। ततो वर्णानां स्थानप्रयत्नविवेको विस्तरेण विभावितः प्रातिशाख्यशिक्षाग्रन्थानामाधारेण। सर्वेषां प्रातिशाख्यानां शिक्षाग्रन्थानां चाधारेण वर्णानां स्थितिरुपवर्णिता। पाणिनीयव्याकरणानुसारेण च विवेचनं कृतम्। तत्र ग्रन्थेषु वर्णानां साङ्गोपाङ्गं यादृशं वर्णनं लभ्यते, न तादृशमन्यत्र। श्रीपाण्डेयेन वैष्णवशैवशाक्ततन्त्रग्रन्थान् पर्यालोड्य वर्णोपन्यासपूर्वकं तत्रत्यः सृष्टिक्रमो दर्शितः। ततो निरुक्तानुसारेण शब्दार्थसृष्टिक्रमो निरूपितः। पर्यन्ते तन्त्रोक्तसृष्टिक्रमो व्याकरणप्रमाणमङ्गीकृत्य पर्यालोचितः।

कस्मिंश्चिदपि दर्शने प्रत्यक्षानुमानोपमानशब्दोपलब्ध्यादिषु प्रमाणेषु कानिचिदवश्यमास्थीयन्ते। व्याकरणं दर्शनं चेत् कति प्रमाणानि तेन समाश्रीयन्ते? व्याकरणशास्त्रे नैतादृशः कश्चन स्वतन्त्रो ग्रन्थो विद्यते (व्याकरणदर्शने 'प्रमाणमीमांसा' इति ग्रन्थोऽस्मादेव विश्वविद्यालयात् प्रकाशमुपेतः कतिभ्यश्चिद् वर्षेभ्यः प्राक्) नापि वैयाकरणग्रन्थेष्वेतादृशं किमपि प्रकरणं विवेचनं वेति कथमस्य दर्शनत्वं प्रतिष्ठाप्यत इति पर्यालोचनायामिह श्रीपाण्डेयेन व्याकरणाभिमतानि प्रमाणानि समीक्षितानि। बन्धमोक्षस्वरूपतामभिधाय स्फोटतत्त्वं सङ्कीर्त्तितम्।

परतो द्रव्य-सम्बन्ध-गुण-साधन-शक्ति-क्रिया-काल-उपग्रह-लिङ्गवृत्तिप्रभृतीनि व्याकरणदर्शनतत्त्वानि मुख्यतो वाक्यपदीयमाश्रित्य साधीयो विवेचितान्यस्मिन् व्याकरणदर्शनभूमिकाभागे। प्रयासोऽयमादिमो व्याकरणदर्शनप्रतिष्ठापनादिशि वरेण्यः

श्रीपाण्डेयमहाभागस्य। इतः प्राप्तप्रेरणा अनेके सुधीप्रवराः स्वतन्त्रान् ग्रन्थान् निबन्द्धुं प्रवृत्ता अभूवन्नित्युपपद्यते स्फारसभाजनभाजनताऽस्य ग्रन्थमणेः।

१९५४ तमे ख्रीस्ताब्दे सरस्वतीभवनाध्ययनमालाया एकादशपुष्पतया विकचितस्यास्य गुणगणगरीयस्त्वादल्पीयस्येवानेहसि समजनि मुद्रणातीतत्वम्। गुणलुब्धानां जिज्ञासूनां सुधियां चासकृत् पुनर्मुद्रणाऽऽग्रहं निध्याय विश्वविद्यालयेनास्य पुनः प्रकाशनमङ्गीकृतं सामोदं प्राच्यपाश्चात्त्योभयविद्याजुषां दार्शनिकप्रवराणां **श्रीगौरीनाथशास्त्रिभट्टाचार्यमहोदयानां** सम्पादनविधौ। साद्यस्कं सम्पादनविधिमनुरुध्य विविधपरिशिष्टविशिष्टं संस्करणमिदं लब्धवर्णानां प्रीणनेन जिज्ञासूनां चोपकारेण नूनं तदीयानि समावर्जयिष्यति चेतांसीति मे द्रढीयान् प्रत्ययः।

विश्वविद्यालयाऽनुदानाऽऽयोगस्य वैत्तिकेन साहायकेन ग्रन्थोऽयं मुद्रित इति तत्रत्येभ्योऽधिकारिभ्यो धन्यवादान् वितरन् विरमति

वाराणस्याम्
श्रीरामनवम्यां २०३९ वै०
(२-४-८२ ख्रो० भृगौ)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः,
अनुसन्धानसंस्थानस्य

EDITOR'S NOTE

In response to our University's request for financial assistance for reprinting a number of our publications which have gone out of print and for which a demand from the scholars is being felt, the University Grants Commission was pleased to sanction some money for the reprinting of three volumes only, among which the two works by Pandit Rāmājñā Pāṇḍeya were included. We have now a great pleasure in reprinting one of his works, namely, Vyākaraṇa-Darśana-Bhūmikā. The forewords to the first edition by Prof. K. A. Subrahmanya Iyer, the preliminary remarks by Pandit Sabhapati Sharma Upadhyaya and the author's own introduction are being included in this edition.

It was in 1914 that Dr. Arther Vanice the then Principal, Benares Sanskrit college and Mr. T. K. Laddu brought Pandit Rāmājñā Pāṇḍeya for doing research in Sanskrit Grammar. About three decades after it was at the suggestion of Dr. Sampurnanand that Panditji started writing his introduction to the Philosophy of Grammar.

Born at the village Ratasaṛa in the district Ballia in Uttar Pradesh, Pandit Rāmājñā Pāṇḍeya taught Sanskrit at Patna Sanskrit College and for a time he was a teacher at Puri. He was initiated in the sect of Rāmānujācārya. Pandit Rāmājñā Pāṇḍeya studied Paninian Grammar at Varanasi. Among his teachers may be mentioned Pandit Devanārāyaṇa Tripāṭhī a renowned scholar in Sanskrit Grammar of his time. It was in 1947 that he was appointed by the Government of Uttar Pradesh to undertake research at the Sarasvatī-Bhavana Library.

The Paninian system of Grammar has been privileged to be ranked amongst the different systems of Indian Philosophy. It is said that monism flowed in the three streams of Śabda-Monism, Brahma-Monism and Vijñāna-Monism. It is indeed quite interesting to note that Śabda-Monism in Indian thought has found a most eloquent elaboration in the Brahma-Kāṇḍa of Bhartṛhari and the Sphoṭasiddhi of Maṇḍana Miśra. The importance of this branch of philosophy is established when it is found that almost all the reputed Ācāryas of different systems of Indian Philosophy took special care to mention it and to criticise it and finally to reject it.

We are privileged to-day to present this work from the pen of a reputed scholar before the academic world. And in this connection we acknowledge with gratitude the liberal grants sanctioned by the University Grants Commission for its publication.

Gaurinath Sastri

FOREWORD TO THE FIRST EDITION

I have heen asked to write a few words about the व्याकरणदर्शनभूमिका of Pandit Rāmājñā Pāṇḍeya, U. P. Government Research Scholar, working in the Sarasvatī-Bhavana, Government Sanskrit College, Banaras. I do so with pleasure. It is an attempt to bring together the ideas, partly philosophical and partly linguistic, found scattered in Vaiyākaraṇa literature. That Vyākaraṇa was looked upon as a Darśana is made clear by the fact that one of the chapters of the Sarvadarśanasaṅgraha is entitled : पाणिनिदर्शनम्. That chapter is all too brief. It is based on ancient works such as the Vākyapadīya of Bhartṛhari. The ultimate source of all these ideas is, of course, the Aṣṭādhyāyī of Pāṇini as interpreted by Kātyāyana and Patañjali.

The present work called भूमिका is only the first part of the work. Two more parts, the पीठिका and the प्रतिमा are promised. The भूमिका gives in summary form the contents of the other two parts. It is based, not only on the ultimate source mentioned above, but also on later works such as the Vākyapadīya of Bhartṛhari and the commentaries thereon, the Pradīpa of Kaiyaṭa, the Laghumañjūṣā and the Uddyota of Nāgoji Bhaṭṭa. The author has also made extensive use of the phonetic material found in the Śikṣā works and the Prātiśākhyas, especially the Taittirīyaprātiśākhya, with its two commentaries, the Tribhāṣyaratna and the Vaidikābharaṇa. This is a novel feature of the work as compared with the Laghumañjūṣā of the Vaiyākaraṇabhūṣaṇa of Kauṇḍabhaṭṭa. A certain amount of material has been taken from the Tantras also, especially on the phonetic and mystic aspects of the varṇamālā.

The work deals with a wide range of topics : the nature and scope of Vyākaraṇa, Sphoṭa and its varieties, the number

of sounds in the Sanskrit language, their mode of articulation, their variation according to अनुप्रदान, संसर्ग, स्थान, करण and परिमाण, the different pramāṇas, the Vaiyākaraṇa conception of मोक्ष, जाति, द्रव्य, गुण, दिक्, क्रिया, काल, लिङ्ग and वृत्ति। Incidentally there are discussions on such topics as the वीचीतरङ्गन्याय and the कदम्बगोलकन्याय.

One noteworthy feature of the work is the way in which the author unhesitatingly rejects the views of even such writers as Helārāja and Nāgeśa. Against Helārāja, he holds that Vaiyākaraṇas accept the परिणामवाद and not the विवर्तवाद. He considers the view of Nāgeśa on वर्णस्फोट as going against the Bhāṣya and rejects Nāgeśa's statement : अणुः शब्द इत्यार्हता मन्यन्ते on the ground that the view in question is held really by Grammarians.

The work is written in very simple Sanskrit. The author states his views and his disagreements from others in a forthright manner. Pandits may miss the तर्क element in the exposition of the ideas but, as a compensation, the work may appeal to a wider circle of readers. The phonetic material taken from different sources requires a comparative and critical study on the basis of tradition. It is a pity that the author does not seem to be familiar with the work on Sanskrit phonetics going on in western countries. The recently published (1953) "Phonetics in Ancient India" by W. S. Allen deals with many matters discussed in this work but with an entirely different approach.

This is only the first part of the work. It is to be hoped that the U. P. Government will enable Pt. Rāmājñā Pāṇḍeya to continue the work and finish it.

K. A. SUBRAHMANYA IYER
Lucknow University.

वक्तव्यम्

(प्रथमसंस्करणस्य)

प्रायो बहुस्थलावच्छेदेन व्याकरणदर्शनभूमिकेयं मया समवेक्षि ।

यादृशो व्याकरणागमांशोऽनेन ग्रन्थकर्त्राऽप्रतिमप्रतिभाशालिनां पुरस्ता-दुपस्थाप्यते, स प्राचीनतमोऽपि नव्यभव्यतां न परिजहाति । तदुक्तं हरिणा—

य: पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।
स एव दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः ॥
पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः ।
स नीतो बहुशाखत्वं चन्द्राचार्य्यादिभिः पुनः ॥ इति ।

अभिवाक्यपदीयकाराभिहितिभिर्नितरां निगूढं व्याकरणागमरहस्यं हरेरर्वा-ग्भाविभिर्बुधैर्न यथावत्पाठ्यपाठनपरम्परामानीतमत उच्छिन्नमिव जातम् ।

तत्र भगवता पतञ्जलिनाऽपि "चत्वारि वाक्परिमिता पदानि" इत्यस्य व्याख्यायाम—'चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेत्येवं व्याचक्षाणे-नागमरहस्यस्य गोपितत्वमेव द्योतितम्' इति ।

"संग्रहे प्राधान्येन प्रदर्शितं नित्यो वा स्यात् कार्य्यो वेति भाष्येण शब्दप्रकृति-रपभ्रंश इति संग्रहकारः" इति हेलाराजोक्त्या च तदानीमुपलभ्यमानोऽपि संग्रहो नैव सुलभप्रचार आसीत् । अल्पविद्यापरिग्रहान् प्रक्रियामात्राध्ययनशीलान् वैयाकरणा-नवाप्य परिभ्रष्टो व्याकरणागमः ।

तमेव व्याकरणागममुद्दिधीर्षुरनिर्वचनीयप्रतिभाभास्वरो रामाज्ञापाण्डेयश्चिरात् प्रयतमान आसीत् ।

निगमादपि प्राचीनमागमं सुस्थयन्, आगमे षोडशैव मातृका आसन्, तत एव च स्वराणामुद्भवः, अनुनासिकोच्चारणे ऐकारौकारोच्चारणे च त्रुटिं प्रातिशाख्यप्रमाणैर्द्र-ढयन् मुख्यानि चत्वार्य्येव कारकाणि इति च व्यवस्थापयन्, स्वासाधारणगवेषणापद्ध-त्येतरानाधुनिकानन्वेषकानधरयन् नवनवोन्मेषपथपथिकानाश्चर्य्यकरान् पदार्थानुद्भा-वयन्नयं पाण्डेयमहोदयोऽवश्यमेवोत्साहप्रदानास्पदतामर्हति ।

जगदीश्वरं प्रार्थये च शतादप्यधिकं स्वस्थोऽचिन्तचित्तो जीवन्नेवमेवानन्य-साधारणं कार्य्यं कुर्वाणः परमरमणीयां कीर्त्तिकल्पलतिकां लभेतेति ।

सभापतिशर्मोपाध्यायः
एम्. एल्. सी.
प्रिन्सिपल, वि० सं० कालेज, काशी ।

प्राक्कथनम्

(प्रथमसंस्करणस्य)

सम्बन्ध-व्यक्ति-जातित्रयविमलपदश्चारुबाह्यान्तराभ्यां
स्फोटाभ्यां शीर्षकाभ्यां विहितनिजतनुर्दिक्क्रियासाधनाख्यैः ॥
शृङ्गैः कालात्मरूपैः पुरुषगुणगणैर्वृत्तिलिङ्गैः ससंख्यै-
र्द्रव्यैः सोपग्रहैर्यो जयतु निजकरैः सप्तभिः शब्दमूर्त्तिः ॥ १ ॥

परं परां प्रणम्याहं पितरौ मातृकागुरून् ।
भूमिकालखनात् पूर्वं किञ्चिदत्र निवेदये ॥ २ ।

भूमिकायां मया संक्षेपेण किञ्चित् प्रकाशयिष्यते । सम्प्रति यत् किञ्चिदहं वच्मि, तत्र न मेऽभिमानो मन्तव्यः, केवलं स्वान्ते महान्तं क्षोभमनुभवन् सर्वानास्तिकानुद्दिश्य साञ्जलिबन्धं प्रार्थये । भो भोः सज्जनाः ? बहोः कालादधुना भावत्कं भारतं स्वातन्त्र्यं प्राप्य बाल इव यौवनावापनेऽहर्निशं चेष्टते । वयमपि चेतनाश्चैतन्यस्यैव प्राधान्यमाशासु सडिण्डिममुद्घोषयन्तो बहुविधसम्प्रदायनिगडिता अपि रात्रिन्दिवं नूतनातिनूतनसम्प्रदायनिर्माणे बद्धपरिकरा वर्तामहे ।

अपरे च जडवादिनो वैदेशिका नव्यभव्यव्योमयानादिनिर्माणेन जनानुपकुर्वन्तः सततं प्रयतन्ते । दृष्टिं निक्षिपन्तु भवन्तोऽस्माकं पूर्वजानां स्पष्टासु सूक्तिषु, यथोक्तं भगवता यास्केन निरुक्ते, वाक्यपदीयटीकायां हेलाराजद्विजन्मना च । किं वर्तते तादृशं साहसमाधुनिकेषु विप्रप्रवरेषु अन्येषु वा केषुचिद् विद्वत्सु । ये हि स्वयं गर्ते पततोऽन्यानपि च पातयतो मनुजान् सन्मार्गं प्रदर्श्य समुद्धरेयुः । न दृश्यन्तेऽद्यत्वे भगवता पतञ्जलिना परिभाषिताः शिष्टाः, नापि च तादृशाः शिष्याः किञ्चिदालोचयन्तु भवन्तः । अस्य शिष्यशब्दस्य प्रयोगः कं भावमवलम्ब्य अध्याप्येषु जनेषु कृतोऽस्माकं पौर्वकालिकैर्बुधैः । तथा हि शिष्यस्य शासकेन अध्याप्यस्य अध्यापकेन शिक्ष्यस्य शिक्षकेण गुरोस्तु छात्रेण सह सम्बन्धो जागर्ति ।

तत्र शिष्यशब्दो भाष्ये स्थानिवत्सूत्रे उपाध्यायेन (महा. अ. १ पा. १ सू. ५६) आकडारसूत्रे (पा० १।४।१) आचार्येण 'छत्रादिभ्यो णः' (पा० ४।४।६२) इति सूत्रे गुरुणा 'मघवा बहुलम्' (पा० ६।४।१३३) इति सूत्रे शासनीयेऽर्थे प्रयुक्तोऽस्ति ।

शिक्षणीये पुरुषे शिक्ष्यशब्दप्रयोगमकृत्वा शिष्यशब्दं प्रयुञ्जानस्य जनस्य गूढोऽभिप्रायोऽवगन्तव्यः ।

तथाहि शिक्षकेणाध्याप्यः पुरुषो यदाध्यापितो भवति, तदा स शिक्षित इत्युच्यते । परं यदि शिष्यः शिष्यते स्म, तदा स शिष्ट इति कथ्यते । एतदर्थम् 'विद्या ह

वै ब्राह्मगमाजगाम' इत्याद्यागमोक्तिं संस्मृत्य तादृशं शासनीयं "शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्" इति गीतोक्तानुसारम् अर्जुनमिव प्रपन्नं जनं शिष्टं विधातुं शिष्यशब्दः प्रयोगपदवीमानीतोऽभूत् ।

एवं सति शिल्पिभिः प्रस्तरादिनिर्मितायां प्राणप्रतिष्ठादिसंस्कारैः संस्कृतायां प्रतिमायां भगवत्तादात्म्यभावनया भगवदभेदेन सम्यगर्चितायां यद्यैहिकामुष्मिकफलानि लब्धुं शक्यन्ते तर्हि भगवन्निर्मितायां भगवतैव प्राणैर्योजितायां गुरुरूपायां व्यक्तौ शिष्यो यदि भगवद्बुद्ध्याऽभिगमपादोपस्पर्शनादिभिः समर्चयेत् तर्हि अवश्यमेव "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इति भगवद्वाक्यस्य सङ्गतिः स्यात् ।

अन्यच्च 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्' इत्यादि गीतोक्तवाक्यसूचितं भक्तत्वं तस्मिन् प्रकाशेत । तत्समकालमेव "त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसार-विमोचनादयः" इति स्तोत्ररत्नोक्तपद्यानुसारं भगवता भक्ते भगवत्तादात्म्यापन्ने पुरुषे ब्रह्मविष्णुरुद्रनिभे तादृश्यः शक्तयोऽवश्यमेव दृग्गोचरीभूता भवेयुरित्यत्र नास्ति किञ्चिच्चित्रम् । स च भक्तः स्वेच्छया ब्रह्माद्यन्यतमभावेन व्यवहरेत् सर्वभावेन वेति स एव निश्चेष्यति । अतः सर्वेऽप्यास्तिकास्तादृशं प्रयत्नं विदधतां येन रूसामेरिकाप्रभृतिभी राष्ट्रैः संसारमसमये समुच्छेत्तुं प्रयत्नो मा कारीति ।

इह प्रकृतविषये किञ्चिदुच्यते—

अयं हि दर्शनीयो विषयो द्वादशोत्तरैकोनविंशतिशततमात् ख्रीस्ताब्दादनुक्षणं समालोचनापथं प्रापितो ग्रन्थरूपं लब्धुं व्यग्रोऽभवत् । तदा कीदृशमाकारमस्मै दद्या-मिति चिन्तयन् निरचिनवम् । 'अवश्यमेव दर्शनीयः पुरुषः पीठिकायामेव संस्थाप्यः, पीठिका च काञ्चिद् भूमिकामपेक्षते इति कृत्वैव प्रथमं मया भूमिकेयं विनिर्मिता । तस्यां च स्वनविज्ञानरूपा पीठिका प्रतितिष्ठतु । तस्यां षोडशभिरङ्गै रञ्जितो भूमिका-पीठिका-प्रतिमारूपेण बद्धो दर्शनात्मा पुरुषः सततमनुसन्धेयः । अग्रे प्रकाशं प्रापयिष्य-माणायां पीठिकायां षोडशदलानि एका च कर्णिकेति सप्तदश प्रकरणानि भवेयुः, या च ग्रन्थरूपं प्राप्ता प्रकाशनाय त्वरते । प्रतिमाऽपि भूमिकायां संक्षेपं रूपमाप्ता विस्तररूपेण समक्षमागन्तुं कञ्चन समयमपेक्षते ।

भो भोः सहृदया दीयतां दयादृष्टिर्मयि भगवति प्रपत्तुं व्यग्रे मानवे । नाहमित-स्ततो विप्रकीर्णान् विषयान् संक्षिप्य प्रतिमायां सन्निवेशयितुं वाञ्छामि; किन्तु काले काले भगवतैव विशुद्धायां मदीयायां बुद्धौ निवेशितान् पदार्थान् संकलय्य शिक्षानिरुक्त-प्रातिशाख्येत्यङ्गत्रयविशिष्टं व्याकरणरूपमङ्गिनं परिष्कृत्य निगमागमाद्यर्थानुकूलं सत्यवसरे स्थापयिष्ये । प्रार्थये च भगवन्तं यदयं मम सुहृत् पार्थसारथिर्गृहश्रमादिमन्त्री शिक्षैकसागरपारदृश्वा योगं युञ्जानः श्रीसम्पूर्णानन्दो नीरोगः सौभाग्यसम्पन्नश्चिरं जीव्यात्, यस्योद्योगेन चिरात् समीहितोऽर्थस्त्वरितं सिद्धिं प्रापितो भविष्यति ।

अहमपि स्वीयेऽस्मिञ्जन्मनि बहुभिर्मदीयैर्मित्रैर्बहुविधग्रन्थनिर्माणार्थमुद्योजितोऽपि पर्याप्तद्रव्यलाभलोभं दर्शितोऽपि नहि तादृशान् ग्रन्थान् निर्मातुं प्रवृत्तोऽभवम्। वर्तते च तादृशसाधारणजनोपकारकग्रन्थनिर्माणेऽभिप्रायः। स चैतद्ग्रन्थनिर्माणानन्तरं सफलो भूयादिति भगवन्तमभ्यर्थये।

एतद् ग्रन्थस्वरूपमाविष्कर्तुं नियोक्तार स्वर्गामिणं डाक्टर ए० बेनिस्महोदयम, तथा डाक्टर टी० के० लद्दूमहाभागं च सततं पूज्यबुद्ध्या सस्मरामि।

अधुनाऽस्मिन् भारते प्रगाढपाण्डित्यैकाधारं प्राच्यप्रतीच्यदर्शनाचार्यं म० म० श्रीगोपीनाथकविराजमहाभागं डी० लिट्० इत्यादिपदवीयोग्यांश्च छात्रान् विदधतम् एतद्ग्रन्थनिर्माणेऽन्तरान्तरा ग्रन्थनीयान् विषयान् निर्दिशन्तं श्रीमन्तं पण्डितराजं विधानपरिषदो मुख्यं सभ्यं गुरुकल्पं श्रीसभापत्युपाध्यायं च स्तुतिकुसुमाञ्जलिभिः समर्चामि।

अभिवादये च स्वर्गगामिणोऽस्माकमाद्यान् गुरून् व्याकरणैकप्राणभूतान् देवनारायणत्रिपाठिनः (तिवारीजीतिनाम्ना प्रसिद्धान्) गोनर्दीयावतारान् वैयाकरणकेसरिणस्तपसार्जितार्षशक्तीन्, द्वितीयान् गुरून् म० म० भारद्वाजदामोदरशास्त्रिणः, तृतीयान् गुरून् सकलदर्शनपारावारीणान् साहित्यार्णवकर्णधारान् 'सी० आई० ई०' इत्यादिपदवीविभूषितान् मानवल्लीगङ्गाधरशास्त्रिणः।

भारतमार्तण्डान् अत्रैव विद्यारस इत्यादिपदवीविभूषितान् साक्षात् शिवावतारान् गवेषणाशक्तिविशिष्टान् मदीयगवेषणाश्रवणमात्रेण प्रचलत्तुन्दान् आस्तिकनास्तिकसकलदर्शनप्राणभूतान् म० म० शिवकुमारमिश्रांश्चाभिवादये।

येषु येषु ग० सं० कालेजाध्यक्षेषु सत्सु मदीयं गवेषणाकार्यं प्रचलितमासीत्, तेषु अन्यतमं डा० मङ्गलदेवशास्त्रिणम्, मन्मित्रं म० म० खिस्तेश्रीनारायणशास्त्रिणम्, मदीयव्याकरणदर्शनभूमिकायाः साकल्येन द्रष्टारं को० अ० ऐय्यरमहाभागं सम्प्रति काशिकराजकीयसंस्कृतमहाविद्यालयाध्यक्षं व्याकरणाचार्यम् एम्० ए० प० त्रिभुवनोपाध्यायं च धन्यवादशतैरभ्यर्चये।

का० रा० सं० महाविद्यालयप्रधानाध्यापकं प० श्रीबदरीनाथशुक्लम्, काशिकराजकीयसंस्कृतमहाविद्यालये व्याकरणाध्यापकम् अध्यापने लब्धयशसं पञ्चोलिश्रीबालकृष्णम्, वेदविद्याप्रवीणं पुराणादिशास्त्राध्यापकमनन्तशास्त्रिफड़केमहोदयम्, सारस्वतीसुषमासम्पादकं दर्शनाचार्यव्रजवल्लभद्विवेदं च धन्यवादशतैर्भूषये। एम्० ए० कल्पो व्याकरणाचार्यो विरलास० महाविद्यालयाध्यापकरामावधपाण्डेयः शुभकामनाभिः परिवर्ध्यते। एतैर्महोदयैर्ग्रन्थमुद्रणे बहुविधं साहाय्यं दत्तमिति पार्थसारथिः श्रीकृष्ण एतेषां मनोरथं पूर्यादिति प्रार्थये।

विदुषामाश्रवः
रामाज्ञापाण्डेयः

विषयानुक्रमणी

विषयः	पृष्ठम्
शब्दार्थनिरूपणाध्यायः	**१-८२**
मङ्गलश्लोकः	१
व्याकरणदर्शनशब्दार्थः	१
व्याकरणदर्शनलेखनेतिहासः	२
नवीनप्रवृत्तेर्महदन्तरम्	२
एतस्य दर्शनस्य सामयिकत्वम्	२
माधवेन सम्यग् नोपन्यस्तम्	३
लघुमञ्जूषादिना न गतार्थता	३
व्याकरणस्वरूपम्	३
आपः पवित्रमित्यस्य नवीनोऽर्थः	४
प्रकृतिप्रत्यययोर्वास्तवं रूपम्	५
शब्दपरम्परायामर्थपरम्परानुस्यूता	५
पराया वाण्या व्यवहारातीतत्वम्	६
पश्यन्त्यामेव शक्तिशक्तिमतोश्चर्चा	६
कालाख्या शक्तिस्तत्रैव	६
तत्समापन्नस्य सृष्टयादिकर्तृत्वम्	६
अत्र वेदः प्रमाणम्	६
प्रतिभापश्यन्त्योर्विभागैक्ये	७
प्रणवपदेन पश्यन्ती ग्राह्या	७
वैयाकरणशिष्टयोरैक्यम्	७
मन्वादयोऽपि नहि महर्षयः	८
अपोद्धारपदार्थः	८
यास्कमतेन सम्प्रति ऋषीणामनुत्पत्तिः	८
व्याकरणस्य मुख्यं प्रयोजनं साधूनामेव वाचकत्वञ्च	९
व्याकरणात्पूर्वं शिक्षाध्ययनं युज्यते	९
अनृतद्वैविध्यम्	९
अपभ्रंशप्रादुर्भावः	९
शब्दसाधुत्वज्ञानपूर्वकयोगाभ्यासेनाभ्युदयः	१०
पाणिनेः शिष्टत्वविचारः	१०

विषयः **पृष्ठम्**

विषयः	पृष्ठम्
विशेषसामान्यभेदेन साधुत्वं द्विविधम्	११
दर्शनान्तरापेक्षयास्य विशेषः	११
अर्थप्राधान्यमाश्रित्य न्यायवैशेषिकयोः प्रवृत्तिः	१२
ज्ञानप्राधान्येनान्येषां दर्शनानामवतारः	१२
शब्दप्राधान्येन व्याकरणतन्त्रयोः व्यवहारपरमार्थदशयोरस्योपयोगः	१२
व्याकरणागमसम्प्रदायविच्छेदः	१३
योगमार्गेण षट्चक्रभेदः	१३
तान्त्रिकाणां सिद्धान्ते बिन्द्वादीनि महाबिन्द्वन्तानि, अपराण्यपि दश चक्राणि	१४
वैदिकमार्गे चतुर्णामेव चक्राणां भेदनेन उत्तमस्य ज्योतिष उपलब्धिः	१४
आगममार्गपारङ्गतानां व्यासशुकादीनां चक्रभेदमन्तरापि उत्तमस्य ज्योतिष उपलब्धिः	१४
भूमिकायां पीठिकाप्रतिमयोरर्थः संक्षिप्तः	१४
व्याकरणदर्शनस्य किं मूलभूतं वस्तु	१५
सर्ववेदपारिषदं पाणिनीयं व्याकरणम्	१५
व्युत्थितावस्थायामेतन्निर्माणम्	१६
स्फोटस्मर्ता स्फोटायनः	१७
वृत्तिभेदेन कालभेदः	१७
अष्टाध्यायीस्वरूपम्	१७
द्रव्यशब्दार्थः	१८
शब्दस्वरूपम्	१९
ध्वनिर्द्विविधः	१९
एकस्यैव स्तोत्रस्य पठने कालत्रैविध्ये कारणम्	१९
इन्द्रियविषययोः संस्कारः	२०
स्फोटो द्विविधः, आन्तरो बाह्यश्च	२१
अष्टानां स्फोटानामुपन्यासः	२३
षोडशस्फोटाः	२४
सृष्टिक्रमः	२५
भाषाविज्ञानप्राधान्यमत्र सृष्टिक्रमस्तु प्रासङ्गिकः	२६
अदृष्टोत्पत्त्याभ्युदययोगः	२६
परा व्यवहारातीता	२६
ज्ञानस्य शब्दरूपेण परिणामः	२७
षोडशमातृकाः	२७
एकविंशतिर्वर्णा व्यवहारोपयोगिनः	२७
वर्णोच्चारणप्रक्रिया	२८

विषयः	पृष्ठम्
शब्दविषये त्रीणि दर्शनानि	३०
वर्गविशेषसृष्टिः, स्थानप्रयत्नविवेकश्च	३०
तैत्तिरीयप्रातिशाख्यभाष्यमते परिमाणत्वेन वर्णविभागः स्वरवर्णमात्रविषयः	३०
स्थानैक्येऽप्यनुप्रदानप्रयुक्तो भेदः	३१
विवारसंवारयोरेवोपादाने आन्तरतम्यसिद्धौ अन्येषामुपादानस्यावश्यकता	३१
प्रक्रियायामनुपन्यस्तस्यापि बाह्यप्रयत्नस्य प्रसादे आन्तरतम्यार्थमुपादानम्	३१
तैत्तिरीयप्रातिशाख्यानुसारं वर्णोत्पत्तिप्रक्रिया	३२
भट्टनागेशोक्तबाह्यप्रयत्नस्वरूपखण्डनम्	३२
बाह्यानां न वर्णोत्पत्त्यनन्तरभावित्वम्	३३
स्थानकरणाभ्यन्तरप्रयत्नानामुपन्यासः	३३
तत्र स्वराणां स्थानादीनि	३३
तैत्तिरीये संवृतविवृतावेव प्रयत्नौ स्पृष्टप्रयत्नश्च	३४
तैत्तिरीयमते ऋॡवर्णयोरिति वार्त्तिकस्यानुत्थितिः	३४
उच्चारणशैलीभेदात्स्थानभेदः	३४
वर्णानां स्थानकरणयोर्निर्देशः	३५
व्यञ्जनानां स्थानादीनि	३५
व्यञ्जनोच्चारणप्रक्रिया	३५-३६
यमानां स्वरभक्तेश्च विचारः	३७
यजुःप्रातिशाख्यानुसारं वर्णोपन्यासः	३८
ऋक्प्रातिशाख्यानुसारं वर्णसमाम्नायः	३९
अनुस्वारोच्चारणे विशेषः	४०
सामप्रातिशाख्यानुसारं वर्णोपन्यासः	४१
अथर्वप्रातिशाख्यानुसारं वर्णोपन्यासः	४१
करणैः स्थाने कीदृशः प्रयत्नो विधेयः	४१-४२
प्रथमाः तृतोयाः द्वितीयाश्चतुर्थाश्च संपद्यन्ते	४२
पाणिनीयशिक्षानुसारं वर्णाः	४३
पाणिनीयव्याकरणे वर्णानां स्थितिः	४४
संभाव्यमाना वर्णाः	४५
सन्धिभेदाश्चत्वारः पञ्चधा च	४६
वस्तुतस्त्रय एव सन्धयः	४६
वैष्णवतन्त्रानुसारं वर्णस्वरूपम्	४७
शैवशाक्तानुसारं वर्णाः	४८
तत्रत्यः सृष्टिक्रमः	४८

विषयः | पृष्ठम्

विषयः	पृष्ठम्
तन्त्रालोकानुसारम्	४९-५०
मातृकाचक्रानुसारं वर्णोपन्यासः	५१
सर्वेऽपि विषया आर्षप्रयत्नप्रभवाः	५२
प्रतिमाविषयसंक्षेपः	५२
आधुनिकदर्शनानां मूलं संग्रह एव	५२
सत्तैव मूलं तत्त्वम्	५३
तस्या द्विविधः परिणामः	५३
षण्णां भावविकाराणामुपन्यासः	५३-५५
द्विविधो विवर्तः, सिद्धविवर्तः साध्यविवर्तश्च	५५
परिणामवादो वैयाकरणानाम्	५६
सत्तैव नानाभावं भजते	५६
शब्दब्रह्मैवोत्तमं ज्योतिः	५६
सत एव सर्वमुत्पद्यते	५७
बिन्दुबीजनादनिर्देशः	५७
निरुक्तमूलकशब्दार्थसृष्टिक्रमः	५८
प्रकाशो बिन्दुः प्रकृतिः, तत्र लीनः प्रत्ययः ततो निःसरति	५८
षोडशमातृकास्वरूपञ्च	५९
सृष्टिक्रमे मूलभूतनिरुक्तस्योपन्यासः	५९
तन्मते प्रकृतेः प्रतिभाया उत्पत्तिः	६०
अस्मिन् विषये विशेषतो दृष्टिरपेक्ष्यते	६०-६१
बुद्धौ ज्ञानस्य प्राधान्यं धृतौ तु क्रियायाः	६१
सृष्टिविसृष्टयोः स्वरूपम्	६२
षोडशमातृकाविषये तान्त्रिकाणां वैयाकरणानां च मतभेदः	६२
प्रमाणविमर्शः	६३
मनुष्याणां प्रत्यक्षज्ञानमसम्भवि	६३
अत्रार्थे भर्तृहरिसम्मतिः	६३
शब्दस्य मुख्यं प्रामाण्यम्	६४
शब्दापेक्षयानुमानादि दुर्बलम्	६४
अत्र भाष्यस्य प्रमाणतया प्रदर्शनम्	६४
उपमानं प्रमाणतया न गण्यते	६४
ऋषि-मुनि-मनुष्य-पशु-भेदभिन्नाश्चतुर्विधा मानवाः	६४
ऋषिरेव शिष्टः	६५
व्यवहारार्थमपूर्णमपि प्रत्यक्षं स्वीक्रियते	६५

विषयः **पृष्ठम्**

व्याकरणे मनसो व्यापकत्वम्	६५
चरके मनसोऽणुत्वं योगे तु व्यापकत्वमेव	६६
व्याकरणे अनुपलब्धिरपि प्रमाणम्	६६
प्रत्यक्षं द्विविधम्	६६
आगमपदेन शब्दः	६६
प्रत्यक्षेऽपि तारतम्यम्	६७
ऋषीणामिन्द्रियान्तरेणापीन्द्रियान्तरव्यापारः	६७
भाष्ये प्रत्यक्षस्यानुमानस्य चोपन्यासः	६८
स्थानभेदेन प्रत्यक्षादपि अनुमानस्य बलीयस्त्वम्	६८
मोक्षविमर्शः	६८
आधुनिकानि दर्शनानि संग्रहमूलकानि	६९
वैयाकरणानां श्रुतेः प्रामाण्येन मोक्षक्रमः	६९
ब्रह्मामृतप्राप्तिः केषाम् ?	७०
बन्धमोक्षस्वरूपम्, व्याकरणस्वरूपञ्च	७१
मुक्तौ नहि चितौ लयः	७२
स्फोटायनस्य स्फोटस्मर्तृत्वविवरणम्	७३
नित्यस्य स्फोटस्य स्वरूपम्	७४
स्फोटतत्त्वं जानतामेव सर्वे सर्वार्थवाचका इति ज्ञानम्	७४
वीचितरङ्गन्यायकदम्बपुष्पन्यायविमर्शः	७४
वीचितरङ्गन्याय एव युक्तः	७५
स्फोटस्य विभागः काल्पनिकः	७५
अष्टानां पदार्थानां स्वरूपम्	७६
अपोद्धृतार्थस्वरूपम्	७८
वाजप्यायनदर्शने जातिः	७८-७९
द्रव्यं पदार्थ इति पक्षो व्याडेः	८०-८१
उभयोर्मतयोर्न विरोधः	८२
शब्दार्थसम्बन्धनिरूपणाध्यायः	**८३-८८**
सम्बन्धविमर्शः, वाच्यवाचकभावः कार्यकारणभावश्च	८३
अध्यासश्च सम्बन्धः, स च तादात्म्यम्	८३
अत्र भाष्यसम्मतिः	८४
तादात्म्यविषये पक्षत्रयम्	८४
योग्यतैव सम्बन्धः	८५
असङ्ख्याः सम्बन्धाः	८५

विषयः	पृष्ठम्
समवायविमर्शः	८५
व्यावहारिकद्रव्यनिरूपणम्	८६
सर्वद्रव्यसामान्यं लक्षणम्	८६
अधिकरणशब्दो द्रव्यवाचकोऽपि	८७
व्याड्यभिमतं द्रव्यं गृह्यते	८७
अपरेषां मतेऽधिकरणमेव लौकिकद्रव्यपदेन ग्राह्यम्	८७
गुणनिरूपणाध्यायः	**८९-९६**
गुणनिरूपणम्	८९
गुणलक्षणमरुचिग्रस्तम्	९०
अपरं गुणलक्षणम्	९१
वस्तुत उभयमपि गुणलक्षणं युक्तम्	९१
अन्यद् गुणलक्षणम्	९१
नवीनमतस्यैकदेशयुक्तिता	९२-९३
तल्लक्षणस्यैकदेशयुक्तित्वाभावसमर्थनम्	९३
अष्टाध्याय्यां दिक्पदप्रयोगः, वार्त्तिके च	९४
हरिमतेन दिशः स्वरूपम्	९५
अन्तःक्षेपनीत्या दिक्समर्थनम्	९६
साधननिरूपणाध्यायः	**९७-१०४**
साधनस्वरूपम्	९७-९८
वस्तुतः सम्प्रदानापादानयोर्न कारकत्वम्	९८-९९
अत्र निष्कृष्टार्थः	९९-१००
हेतुसाधनयोर्भेदः	१०१
तादर्थ्येऽपि हेतुहेतुमद्भावः	१०१
साधनविषये मतान्तराणि	१०२
शक्तिः साधनमिति मते तासां भेदः	१०२
शक्तिः भिन्ना	१०३-१०४
क्रियानिरूपणाध्यायः	**१०५-१२२**
क्रियानिरूपणम्	१०५
क्रियाया अनुमानगम्यत्वम्	१०५
द्रव्यस्थले अवयवप्रत्यक्षत्वम्	१०५
क्रियाया अवयवस्यापि न प्रत्यक्षत्वम्	१०५
अधिश्रयणादिरपि समूहरूप एव	१०६

विषयः	पृष्ठम्
करणादिव्यापारे एव धातोर्वृत्तिर्न संप्रदानादिव्यापारे	१०६
कर्तृव्यापार एव सर्वत्र धात्वर्थः	१०६
सकलकारकानुयायिक्रिया	१०६
व्यक्तिवादेन क्रियालक्षणोऽपोद्धारपदार्थः	१०७
क्रियासमवेता जातिर्धातुवाच्या	१०७
द्वयोर्भावविकारयोः षट्सु अन्तर्भावः	१०८
सत्ताया एव साध्यत्वं साधनत्वं च	१०९
सूत्रादिषु कालसामान्यविशेषयोरुपन्यासः	११०-१११
एकादशधा कालकल्पना	११२
युक्त्या कालभेदस्वरूपम्	११२
स्वातन्त्र्यापरपर्याया कालाख्या शक्तिः	११३-११४
चिदात्मनः शक्तिः कालः	११५
विग्रहवती देवता कालः	११५
सत्त्वमेव तिरोभूतमसत्त्वम्	११५
योगिनः प्राणसञ्चारेण कालं कलयन्ति	११६
अस्य विस्तरः प्रतिमायाम्	११६
त्रयाणां पुरुषाणामाविर्भावक्रमः	११६
सङ्ख्याविचारः	११६-११७
द्वित्रादिसङ्ख्याभेदव्यवहारे कारणम्	११७
आश्रयादव्यतिरिक्ता सङ्ख्या	११७
द्रव्यसमवेता सङ्ख्याऽऽत्मनोऽपि भेदं साधयति	११८
वचनविषयको विचारः	११८
उपग्रहस्वरूपम्	११८
लिङ्गविचारः	११९
लिङ्गलक्षणम्	११९
लिङ्गव्याप्तिः	११९
गुणानामुपचयः पुंस्त्वमपचयः स्त्रीत्वम्	१२०
अवस्थाविशिष्टा गुणा लिङ्गम्	१२०
लिङ्गं शब्दसंस्कारमात्रम्	१२०
सप्त विकल्पाः	१२०
पूर्वोक्तस्य भङ्ग्यन्तरेण समर्थनम्	१२१
लिङ्गं शब्दनिष्ठम्	१२२
अर्थनिष्ठं केवलान्वयि	१२२

विषयः	पृष्ठम्
तस्य शब्दनिष्ठताखण्डनम्	१२२
भाष्योक्ता लिङ्गस्यार्थनिष्ठता	१२२
वृत्तिनिरूपणाध्यायः	**१२३-१३०**
अथ वृत्तिविचारः	१२३
चतस्र एव वृत्तयः सिद्धान्तसिद्धाः	१२३
एकशेषं विहाय तिस्र एव	१२३
पदसम्बन्धः	१२३
सनः पदविधित्वाभावः	१२४
तद्धितसमाससनाद्यन्तरूपास्तिस्रो वृत्तयः	१२४
समर्थसूत्रप्रत्याख्यानम्	१२४
एकोपस्थितिजनकतावत्समुदायस्यैव वृत्तित्वम्	१२४
महाभाष्ये परार्थाभिधानं वृत्तिः	१२५
भाष्योक्तस्य वृत्तिलक्षणस्यार्थद्वयम्	१२५
अजहत्स्वार्था वृत्तिः, जहत्स्वार्था च	१२६
भाष्ये वृत्तिविषये पक्षत्रयम्	१२७
तत्र प्रथमः पक्षः	१२७
द्वितीयः पक्षः	१२७
तृतीयः पक्षः	१२७
तृतीयपक्षे त्रयः पक्षाः	१२७
प्रथमः पक्ष एव युक्तियुक्तः	१२७
वृत्तिवर्तनवादिनां मतम्	१२८
परमनवीनानां मते वृत्तिलक्षणम्	१२८
समासवृत्तिविचारः	१२९
अव्ययीभावादिसंज्ञानामन्वर्थतादिविचारः	१२९
तत्राव्ययीभावस्यान्वर्थताविचारः	१२९
तत्पुरुषस्यान्वर्थताविचारः	१३०
कर्मधारयस्य द्विगोश्चान्वर्थताविचारः	१३०
बहुव्रीहिद्वन्द्वयोरन्वर्थताविचारः	१३०
परिशिष्टानि	**१३१-१५४**
प्रथमं परिशिष्टम्	१३१-१४६
द्वितीयं परिशिष्टम्	१४७-१४८
तृतीयं परिशिष्टम्	१४९-१५०

संक्षेपविवरणम्

(Abbreviations)

अ०प्रा०=	अथर्वप्रातिशाख्यम्
अष्टा०=	अष्टाध्यायी
अहि०सं०=	अहिर्बुध्न्यसंहिता
आपि०शि०=	आपिशलिशिक्षा
ऋ०प्रा०=	ऋक्प्रातिशाख्यम्
का०व्या०=	कातन्त्रव्याकरणम्
ता०उ०=	तापनीयोपनिषद्
तै०प्रा०=	तैत्तिरीयप्रातिशाख्यम्
निरु०=	निरुक्तम्
न्या०द०=	न्यायदर्शनम्
प०म०=	पदमञ्जरी
प०त्रिं०=	परात्रिंशिका
पा०शि०=	पाणिनीयशिक्षा
प्र०कौ०=	प्रक्रियाकौमुदी
प्राति०=	प्रातिशाख्यम्
बृ०उ०=	बृहदारण्कोपनिषद्
भू०सा०=	भूषणसारः
महा०=	महाभारतम्
महाभा०=	महाभाष्यम्
मा०पु०=	मार्कण्डेयपुराणम्
य०प्रा०=	यजुःप्रातिशाख्यम्
या०शि०=	याज्ञवल्क्यशिक्षा
यो०भा०=	योगभाष्यम्
यो०वा०=	योगवाचस्पत्यम्

यो०सू०=	योगसूत्रम्
ल०म०=	लघुमञ्जूषा
ल०शे०=	लघुशब्देन्दुशेखरः
वा०प०=	वाक्यपदीयम्
वै०भ०=	वैदिकाभरणम्
श्रीमद्भा०=	श्रीमद्भागवतम्
स०सं०=	सर्वदर्शनसंग्रहः
सां०का०=	सांख्यकारिका
सि०कौ०=	सिद्धान्तकौमुदी

❀ ❀ ❀

रामाज्ञापाण्डेयविरचिता

व्याकरणदर्शनभूमिका*

अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये ॥ १ ।
बुद्धिं योऽष्टगुणां ददाति सदयं भक्ताय सक्तात्मने
तत्प्राप्त्या चिदचिद्विभागमहितं विश्वं समुद्भासते ।
योऽन्तःस्थो बहिरेत्य योगकलया तत्त्वान्तरङ्गत्रयं
दत्त्वा पूतमनस्कतां वितनुतां नारायणः सोऽचिरात् ॥ २ ।

* अत्र हि व्याकरणदर्शनमित्यस्य कोऽर्थः ? एवं प्रश्ने तद्घटकदर्शनशब्दस्यार्थः प्रथमं निर्णीयते । अयं हि दर्शनशब्दो भावसाधनः करणसाधनश्च । तत्र भावसाधनत्वे दृष्टिरित्यर्थस्तस्यावबुध्यते । करणसाधनत्वे तु दृश्यते प्रत्यक्षीक्रियते न तु अनुमीयते नापि शब्दजन्यबोधविषयीक्रियते अनेनेति व्युत्पत्त्या दर्शनसाधनमित्यर्थः । एवं सति यैर्यैरुपायैर्दृश्यते, ते सर्वेऽपि उपाया दर्शनपदव्यपदिष्टा भवितुमर्हन्ति । भावसाधनत्वे तु—"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । मत्वा च सततं ध्येय एते दर्शनहेतवः ॥" (सांख्यप्र० भा० प्र० अ० १ सू० १) इत्युक्त्या श्रुतिवाक्यश्रवणमन्तरा यत् किञ्चिद् ग्रथ्यमानं वस्तु दर्शनमेव नहि भवितुमर्हतीति कथङ्कारं दर्शनपदव्यपदिष्टानां दर्शनपदव्यवहार्यता इति चेत्, उच्यते, सर्वेषामपि दर्शनानामुद्भावकानां चेतसि सैव भगवती श्रुतिः साक्षात् परम्परया वा स्वकीयं कार्यं विदधती वर्तत एव । तामन्तरा तस्याश्चितः प्रकाशस्य खपुष्पायमाणत्वात् । एवं च दर्शनहेतूनां दर्शकं प्रतिपादकं वा शास्त्रं लक्षणया दर्शनपदभाग् भवेदेव किमुत करणसाधनत्वे । तथा च व्याकरणमेव दर्शनमिति कर्मधारये सर्वं व्याकरणं दर्शनमेव भविष्यति । भावसाधनत्वे षष्ठीसमासे व्याकरणस्य दर्शनमित्यर्थः । तत्रापि व्याकरणपदेन व्याख्यानोपसंख्यानादिविशिष्टं शास्त्रं व्याकरणपदेन ग्राह्यम् । तस्य दर्शनमित्यत्र कर्तरि षष्ठ्या समासे शास्त्रेण यद् यद् दृश्यते, तत् सर्वमपि दर्शनमेव भवेत् । अधिकरणस्य सम्बन्धत्वेन विवक्षया षष्ठ्यन्तेन समासे तु व्याकरणशास्त्रे यत्परात्मनः तत्सम्बन्धिनो वा दर्शनस्य साधकं तदेव दर्शनं स्यात् । एवं सति उक्तासु व्युत्पत्तिषु यः कोऽपि व्याकरणसम्बन्धी विषयः, स सर्वोऽपि दर्शनपदव्यपदेश्यः सिध्यति । अस्यां स्थितौ पञ्चानां वृत्तीनामन्येषां वा प्रकृतिप्रत्ययसन्धिसमासकारकादीनां सर्वेषां दर्शनत्वे न काचिद् बाधाऽऽपतिष्यति । किञ्च येन केनापि वैयाकरणेन दृष्टो व्याकरणे पदार्थो व्याकरणदर्शनपदव्यपदेश्यो भवेत्, तथा चेदं शास्त्रं व्याकरणदर्शनं कथयितुं शक्यते ।

चतुर्दशाधिकैकोनविंशतिशततमे ख्रीस्ताब्दे डाक्टरवेनिसमहोदयैः काशिक-राजकीयसंस्कृतमहाविद्यालयाध्यक्षैर्व्याकरणदर्शनगवेषणाय नियुक्तोऽभवम् । तत आरभ्य वर्षचतुष्टयं यावदपेक्षितान् ग्रन्थांस्तया दृष्ट्या पर्यालोचयम् ।

व्याकरणदर्शनलेखनेतिहासः

अष्टादशाधिकैकोनविंशतिशततमे ख्रीस्ताब्देऽत्रत्येनाधिकारिणा 'मया सह व्याकरणदर्शनं ग्रन्थरूपे परिणतं कुरु' इति साग्रहमापृष्टः प्रत्याख्यातवांस्तदीयां वाञ्छाम् ।

तत आरभ्य बीजरूपेण मदीयायां बुद्धौ पुष्टिमासादयन्नयं विषयः परिपक्वो ग्रन्थरूपं लब्धुं व्यग्रोऽभवत् ।

भगवत्प्रेरणया युक्तप्रान्तीयशिक्षामन्त्रिणः श्रीसम्पूर्णानन्दमहोदयाः सप्तचत्वारिंशदधिकैकोनविंशतिशततमे ख्रीस्ताब्दे विहारसंस्कृतसञ्जीवनसंस्थाया विशिष्टे वार्षिकोत्सवे सभापतिपदमलङ्कुर्वाणा मया एतद्विषयस्य सम्पूर्त्यै साग्रहमनुरुद्धा लक्ष्मण-पुरमाहूतवन्तो मां वैशद्येन विषयावबोधार्थम् ।

नवीनप्रवृत्तेः पूर्वं समालोचितविषयादाधुनिकस्य महदन्तरम्

तस्मिन्नेव वत्सरे अगस्तमासे मया पुनरप्यपेक्षितविषयाणां परिपुष्ट्यै ग्रन्थास्तद्-दृष्ट्या द्रष्टुमारब्धाः । पूर्वं ये विषयाः प्रतीकरूपेणासन् गवेषिताः, ते तु साम्प्रतं न रोचन्ते मे । द्वयोराकाशपातालयोरिव तारतम्यदर्शनात् ।

इदं च व्याकरणदर्शनं पाणिनिसूत्रं कात्यायनवार्त्तिकं पातञ्जलमहाभाष्यं निरुक्तं प्रातिशाख्यं शिक्षां वाक्यपदीयं लघुमञ्जूषां च प्राधान्येनावलम्ब्य प्रावीवृतम् ।

एतस्य दर्शनस्योपक्षेपः सामयिकः

ननु सत्सु परमप्रतिभाप्राचुर्यप्रणीतेषु शाब्दिकनिबन्धेषु चर्वितचर्वणवद् व्यर्थोऽयं नव्यग्रन्थग्रथनप्रयास इति चेत् न, सुकुमारबुद्धीनां परीक्षाग्रन्थमात्राभ्यासशीलानां छात्राणां तादृशनिबन्धाध्यापनमात्रलब्धपाटवानामध्यापकानां चक्षुरुन्मीलनाय अन्य-दर्शनचर्चालब्धचातुरीकाणां शास्त्रिप्रवराणामाश्चर्यविस्फारितलोचनावस्थोत्पादक-चमत्काराय 'ग्रामं गच्छंस्तृणं स्पृशति' इति न्यायेनेषदवभासितसंशयाक्रान्तव्याकरणा-गमविषयाणामधिगतसर्वशास्त्रप्रमेयग्रामाणां पण्डितप्रवराणामेतद्विषयावबोधसौकर्याय पाश्चात्त्यविदुषां व्याकरणदर्शनीयविषयज्ञापनेन परमोपकृत्यै केवलं साधुशब्दसिद्धिरेव व्याकरणेनानुशिष्यते, न कश्चन दार्शनिकार्थविचारलेशोऽत्रास्तीति भ्रमविजृम्भिता-नामनल्पानां पण्डितकल्पानामविद्योत्सारणेन दृष्टिप्रदानाय स्वात्मनः सन्तुष्ट्यै गुरुवराणां चरणसरोरुहेषु समर्पणेन भृङ्गायमाणस्यैतस्य दर्शनस्य सम्पुष्ट्यै च प्रकृतप्रयत्नस्य साफल्यं बोध्यम् ।

अपि च महाभाष्ये विप्रकीर्णस्य मूलरूपेण तैरोहित्यच्छलेन विन्यस्तस्य वाक्यपदीये प्राञ्जलतया समुपपादितस्यापि प्रकृतप्रमेयस्य प्रतीकादिप्रदर्शनपरम्परया बीजव्यञ्जनाय पिण्डीभावेनाभीष्टोपहारीकरणाय चास्योद्योगस्य साफल्यमवधेयम् ।

माधवाचार्येण पाणिनिदर्शनं न सम्यगुपन्यस्तम्

यद्यपि च माधवाचार्येण सर्वदर्शनसंग्रहे[1] पाणिनिदर्शनमप्यन्यतमत्वेन न्यबन्धि; तथापि तत्र नैव कोऽप्यर्थो यथावन्निरूपितो येन प्रेक्षावतां जिज्ञासूनां लब्धपरम्परोत्कलिका शाम्येत् ।

लघुमञ्जूषादिना च नास्य गतार्थता

लघुमञ्जुषायां नागेशभट्टोऽपि बहून् विषयानधिकृत्य माधवाचार्यापेक्षयोत्तमां कोटिं नीत्वा तान् व्याख्यत्, परं तदपि नैव तादृशं प्रमोदास्पदमारोहति दर्शनान्तरीयसंस्कारेण लब्धसांकर्यतया स्वीयविषयाणां गह्वरान्धकारव्याप्तगुहायामिवोपलब्धेर्दूरापास्तत्वात् । वाक्यपदीयस्य चातिजटिलतयाऽशुद्धिबाहुल्येन च विषयावबोधनाक्षमत्वान्नैव विशुद्धतया स्वान्तामोदजनकत्वम् ।

व्याकरणस्वरूपम्

ननु किमिदं व्याकरणदर्शनं नाम ? किमस्य स्वरूपम् ? कश्चान्यैर्दर्शनैरस्य सम्बन्धः ? कश्च विषयः ? किं च फलम् ? कश्च सम्बन्धः ? को वाधिकारीति चिन्तायामुच्यते ।

परा-पश्यन्ती-मध्यमा-वैखरीतिभेदचतुष्टयेनाक्रान्तस्वरूपाश्चतस्रो वाचः सर्वत्रैव निगमागमादिषु समुपलभ्यन्ते । एतासामेव क्वचिद् व्याकृताव्याकृतेति भेदद्वयेन व्यवहारः । तत्र व्याकृतापदेन पश्यन्त्यादित्रय्याः, अव्याकृताशब्देन च शक्तिशक्तिमदादिभेदशून्यायाः पराया विचारो वेदेषु चर्चितः । तथा चैकैव परा[2] वाणी व्याकृताऽव्याकृतारूपभेदेन द्वेधा विभज्यते—**'नामरूपे व्याकरवाणि'**,[3] **'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते'** इति ।

---

१. तत्र पाणिनिदर्शने प्रथमं तत्प्रयोजनाद्युपन्यासः, ततः स्फोटस्य साधनम्, ततः सत्तायाः स्वरूपम्, ततो द्रव्यं पदार्थः, ततो जातिः, ततः शब्दानुशासनस्य निःश्रेयससाधनत्वप्रतिपादनम्, एतावदेव पाणिनिदर्शनं माधवाचार्येण निबद्धम् । नहि तावता व्याकरणस्य कोऽप्यंशस्तेनोपस्थितः ।

२. सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमनभिष्यन्दमानाम् ।
उतान्ये विदुरन्यामिव च पूतां नानारूपामात्मनि सन्निविष्टाम् ॥
(वा० प० १।१, टीकायाम्)

३. छा० उ० ६।३।२ ।

'एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यान् दिव इति पितॄंस्तिरः पवित्रमिति ग्रहानशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभगेत्यन्याः प्रजाः'[१], 'स मनसा वाचं मिथुनं समभवत्'[२] 'वागेव विश्वा भुवनानि'[३], 'वाग् वै ब्रह्म'[४], 'परावाचा तथाष्टमे'[५] इत्यादिश्रुतिभिः भूरादिमहाव्याहृत्युच्चारणपूर्वकतत्तत्सृष्टिप्रतिपादनपरैस्तत्रत्यैः कथानकैः ।

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[६] ॥

इत्यादिस्मृतिभिश्च वाक्पूर्विकैव सृष्टिरवगम्यते । तत्र वाक्पदेन पश्यन्ती एव ग्राह्या, तस्या एव ओंकारो वेदः शब्दब्रह्मेत्यादिनामान्तराणि । तथा चोक्तम्—

आपः[७] पवित्रं परमं पृथिव्या अद्भ्यः पवित्रं परमं हि मन्त्राः ।
तेषां च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः[८] ॥

अत्र जलापेक्षया सामर्ग्यजुर्लक्षणानां मन्त्राणां पावित्र्योक्त्या ततोऽपि पावनत्वम् ओङ्कारस्यैवाङ्गीकर्त्तव्यम् । तथा च स्पष्टमेव व्याकरणोंकारयोः पर्यायता लभ्यते । एतच्च वाक्यपदीये बहुषु स्थलेषु स्पष्टमिति विस्तरभयान्नाधिकमिहोच्यते ।

---

१. शा० भा० १।३।८ । २. बृ० उ० १।२।४ । ३. वा० प० १।१२१ (टीकायाम्) ।
४. बृ० उ० ४।१।२ । ५. एतत्सर्वमथर्वशीर्षोपनिषदि सम्यक्प्रपञ्चितम् ।
६. म० भा० शा० प० २५३ ।
७. अस्यार्थः—पृथिव्या आपः पवित्रम्, अद्भ्यश्च ऋग्यजुःसामलक्षणा मन्त्राः पवित्रम्, ततोऽप्योंकारापरपर्यायं व्याकरणमिति ।

परन्त्वयमर्थः सम्यक् स्वान्ते नावतरति, पञ्चानां भूतानां मध्ये द्वयोः क्रमेण पवित्र्योक्त्याऽवशिष्टानामपि क्रमोक्तेरत्याज्यत्वादिति—"ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायो सामवेद आदित्यात्" (ऐतरेयब्रा० ५-३२), "अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् । दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥" (मनु० अ० १ श्लो० २३) इत्यादिश्रुतिस्मृतिभिरग्निवायुरविभ्य ऋग्यजुःसामोत्पत्तिश्रवणेन कार्यकारणयोरभेदोपचारेणर्ग्यजुःसामपदेन तत्कारणीभूतं भूतत्रयं गृह्यते । न च रवेरेव सामोत्पत्तिश्रुत्या आद्यभूताकाशस्य कारणत्वाभावादभेदोपचारेण कथं पूर्वसंशयापनोदनमिति वाच्यम्, रविपदेनाकाशस्यापि ग्रहणादत एव रौति शब्दं करोतीति व्युत्पत्त्या शब्दाश्रयत्वमेव तस्य प्रवृत्तिनिमित्तम् ।

वस्तुतस्तु रव्याकाशप्रकाशसूर्यादित्यादयः शब्दाः पर्याया एवासन् । आकाशते प्रकाशते इति मूलव्युत्पत्त्यनुरोधात् शब्दस्य ज्योतीरूपत्वस्य 'आख्यातोपयोगे' (पा० सू० १।४।२९) इति सूत्रभाष्यसम्मतत्वेन ज्योतिःशब्दयोरभेदेन तदाश्रयत्वस्याप्यभेदाच्च ।

८. वा० प० १।१४—टीकायाम् ।

प्रकृतिप्रत्यययोर्वास्तविकं रूपम्

तत्रैतामेव वाचमवधीकृत्य प्रकृतिप्रत्ययादिविभागः[1] प्रारभ्यते। अत्र प्रकृतिपदेन माता, प्रत्ययपदेन च पिता गृह्यते। तथा च वक्ष्यमाणयुक्तिप्रामाण्यात् प्रकृतिप्रत्ययौ शक्तिशक्तिमन्तौ, चिज्जडौ, वाच्यवाचकौ शब्दार्थौ नामरूपे पश्यन्तीप्रतिभाप्रणवेत्यादयः शब्दा व्याकरणापरपर्याया एव। एतच्चान्ते स्फोटविचारे यथावसरं स्फुटीभविष्यदपि संक्षेपेणेह किञ्चिदुच्यते।

मातृरूपायां प्रकृतौ पितृस्थानीयस्य प्रत्ययस्य संसर्गमन्तरा अर्थप्रत्यायन-सामर्थ्याभावादसाधुत्वाच्च—'**न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः**'[2] इति न्यायेन केवलायाः प्रकृतेर्नैव व्यवहारसाधकत्वम्। एतस्य मूलतत्त्वं तु पश्यन्त्यामेवावतिष्ठते। तत्रैव सर्वेषां प्रत्ययानां सर्वासां प्रकृतीनां च सम्भूतिस्थानम्। अर्थात् तस्या एव पश्यन्त्या रूपद्वयं चकास्ति व्याकरणागमसंस्कारसंस्कृतचेतसां विदुषाम्। एकं प्रकृतिरूपमुपादानकारणम्, अपरञ्च प्रत्ययरूपं निमित्तकारणम्।

अर्थपरम्परापि तत्रानुस्यूता

इदं च परम्पराद्वयं पश्यन्तीमेव कामधेनुमाश्रित्य प्रवर्तते। तत्रैका प्रकृतिपरम्परा, अपरा च प्रत्ययपरम्परा। एतयोश्च परम्परयोरर्थपरम्पराऽप्यनुस्यूतैव व्यवतिष्ठते, शब्दार्थसम्बन्धस्य नित्यत्वात्। तथा चान्यतरस्य कारणस्याभावे नैव बीजरूपेण स्थितस्याप्यर्थस्याभिव्यङ्ग्यत्वं सम्भवति।

---

१. 'जनिकर्तुः प्रकृतिः' (पा० सू० १।४।३०) इति सूत्रभाष्यादिपर्यालोचनया प्रकृतिपदेनोपादानकरणम्। "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" (योग० पा० १ सू० १०) इति योगसूत्रस्थवाचस्पत्येन प्रत्ययपदेन निमित्तकारणं गृह्यते। तथा चोक्तम्—"त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षराऽस्वरा" इति प्राधानिकरहस्ये श्लो० २२।

भारतप्रामाण्याच्चास्या गोरूपत्वमुक्तं वाक्यपदीयटीकायाम्—

(क) गौरिव प्रचरत्येका रसमुत्तमशालिनी।
दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता॥ इति।

(ख) स्वरूपज्योतिरेवान्तः परा वागनपायिनी*।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते॥ इति। (वाक्य० १।१४३)

अपि च प्रकृतिशब्देन प्रधानं सत्त्वरजस्तमोरूपम्, प्रत्ययपदेन ज्ञानं पुरुषो वा। अत एव 'नहि केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः' इति प्रवादोऽप्येतन्मूलक एव मन्तव्यः। यावता हि प्रत्ययस्य ज्ञानस्य सान्निध्येन प्रकृतौ कश्चन क्षोभः सञ्जायते, अयस्कान्तसन्निहिते लौह इव, अतो द्वयोः पृथग्भावो न युक्तिसङ्गतः (स्वोपज्ञटीका)।

२. महाभाष्यम्—१।२।६४।

---

* 'सूक्ष्मा' इति च पाठः।

पराया व्यवहारातीतत्वम्

परायां वाचि तु नैव कश्चन विचारलेशोऽपि सम्भावनास्पदमारोहति, दृष्टस्वरूपायां तस्यामधिकारनिवृत्तेरुपदेशात्। तस्याश्च द्वैतत्वे तद्वैयर्थ्यापत्तेरद्वैतज्ञानेनैवाविद्यानिवृत्तेर्निर्णीतत्वात्।

पश्यन्त्यामेव शक्तिशक्तिमतोश्चर्चा कालाख्या स्वातन्त्र्यशक्तिस्तत्रैव

एवं च पश्यन्त्यामेव शक्तिशक्तिमतोश्चर्चा। तस्या एव कालाख्या स्वातन्त्र्यशक्तिः, या ह्यन्यासां शक्तीनां स्फोरणे प्रभवति; अविद्यादयः शक्तयोऽपि तद्विजृम्भितमित्युपरिष्टात् प्रकटीभविष्यति। वाच्यवाचकविभागोऽपि तस्यामेव व्यवह्रियते, तत्रैव समापन्नस्य योगिनः 'सर्वे सर्वार्थवाचकाः' इति ज्ञानमुत्पद्यते, तस्या एव पश्यन्तीरूपेण सर्वशब्दबीजत्वात्, प्रतिभारूपेण च सकलार्थप्रसवत्वाच्च। तदवस्थायां वैयाकरणानां निखिलार्थसमुत्पादनसामर्थ्यमभिव्यज्यते[1]। एतत्प्रकाशेनैवान्ये प्रकाशाः प्रकाशन्ते, तयोर्द्वयोरग्निसूर्ययोः स्वप्रकाशने सामर्थ्याभावात्। तथा चास्माकं मते जातवेदसोऽपि न स्वतः प्रकाशकत्वम्, किन्तु एतत्पारतन्त्र्येणेति स्वप्रकाश्यत्वे तेजोदृष्टान्तस्य गतिर्व्यावहारिकदृष्ट्यैव समर्थनीया।

वस्तुतस्तु जातं वेदो ज्ञानं यस्मादसौ जातवेदा इति व्युत्पत्त्या जातवेदःशब्दोऽपि मुख्यया वृत्त्या ज्ञानमूलागारे परमात्मन्येव वर्तते। अग्नौ तत्प्रयोगस्तु—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं मित्रं मातरिश्वानमाहुः॥[2]

इति मन्त्रे अग्न्यादिशब्दानां परमात्मपरकत्वस्य व्यवस्थापितत्वात् समर्थनीयः।

---

१. अत एव—

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः।
भवन्ति लीलाविधयश्च वैदिकास्त्वदीयगम्भीरमनोऽनुसारिणः॥

—(स्तोत्ररत्नम्, यतिवरश्रीयामुनाचार्यप्रणीतम्, श्लो० २०) इत्यत्रापि यतिवरैर्भक्तानां सृष्ट्यादिकरणसामर्थ्यं समुज्जृम्भत इत्युक्तम्।

अत्रायं निष्कर्षः—गुरूपदेशपद्धत्या समाहितमनसा स्थितं योगिनं "यमेवैष वृणुते" (यजु० ४०।४) इति रीत्या ज्ञानागारात्परमात्मन आयान्तो ज्ञानरश्मयः "ज्योतिर्वज्ज्ञानानि भवन्ति" (भाष्यम्० १।४।२४) इति पतञ्जलिप्रोक्तसिद्धान्तानुसारं ज्योतिःस्वरूपास्ते परमात्मानं नयन्ति। तत्र स्थितश्च योगी विश्वदर्शनसामर्थ्यसम्पन्नः सञ्जायते।

इममर्थम् "उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्" (यजु० ७।४१) इति श्रुतिः परिपुष्णाति। उद्वहन्ति—समाधापयन्ति।

वस्तुतस्तु कृतोद्वाहमुमापतिम् (वा०रा०का० १ स० २३ श्लो०११) इति पाठे उद्वाहशब्दो विवाहार्थक एव मन्तव्यः; परन्तु अन्यत्र उद्वाहशब्दस्य समाध्यर्थकत्वेन न काचिदापत्तिः।

२. ऋ० सं० १।१६४।४६।

प्रतिभापश्यन्त्योर्विभाग ऐक्यं च

यद्यप्यर्थदृष्ट्या प्रतिभायाः शब्ददृष्ट्या पश्यन्त्या उपयोगेन त्रयोर्भेदः प्रतीयते, तथापि शब्दार्थयोस्तादात्म्यस्वीकारान्नैव कश्चन प्रतिभापश्यन्त्योर्भेदोऽङ्गीकार्यः[१]। अत एव व्यवहारेऽर्थकोटौ प्रतिभापदेन पश्यन्त्या अपि बोधो निर्बाध एव। नामरूपे व्याकरवाणीति श्रुत्या नामरूपयोर्व्याकृत्यवस्थायामेव विभागो न तु ततः प्राक् तयोः कश्चन भेदः समवगम्यते। तत्र च नामपदेन शब्दो रूपपदेन च जातिलक्षणो द्रव्यलक्षणो वाऽर्थो बोद्धव्यः। स च वस्तुतो बौद्धः, बाह्यस्य तस्य स्वीकारे तन्नाशदशायां द्वयोः सम्बन्धस्यानित्यत्वप्रसङ्गात्। तेषां च नित्यत्वस्य **'सिद्धे शब्दार्थसम्बन्धे'**[२] इत्यनेन कात्यायनेनैव निर्धारितत्वात्। तयोश्च न कोऽपि भेद इत्युपरिष्टात् टिप्पण्यां द्रष्टव्यम्।

प्रणवपदेनापि पश्यन्ती ग्राह्या

प्रणवपदेनापि सैव ग्राह्या, तस्या एव शब्दोऽर्थः सम्बन्ध इति रूपत्रयेण भानम्। तथा चोक्तम्—**'एकमेवाद्वितीयम्'**[३], **'प्रणव एवैकस्त्रिधाऽभिव्यज्यते'**[४], **'एकमेवयदाम्नातं भिन्नं शक्तिव्यपाश्रयात्'**[५] इति श्लोकटीकायां हरिणा।

एवं च पश्यन्तीरूपव्याकरणज्ञानमन्तरा पराख्यब्रह्माधिगतिः कल्पकोटिशतैरप्यन्यैरुपायैर्दुर्लभैवेति सुगमोऽयं पन्थाः समवलम्ब्यतां वास्तविकीं मुक्तिमभीप्सुभिस्तत्त्वज्ञानकुशलैर्विद्वत्प्रवरैः।

अस्य च प्रणववादस्य सर्ववेदपारिषदत्वमत एव सर्ववादाऽविरोधित्वं च स्पष्टमेव वाक्यपदीये **'सत्या विशुद्धिः'**[६] इत्यादिना व्यवस्थापितम्। एतस्मादेव प्रणवाऽपरपर्यायाद् व्याकरणाद् भूतभाव्यन्ताः साङ्गोपाङ्गस्मृतिश्रुत्यन्ता विद्याविभागाः प्रभवन्ति। सर्वं च स्थूलं सूक्ष्मं जगत्तस्यैव विवर्तः परिणामो वा। अत एव—**'स हि सर्वशब्दार्थप्रकृतिः'**[७] इत्यादिना विधातुरित्यादिश्लोकव्याख्यायां हरिणा तस्य सर्वमूलत्वं सम्यङ् निर्णीतमिति विशेषजिज्ञासुभिस्तत एवावधार्यम्।

वैयाकरणशिष्टयोरैक्यम्

तथा चेदमेव मुख्यं व्याकरणशब्दवाच्यम्। तज्ज्ञानेनैव सर्वेषां साधुशब्दानां ज्ञानं निष्पद्यते इति—'पृषोदरादीनि यथोपदिष्टम्'[८] इति सूत्रे भगवता पतञ्जलिना ध्वनितम्। शिष्टवैयाकरणयोः पर्यायत्वं च स्पष्टीकृतम्। 'एषामेव शिष्टानां वचांसि प्रत्यक्षमपि प्रमाणमतिशेरते वेदवत् प्रामाण्यं चावहन्ति। अत एव शिष्टा मन्वाद्यपेक्षयापि प्रामाणिकत्वमारोहन्ति।

---

१. इयं प्रतिभा परायाः प्रकृतेरुत्पद्यते महत्तत्वतः पूर्वम्।

२. महाभाष्यम्–पस्पशाह्निकम्–पृ० ६। ३. छा० उ० ६।२।१। ४. वा० प० १।२।

५. वा० प० १।२। ६. तदेव–१।९।

७. वा० प० १।१०। ८. अष्टाध्यायी–६।३।१०९।

एतच्च **'न हि मन्वादयो महर्षयो न हि सर्वज्ञा वीतरागा वा', 'ज्ञानमस्मद्विशिष्टानाम्'** इत्यादिना ।[1] वाक्यपदीयकारिकाव्याख्यायां हेलाराजेन सिद्धान्तितम् । अयं चैकज्ञानेन सर्वज्ञानपक्ष आङ्ग्लभाषायां 'डिडक्टिव्' पदेन व्यवह्रियते ।

परमेतादृशपुरुषधौरेयस्य कल्पपादपसमत्वादाधुनिकसमये दुर्लभत्वेन लोकम्पृणत्वाऽसम्भवं समालोच्य परमकारुणिकेन भगवता दाक्षीपुत्रेणाष्टाध्यायीलक्षणं व्याकरणशास्त्रं सर्ववेदपारिषदं निरमायि । प्रातिशाख्यं तु तत्तच्छाखीयानां कृते तत्तन्महर्षिभिः प्रणीतम् ।

अपोद्धारपदार्थः

तच्च लोकप्रसिद्धपदार्थस्वरूपानुकूल्येन लौकिकानां वैदिकानां च शब्दानां साधुत्वाऽसाधुत्वे प्रतिपादयतीत्यखण्डाद् वाक्यार्थादपोद्धारपदार्थः प्रविभज्य व्याख्यातः[2] ।

१. वा० प० जातिस० ३।४६ ।

२. "अथ वर्णसमाम्नायः" इति सूत्रभाष्ये वैदिकाभरणे प्रातिशाख्यविषये यदुक्तं तत्रत्योऽयं सारोऽर्थः । तत्र हि शिक्षाव्याकरणेषु तु सर्वमुक्तमेवेति व्यर्थोऽयं प्रातिशाख्यप्रणयनप्रयास इति शङ्कायां सर्ववेदसाधारणानि लोकवेदसाधारणानि च कार्याणि तत्रोपन्यस्तानि सन्ति । यथा शिक्षायाम्—**"अष्टषष्टिं वदन्त्येके चतुःषष्टिमथापरे"** इति ।

"बहुलं छन्दसि" (सू० २।४।३६), **"व्यत्ययो बहुलम्"** (सू० ३।१।८५), **"दृष्टानुविधिश्छन्दसि"** [१।१।५] इत्यादौ कार्यस्वरूपमपि दुर्ग्रहं किमुत विषयविभागः । यद्यप्यविगीतशिक्षानुसारेण केषाञ्चिद् विधीनां शक्यो विषयविभागः प्रतिभाति, तथाप्यसौ न सर्वेषां शक्यः ।

अपि च अद्यत्वे नियमातिक्रमाद् ऋषयो न जायन्ते । इत्यनृषीणां कृतेऽवश्यं किञ्चिद् व्यवस्थापनीयम्, इत्यालोच्य परमकारुणिका महर्षयः प्रातिशाख्यम् व्यवस्थितानां शिक्षाव्याकरणोपदिष्टकार्याणां विस्पष्टोपदेशानि लक्षणानि प्रणयन्ति स्म, तन्नान्तरीयकतया तु तत्र तत्र स्पष्टोपदिष्टान्यपि कार्याण्यनुवर्ण्यन्ते । तानि प्रातिशाख्यानीत्याख्यायन्ते ।

इदमत्रावधेयम्—शिक्षा नाम षडङ्गेष्वेकाङ्गीभूता । तथा च साधुत्वान्वाख्यायके व्याकरणे किं प्रयोजनम् ? कथं वा सा व्याकरणाङ्गभूतेति प्रश्न उदेति । किं च भगवतः पतञ्जलेः—"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति, प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति, पुराकाल एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते" (महाभाष्य पस्प०) इत्याद्युक्त्या व्याकरणस्यैव सर्वतः प्रथममध्ययनं सिध्यति, न तु शिक्षाया इति चेदुच्यते; यद्यपि कण्ठरवेण भगवता पतञ्जलिना शिक्षायाः सर्वतः प्रथममध्ययनं नोदाहारि, तथापि साधुत्वान्वाख्यानं शिक्षाज्ञानमन्तरा सर्वथाऽसम्भवि ।

यथास्थानप्रयत्नोच्चारितशब्दघटितवाक्यानामेव प्रयोगस्य पुण्यजनकत्वात्, शिक्षायामेव यथावत् स्थानप्रयत्नादीनां स्वरूपप्रदर्शनात् । "संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते" इत्यस्य नेदं तात्पर्यम्, यत्ते शिक्षामनधीत्यैव व्याकरणमध्यैषत, किन्तु "वेद-

मुख्यं प्रयोजनम्, साधूनामेव वाचकत्वं च

एतेषां च शब्दानां यथावज्ज्ञानपूर्वके प्रयोगे **'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'**[1] इति श्रुत्या कामप्रपूर्त्तिरवगम्यते। तथा चैकस्यापि शब्दस्य सम्यग् ज्ञानपूर्वकमर्थेन सह सम्बन्धस्य साक्षात्कारे तदर्थोत्पादनसामर्थ्यमाविर्भवति शुद्धान्तःकरणानां महात्मनाम्।

एवमेव सर्वेषामर्थानां सम्यक् सम्बन्धज्ञाने सर्वार्थवाचकत्वं योगिदृष्ट्याऽव्याहतमिति विशेषतो वाक्यपदीये द्रष्टव्यम्। तच्च सर्वार्थवाचकत्वं साधुशब्दानामेवेत्यर्थेन तादात्म्यमपि तेषामेवाङ्गीकर्त्तव्यम्। यद्यपि च व्यवहारेऽर्थवाचकत्वमपभ्रंशानामपि दृश्यते, तथापि भ्रान्तिमूलकत्वेन तस्यावास्तवत्वमेवाङ्गीकर्तव्यम्। एतदेव मनसि निधाय पदमञ्जर्यां[1] हरदत्तमिश्रेणापि साधूनामेव वाचकत्वं व्यवस्थापितम्। न ह्यपभ्रंशैरर्थस्य तादात्म्यं येन तज्ज्ञानं साधु निष्पद्येत। पुराकल्पे त्वपभ्रंशैरसंकीर्णा वागासीदिति न तदानीमेतादृशव्याकरणनिर्माणमावश्यकमभूत्।

अनृतद्वैविध्यम्

एतेन पूर्वे व्यवहर्तारोऽन्यार्थबोधनेच्छया लोकान् वञ्चयितुमन्यं तदर्थाऽसम्बद्धं शब्दं प्रायुञ्जत। तेन च शब्दार्थसंबन्धत्यागात्तदर्थबोधनाक्षमत्वाद्वाचामनृतविप्रलम्भादिदोषसंकीर्णत्वमित्यनृतापभ्रंशयोरेकयोगक्षेमत्वादधुनाप्यर्थबोधनेच्छयाऽपभ्रंशशब्दप्रयोगे तत्प्रयोक्तॄणामनृतवादित्वं सुस्पष्टमेव प्रतीयत इति। **"नानृतं वदेत्"**[2] इति

मधीत्य त्वरिता वक्तारो भवन्ति" (भा० पस्प० पृ० ५ पं० ९) इत्युक्त्या वेदाध्ययनान्तरीयकत्वमेव तस्या अनुमीयते। वेदाध्ययनार्थं यथास्थानप्रयत्नं वर्णोच्चारणशैलीशिक्षणस्यागतिकगतित्वात्।

अपि च "पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं वाक्यलक्षणाया वाचोऽर्थलक्षणम्" (न्यायभाष्यम्–१।१।५५) इत्यभियुक्तोक्त्या द्वयोरन्वाख्यायकयोर्मूलभूतवर्णान्वाख्यानं प्राथमिकमेव मन्तव्यम्। अतः शिक्षाज्ञानं सर्वेषां कृतेऽत्यन्तावश्यकमिति सर्वतः प्रथमं शिक्षाज्ञानमपेक्ष्यत इति सुधीभिर्विचार्यम्।

> ....प्रथमाः शब्दाः साधवः परिकीर्त्तिताः।
> त एव शक्तिवैकल्यप्रमादालसतादिभिः॥
> अन्यथोच्चारिताः पुंभिरपशब्दा इतीरिताः।
> स्मारयन्तश्च ते साधूनर्थधीहेतवः स्मृताः॥

यद्यपि लोके गवादयो गाव्यादयश्च सममेव प्रयुज्यन्ते वाचकत्वाभिमानोऽपि सम एव तेषु लौकिकानां साधीयान् इत्यादिषु, तथापि गवादयोऽनादयः साधवस्त एव साक्षाद् वाचकाः (पदमञ्जरी १।१।७)।

१. महाभाष्यम्—६।१।४८। २. शब्रा० २।२।२।२०।

निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं तेषां सिध्यत्येव । **'यथार्थं वाङ्मनसे यथादृष्टं यथानुमितं यथाश्रुतं तथा वाङ्मनश्चेति परत्र स्वबोधसंक्रान्तये वागुक्ता, सा यदि न वञ्चिता भ्रान्ता प्रतिपत्तिबन्ध्या वा भवेत्'**[1] इति योगभाष्येणापि अपभ्रंशस्याप्यनृतत्वमेव निश्चीयते ।

अपभ्रंशप्रादुर्भावः

एवमेव वक्तृवैगुण्यप्रयुक्तमप्यपभ्रंशत्वं कियतां शब्दानां वाक्यपदीये निर्णीतम् । तच्च दैव्या वाचः संकीर्णत्वमशक्ताऽभिधातृदोषप्रयुक्तमेव । सा चाशक्तिर्द्विविधा—अज्ञानाद् विप्रलम्भादिदोषाद्वाऽन्यार्थेऽन्यशब्दप्रयोगरूपा एका, अभिमतवायुसंयोगोत्पादनासामर्थ्यरूपा च द्वितीया । एतेनापभ्रंशद्वैविध्यमपि व्याख्यातम् । तथा चासाध्वपभ्रंशशब्दयोः पर्यायतैवेति सर्वं सुस्थम् ।

शब्दसाधुत्वज्ञानपूर्वकयोगाभ्यासेनाभ्युदयः

एतादृशसाधुत्वप्रतिपादनपरेऽस्मिन् शब्दानुशासने प्राप्तपाटवा महात्मानोऽपभ्रंशाऽसंकीर्णशब्दतत्त्वाभ्यासात् शब्दपूर्वकं योगमधिगम्य अर्थप्रणाल्या प्रतिभां शब्दप्रणाल्या पश्यन्त्यपराभिधां शक्तिं (सत्ताम्) सम्यगवबुध्याभ्युदयेन युज्यन्ते ।

पाणिनेः शिष्टत्वविचारः

यद्यपि च भगवतः पाणिनेस्तादृशशिष्टमध्ये[2] गणनाऽस्ति न वेति निश्चेतुं न पार्यते, तथापि स पूर्वाचार्यैः स्वयं च दृष्टान् साधून् शब्दानभिलक्ष्याष्टाध्याय्यां सूत्रद्वाराऽन्वशिषत् । तदनुयायिनश्चापरे कात्यायनप्रभृतयस्तेषां ज्ञानपूर्वके प्रयोगे धर्ममुपदिदिशुः । परन्तु—

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः ।

इत्यारभ्य

तस्मादकृतकं शास्त्रं स्मृतिं वा सनिबन्धनाम् ।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ॥

---

१. योगसूत्रभाष्यम्—२।३० ।

२. **'अदूरभवश्च'** (४।२।७०) इति सूत्रे भाष्ये एकस्मिन् योगेऽनुवृत्तिर्भवति न वेति विचारणायाम्, एकयोगेऽप्यनुवृत्तिर्भवतीति प्रतिज्ञाय **'तदस्यास्त्यस्मिन्निति मतुप्'** (५।२।९४) इति सूत्रे द्विस्तच्छब्दग्रहणाभावेन प्रतिज्ञातमर्थमसाधयद् भगवान् पतञ्जलिः । तथा सति कथं **'तदधीते तद्वेद'** (४।५।५९) इत्यत्र द्विस्तच्छब्दग्रहणमिति शङ्क्यते ? **"प्रमादकृतमाचार्यस्य शक्यमकर्तुम्"** इत्युक्त्या न हि प्रमादराहित्यं भगवतः पाणिनेरायाति ।

इत्यन्तस्य वाक्यपदीयग्रन्थस्य समालोचनया पाणिनेरभ्रान्तत्वं संप्रदायपारम्पर्येणापभ्रंशाऽनाक्रान्तसाधुशब्दानुशासकत्वं चाऽवगम्यते। अत्रत्यं तत्त्वं विचारयन्तु गवेषकप्रवरा विद्वांसः[1]।

तथा चानादिपरम्परयाऽपभ्रंशैरसंकीर्णानां शब्दानामिदमन्वाख्यानं पाणिनीयं व्याकरणं सर्ववेदपारिषदं वेदितव्यम्।

एवं च कल्पितप्रत्ययवयवसंस्कारमात्रोद्देश्यस्यास्य शब्दब्रह्मणः स्वरूपं यथावन्निर्णीतम्, एतस्यावान्तरविषयविस्तरस्तु यथावसरमुपरिष्टात् करिष्यत इति तत एवावधार्यम्।

अपि च न केवलं पारमार्थिकस्यैव व्याकरणस्वरूपस्य साक्षात्कारेणाभ्युदयः, किन्तु आविद्यिकस्याऽप्येतस्याष्टाध्यायीलक्षणस्य व्याकरणस्य सम्यगवबोधे महताऽभ्युदयेन योगो भवति। तथा चात्र शास्त्रफलयोः साध्यसाधकभावः सम्बन्धः सुस्पष्ट एव। तथा चोक्तं वाक्यपदीये—

तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते[2]॥ इति।

विशेषसामान्यभेदेन साधुत्वं द्विविधम्

ते च साधवः शब्दा द्विविधा विशिष्टसाधुत्वकाः, सामान्यसाधुत्वकाश्च। तत्र विशिष्टानां प्रयोगे विशिष्टं फलमुत्पद्यते, सामान्यानां तु सामान्यमिति नियमः। एतेन—

नाकमिष्टसुखं यान्ति चतुर्भिर्वाडवै रथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः[3]॥

इति भाष्यस्थश्लोकोऽपि सङ्गच्छते।

दर्शनान्तरापेक्षयाऽस्य विशेषः

एवमनेकरूपभेदभिन्नं व्याकरणं सम्यगनवबुध्यमाना बहवो लौकिकाः शास्त्रसंस्कारमतयोऽपि नैव व्याकरणे कश्चनाध्यात्मविचारलेशोऽस्ति, ऋते प्रयोगसाधुत्वमिति वदन्ति। तच्च न युक्तम्, पूर्वोक्तयुक्तेर्वक्ष्यमाणग्रन्थपर्यालोचनाच्च।

ननु सत्सु अन्येषु आध्यात्मिकविचारपरेषु शास्त्रेषु व्यर्थमिदं व्याकरणदर्शनमिति चेत्, न एतस्यैहिकामुष्मिकोभयफलप्रसाधकत्वेन तेषां चैहिकफलोत्पादनसामर्थ्यविरहेणैतत्साफल्यस्य मन्दबुद्धेरपि सुप्रत्यक्षत्वात्।

---

१. एतेन शिष्टमध्ये पाणिनेर्गणनेत्यायाति। परन्तु टिप्पण्यां प्रदर्शितेन भाष्यसन्दर्भेण तु न तथेति चेन्न, शब्दानां साधुत्वप्रतिपादनविषय एव शिष्टत्वस्याभ्युपगमात्। सूत्रप्रणयनविषये लाघवगौरवचर्चाप्रयुक्तप्रमादस्याकिञ्चित्करत्वात्।

२. वा० प० १।१३२। ३. महाभाष्यम्—३।१।४८।

अर्थप्राधान्यमाश्रित्य न्यायवैशेषिकयोः प्रवृत्तिः

अपि च शब्दार्थज्ञानानां मध्येऽर्थमेव प्रधानीकृत्य वैशेषिकदर्शने पदार्थस्वरूपज्ञानेन निःश्रेयसाधिगमो भगवता कणादेन समुपपादि। भगवान् गौतमस्तु वैशेषिकाभिमतान् पदार्थानाश्रित्य तदानीन्तनविप्रतिपन्नोक्तिनिराकरणपुरःसरं प्रतिवादिदिग्गजान् पराजिगीषुः पिठरपाकाद्यनेकाऽवान्तरभेदविलसितं वादाद्युपयोगिप्रक्रियाजटिलं पञ्चाध्यायीलक्षणं न्यायदर्शनं निर्बबन्ध[1]।

ज्ञानप्राधान्येनान्येषां दर्शनानामवतरः

ज्ञानमेव मूलतत्त्वमधिकृत्य सांख्ययोगवेदान्तशास्त्रेषु तत्तन्महर्षिभिः प्रक्रियाभेदेन परमपुरुषार्थतया प्रस्थानभेदाः समाम्नाताः।

व्याकरणतन्त्रयोस्तु शब्दब्रह्मैव प्रधानं तत्त्वं समाश्रित्य तदुपयोगिपदार्थविभागसमुद्भासितानि निगमागममूलकानि बहूनि ग्रन्थरत्नानि समधिगतयाथातथ्यैः शिष्टैः प्रणीतानि सन्ति। परं तन्त्रागमे शक्तिशक्तिमतोर्मध्ये शक्तेरेव प्राधान्यं व्यवस्थाप्य निखिलसाधनप्रक्रिया निर्वाह्यते। व्याकरणागमे तु जन्मादिमयीभिः शक्तिभिरुपचरितनानात्वामविद्यापरपर्यायां कालाख्यां स्वातन्त्र्यशक्तिं गौणीकृत्य प्राधान्येन शब्दब्रह्मविचारः कृत इति सर्वदर्शनैरस्य बहूनां विषयाणां समानत्वेऽपि अन्यदर्शनापेक्षयाऽयमप्यत्र विशेषः। अन्ये च बहवो विशेषा यथावसरमुपरि स्फुटीभविष्यन्ति विस्तरभयान्नेह ते तन्यन्ते।

द्वयोरवस्थयोरस्योपयोगः

अपि चापूर्वमेवेदं पाटवं यद् व्यवहारदशायामपि साधुशब्दजन्याऽभ्युदयं प्रयोक्तारः समासादयन्ति व्यवहारसिद्धिं चेति। तथा च सकलदर्शनानां शीर्षण्यतामारूढमेतद्दर्शनमिति—

---

१. 'एवमर्थेऽपि ये वादिनां नानापदास्तेऽपि तत्तच्छास्त्रवासनावशात् कल्पिता एव। यथा अभिहितान्वयः, अन्विताभिधानमिति। संसर्गो वाक्यार्थः संसृष्टः पदार्थः स इति। जातिः पदार्थो व्यक्तिर्वेत्यादि। अत एव घट इति प्रयुक्ते वैशेषिकोऽतिरिक्तमवयविनं बुध्यते। सांख्यो गुणसमूहम्, बौद्धादिः परमाणुसमूहम्। यद्यपि ऋषीणां दर्शनं तत्त्वविषयं भवति, तथापि तत्त्वभूतेन वस्तुना व्यवहारासम्भवाद् व्यवहारकाले तेऽप्यदृष्टतत्त्वसदृशा नानाप्रकारैर्व्यवहरन्ति इति न तद्वचसाऽपि पदपदार्थसत्यत्वं मन्तव्यम्' (मञ्जूषा० पृ० ४१३)।

हरिणाऽप्युक्तम्—

ऋषीणां दर्शनं यच्च तत्त्वे किञ्चिदवस्थितम्।
न तेन व्यवहारोऽस्ति न तच्छब्दनिबन्धनम्॥ (वा० प० २।१४१)।

यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः ।
तथैव लोके विद्यानामेषा विद्या परायणम् ।
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥
अत्रातीतविपर्यासः केवलामनुपश्यति[1] ।

इति वाक्यपदीये भर्तृहरिणाऽभ्यधायि । अत्रत्यो विशेषो मोक्षप्रकरणे स्फुटीभविष्यति प्रतिमायाम् ।

व्याकरणागमसम्प्रदायविच्छेदः

ननु यदि वास्तवेन व्याकरणमपि दर्शनमेव तर्हि कथं तत्सम्प्रदायविच्छेदो येन तत्पदार्थाः स्वप्नसम्पदिवावभासन्त इति चेत्, शृणु—कालचक्रपरिभ्रमणवशात् सौकर्येणोदरपूरणपर्याप्तवृत्तिलाभान्वेषिभिरलसैः संस्कृतभाषानिबद्धसन्दर्भस्थशब्दस्तेयलब्धप्रावीण्यैरविशुद्धमानसैर्मानवैः संग्रहपठनपाठनपरम्परायां क्षयं गमितायां महाभाष्यार्थबोधनेऽप्राप्तसामर्थ्यानामनादृतज्ञानवृद्ध्युपायानां दोषेण महाभाष्ये च नाशं नीतेऽयं व्याकरणागमो ग्रन्थमात्रे व्यवस्थितोऽभवत्, सोऽपि दाक्षिणात्येष्वेवेति कलावपि मध्ये मध्ये सत्त्वाविर्भावस्य स्मार्तप्रामाण्येन सुव्यवस्थापिततया निर्माणचित्तमधिष्ठाय **चन्द्राचार्य-वसुरात-भर्तृहरि**प्रभृतयः सिद्धा इमं व्याकरणागममुत्तमाऽधिकारिभ्यः शिष्येभ्यः समुपदिदिशुरिति कल्प्यते ।

स च सम्प्रदायः परां काष्ठां नीतोऽपि **पुण्यराजहेलाराज**प्रभृतीन् शिष्यप्रशिष्यान् समासाद्य समयशक्तिप्राबल्येन सत्पात्रानवाप्त्याऽपरेण वा केनचिद्धेतुना निष्ठामुपागमत् ।

यद्यपि **पुण्यराज-हेलाराजादयोऽपि** न हि तादृशविशुद्धान्तःकरणाः तथापि कस्तूरिकावासितपटन्यायेन कस्तूरिकाऽपनयनेऽपि तद्गन्धस्य तेषु सत्ताऽऽभासते । अधुना विदुषां तन्मार्गात् प्रच्युतत्वान्न कोऽप्यर्थस्तेषां बुद्धाववभासतेऽपि । यावत् सा परम्परा पुनरुज्जीविता न भविष्यति, तावद् यथार्थं पाण्डित्यं खपुष्पायमाणमेव मन्तव्यम् ।

पूर्वे विद्वांसोऽनधिगतयोगमार्गशैलीका अपि कर्णाकर्णिकया तन्मत्वैव बद्धश्रद्धास्तद्गवेषणे चेष्टमाना अदृश्यन्तेति तेषां ग्रन्थेषु तादृशो भावः स्फुटीभवति ।

योगमार्गे षण्णां चक्राणां भेदः

यथा किरातार्जुनीये द्वैतवने वसतः पाण्डवानुद्दिधीर्षुर्भगवान् बादरायणो दीनवत्सल आगत्य धनञ्जयाय मन्त्रं दत्त्वा योगं च सद्यो वितताररेति भारविरुदटङ्कयत् । स च योगः षट्चक्रभेदनमन्तरा न हि अभीष्टसाधनाय प्रभवेत्, तानि च षट्चक्राणि

---

१. वा० प० १।१६–१७ ।

मूलाधारादीनि आज्ञान्तानि योगमार्गे प्रतिपादितानि सन्ति । तद्भेदनं च गुरूपदेशद्वारा चिरकालमभ्यासं विनाऽसम्भवि । तान्त्रिकाणां सिद्धान्ते तु बिन्द्वादीनि महाबिन्द्वन्तानि अपराण्यपि दश विद्यन्ते चक्राणि । एवं शान्तमतानुयायिनां मार्गे पञ्चदश स्थानानि सन्ति ।

वैदिकमार्गे तु चतुर्णामेव चक्राणां भेदनेन उत्तमस्य ज्योतिष उपलब्धिर्भवति । तानि च तमः, स्वः, उत्तरो देवः, दिव्यः सूर्य इतीमानि—

उद्वयं तमसः परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्[1] ॥

इति मन्त्रेण सूचितानि सन्ति ।

आगममार्गे तु सद्यः सिद्धिः

आगममार्गपारङ्गतानां व्यासशुकादीनां कृते तु चक्रभेदनमन्तरापि योग्येभ्यः शिष्येभ्यस्तपःप्रभावात् सद्यः प्राप्यस्थानप्रापणं पुरातनेषु ग्रन्थरत्नेषु श्रूयते । तथा च महाभारतीयामेव कथामवलम्ब्य—

निर्याय विद्याथ दिनादिरम्याद् बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥
योगं च तं योग्यतमाय तस्मै तपःप्रभावाद् वितातार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमेलेव चिराय चक्षुः[2] ॥

इत्यादिना भारविर्व्यासस्य अर्जुनाय सद्यो योगोपदेशं व्याजहार । इत्यलमप्रासङ्गिकेन । प्रकृतमनुसरामः ।

तथा चास्मिन् मदीये व्याकरणदर्शने त्रयोंऽशाः समुपात्ताः स्युः—प्रथमा-भूमिका, द्वितीया-पीठिका, तृतीया-प्रतिमा ।

भूमिकायां पीठिकाप्रतिमयोरर्थः संक्षिप्तः

तत्रेयं प्रथमा भूमिका वर्तते । अस्यां हि पीठिकाप्रतिमयोः सूत्ररूपेण किमुत ततोऽपि संक्षेपेणार्थ उपन्यस्तो भविष्यति । यद्यप्याकारविषये भवेद् भेदस्तथापि तत्तौल्यं तु कियतांशेन स्थास्यत्येव सर्वत्र ।

देवागारद्वारस्याष्टांशोनस्य यस्तृतीयोऽशः ।
तत्पिण्डिकाप्रमाणं प्रतिमा स्यात् तद्द्विगुणपरिमाणा[3] ॥

इति वराहमिहिरोक्त्या पीठिकाया द्विगुणा प्रतिमा विहिताऽस्ति, परमत्र तादृशं परिमाणं नावलम्ब्यते । प्रायेण पीठिकायां शिक्षाया एव प्राधान्यम्, प्रतिमायां तु मुख्यं दर्शनमेव प्रकटीभविष्यति ।

---

१. शु० यजुर्वेदः—२०।२१ ।
२. किरातार्जुनीयम्—३।२५-२६ ।
३. बृहत्संहिता—५७।३ ।

व्याकरणदर्शनस्य किं मूलभूतं वस्तु

एतच्च व्याकरणदर्शनं प्रस्तूयते, तत्रास्य दर्शनस्य किं मूलभूतं भविष्यतीति दर्शयितुमुचितं प्रतिभाति। तत्र प्रथमं पाणिनीयं व्याकरणं सर्ववेदपारिषदम्, द्वितीयस्तु प्रातिशाख्यग्रामः, तृतीयाः शिक्षासरण्यः[1], चतुर्थं निरुक्तम्। एषा चतुष्टयी व्याकरण-पदेन ग्राह्या। उक्तं च निरुक्ते यास्केन—**"व्याकरणस्यैव कार्त्स्न्यं निरुक्तं स्वार्थ-साधकं च[2]।"** तच्च खिलपदेनाप्युच्यते। यथा महाभारतस्य खिलो हरिवंशः, तथैव व्याकरणस्य खिलोंऽशो निरुक्तम्। शिक्षामन्तरा तु वर्णोच्चारणमेव न सम्भवेदिति सर्वतः प्राथम्यमेव तस्या व्याकरणेऽपेक्ष्यते। प्रातिशाख्यं व्याकरणं तु तत्तच्छाखाभेदेन भिद्यत इति यथार्थं नामास्य व्याकरणस्य प्रातिशाख्यमिति[3]।

---

१. तृतीयाः शिक्षासरण्य इति शिक्षाविषये किञ्चिद् विचार्यते। प्रायो हि शिक्षादर्शनेन न हि ताः प्राचीनाः प्रतीयन्ते। यतो हि वाक्यपदीये—**'विभजन् स्वात्मनो ग्रन्थीन्'** (वा० प० १।११६) इत्यादिश्लोकेषु शिक्षामतभेद एवोद्धृतः, किञ्च तत्रैव टीकायाम्—"नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति। ततः शब्द-निष्पत्तिः इत्यादि शिक्षाकाराणां मतभेदप्रबन्धोऽनुगन्तव्यः" इत्याद्युक्तिभिः "इत्येवमादि प्रतिशाखं शिक्षासु भिन्नमागमदर्शनं सर्वं प्रपञ्चेन समर्थयितव्यम्" इत्याद्युक्तिभिश्च तथैव प्रतीयमानत्वात्।

किञ्च वाक्यपदीयटीकायामेव "विभजन्" (वाक्य० १।११६) इति कारिकायाम् "बहुधा शिक्षासूत्रकारभाष्यकारमतानि दृश्यन्ते" इत्यस्य च टीकायां "भाष्यकारमतानि इति प्रतीके शिक्षासूत्रकारमतस्योक्तत्वात् शिक्षाणामेव ये भाष्यकारास्ते गृह्यन्ते" इत्युक्त्वाऽपि शिक्षापदेन प्रातिशाख्योक्तैव शिक्षा ग्राह्या, तत्रैव भाष्याणां दृश्यमानत्वात्।

अपि च प्रातिशाख्यस्य शिक्षापदेन व्यवहारः शौनकेन **"शास्त्रापवादात् प्रतिपत्ति-भेदान्निन्दन्त्यकृत्स्नेति च वर्णशिक्षाम्।"** (ऋक० प्रा० प० १४।६८) इति सूत्रे स्वयमेव कृतः **"सैतेन शास्त्रैर्न विशिष्यतेऽन्यैः कृत्स्नं च वेदाङ्गमनिन्द्यमार्षम्"** (ऋक० प्रा० प० १४ सू० ६९) इति सूत्रस्य भाष्ये **"शिक्षैतेनैव विधानेनान्यैः शास्त्रैर्न विशिष्यते"** इति चोक्तम्।

"षट्सु वेदाङ्गेष्विदमप्येकमङ्गम्। कल्पो व्याकरणं निरुक्तं शिक्षाच्छन्दोविचिति-र्ज्योतिषामयनम् इति" इत्युक्तौ शिक्षापदेन ऋक्प्रातिशाख्यस्य कण्ठरवेण ग्रहणं च।

२. निरुक्तम्—१।१५।१।

३. एतानि प्रातिशाख्यानि पाणिन्यपेक्षयाऽवरकालभावीनि मन्तव्यानि ऋक्प्रातिशाख्ये (१३।३१) व्याडिनामग्रहणाद्, यजुःप्रातिशाख्यस्य तु कात्यायनप्रणीतत्त्वात्।

ए, ओ, ऐ, औ, इत्येवं सन्ध्यक्षरपाठ ऋक्प्रातिशाख्यमतेन प्रतीयते **"युजोरुकार इति शाकटायनः"** (१३।३९) इत्यत्र युजोर्द्वितीयचतुर्थयोरित्यनेन तथैव पाठात्। तत्रैव (ऋ० प्रा० सू० ३८) भाष्ये यथा **"अन्यान्यक्षराणि स्वयमुत्पन्नानि न तथा एकारादीनि। यतो हि द्विस्थानता एषाम्"** (ऋक् प्रा० प० १३ सू० २८ भाष्यम्) अत्रेयं शङ्का—एवं तु

'सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैकः शक्यः पन्था आस्थातुम्'[1] इति पतञ्जल्युक्त्या सर्वेषां वेदानामिदं साधारणं व्याकरणं पाणिनीयं जागर्ति ।

अयं हि भगवान् पाणिनिः—**आपिशलि-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज—शाकटायन-शाकल्य-सेनक-स्फोटायनानामेकादशानां** वैयाकरणानां मतानि संकलय्य ततः सारमादाय अष्टाध्याय्यात्मकं ग्रन्थं व्युत्थितायां दशायां निरमासीत् ।

वकारस्यापि द्विस्थानत्वान्न स्वयमुत्पन्नत्वं स्यात् । एवमेव ञमङणनानामपि मुखनासिकभवत्वादेकवर्णत्वं न स्यादिति । अत्रोच्यते—यद्यपि **"वकारस्य दन्तोष्ठम्"**, **"दन्त्योष्ठ्यो वः स्मृतोबुधैः"** इत्यादुक्त्या उभयस्थानत्वं प्रतीयते, तथापि **'ओष्ठान्ताभ्यां दन्तैर्वकारे'** (तै० प्रा० अ० २ सू० ४३) इत्यनेन सूत्रेण केवलम् अधरोष्ठस्य बाह्य आभ्यन्तरश्च अन्तःस्थानमिति ज्ञेयम् ।

अनेन सूत्रेण ओष्ठ एव स्थानम्, दन्तास्तु करणम् (अन्येषां तु यत्र स्पर्शनं तत्स्थानम्) (तै० प्रा० अ० २ सूत्र ३३) ।

आभ्यां सूत्राभ्यामन्येषां व्यञ्जनानां यत्र स्पर्शनं तत्स्थानम्, येन स्पर्शयति तत् करणम् इति सिध्यति **"येन स्पर्शयति तत्करणम्"** (तै० प्रा० अ० २ सू० ३४) ।

एवं सति **'ओष्ठान्ताभ्यां दन्तैर्वकारे'** (तै० प्रा० अ० २, सू० ४३) इति सूत्रभाष्ये दन्तैरिति सप्तम्यर्थे तृतीया उत्तरदन्तेष्वित्यर्थः । वकारोत्पत्तौ स्वभावतोऽधरोष्ठस्याभ्यन्तरोऽन्तःकरणं भवति, यत्र त्वसौ ओष्ठोपसंहारयोरोष्ठ्यं स्वरयोर्मध्यवर्ती भवति तत्र सामर्थ्याद् बाह्यमन्तःकरणम् । यथा—**"ध्रुवोऽसि, तया देवास्सुतमाबभूवुः"** (तै० स० १–६–२ तै० स० ४–१–२) इति ।

एवं यकारादीनां चतुर्णां करणान्तव्यापारनिष्पाद्यत्वाद् अन्तस्था इत्याख्या इति तद्भाष्ये दन्तैरिति सप्तम्यर्थे तृतीया, इति यदुक्तं तन्न सम्यक्, चतुर्णामन्तःस्थानां स्थानचतुष्टयस्यैव युक्तियुक्तत्वाद् वकारस्य ओष्ठस्थानतैव सिध्यति । अपि च वकारस्यैव संप्रसूततया उकाररूपत्वापत्तौ ओष्ठ्यस्य उकारस्य स्वकारणस्थानत्वमेव युक्तियुक्तं प्रतीयते किं च **"ओष्ठाभ्यां पवर्गे"** (तै० अ० २ सू० ३९) इति सूत्रेण उत्तरोष्ठस्य यथा पवर्गस्थानत्वम्, तथैव वकारस्यापि अधरोष्ठान्तःस्थानत्वं स्वरसतः समायाति । अत्रत्यो विशेषः पीठिकायां द्रष्टव्यः ।

ञमङणनविषये तु द्विस्थानत्वेऽपि न वर्णद्वयात्मकत्वम्, मुखभवस्थानजन्यत्वे नैव वर्णद्वयात्मकत्वस्वीकाराद् नासिकाया मुखबाह्यत्वात् । किञ्च ऋक्प्रातिशाख्ये **"शेष ओष्ठ्योपवाद्य नासिक्यान्"** (प० १ सू० ४७) इति सूत्रेण वकारस्य केवलम् ओष्ठः स्थानमिति द्विस्थानत्वाभावात् स्वतन्त्रवर्णत्वम्, न तु सन्ध्यक्षराणामिव सन्धिजत्वम् ।

१. महाभाष्यम्—२।१।५८ ।

स्फोटस्मर्त्ता स्फोटायनः

अत्रत्यः स्फोटायन एव स्फोटस्य उद्भावकः प्रतीयते। नायं स्फोटस्यापत्यम्। तथा सति नडादित्वात् फकि अश्वादित्वात् फञि वा स्फोटायन इति स्यात्। यद्यपि नडादिगणे स्फुटशब्दपाठो दृश्यते, ततः फकि स्फोटायन इति रूपं सिध्यति, तथापि ओकारघटितपाठस्य भ्रान्तिमूलकत्वकल्पने मानाभावः। तथा च स्फोटस्वरूपम्। स्फोटायन[1] एव स्फोटस्य स्मर्ता सिध्यति। स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटः शब्द इत्यायाति।

न च स्फोटः केवलं वर्णात्मकस्थल एव भवतीति वाच्यम्।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः॥[2]

अपरमपि—

"यथा भेर्य्याघातो भेरीमाहत्य कश्चिद् विंशति पदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति ध्वनिकृता वृद्धिः[3]**"** इति भाष्योक्त्या अव्यक्तस्थलेऽपि तत्स्वीकारात्। किं च शब्दस्यापि प्रातिपदिकार्थत्वेन ध्वन्यात्मकेऽपि शब्दरूपार्थस्य सत्ता नापह्नोतुं शक्यते।

वृत्तिभेदेन कालभेदः

ननु 'स्फोटस्तावानेव भवति[4]' इति भाष्योक्त्या एकमेव स्तोत्रं कश्चन एकया घटिकया पठति, कश्चन सपादघटिकया, कश्चन द्व्यर्धघटिकया, कश्चन घटिकाद्वयेनेति यथाकालमनुच्चारयतां तेषामापतितः प्रत्यवायः पातित्यप्रयोजकः स्यादिति चेत्, न, द्रुतामध्यमाविलम्बिताभेदेन कालभेदस्य शास्त्रानुमोदितत्वात्। आसां वृत्तीनां स्वरूपविचारः पीठिकायां भविष्यतीति तत एव द्रष्टव्यः।

अष्टाध्यायीस्वरूपम्

प्रसङ्गवशादत्र पाणिनीयाष्टाध्यायीविषये किञ्चिदुच्यते। अस्यामष्टाध्याय्यां न हि सर्वाण्येव सूत्राणि पाणिनिनैव निर्मितानि; किन्तु पूर्वाचार्यैः रचितानि सूत्राणि पाणिनिनाऽविकलानि समुपन्यस्तानि। तथाहि **'जात्याख्यायामेकस्मिन् बहुवचनमन्यतर-**

---

१. अत एव लघुमञ्जूषायाम् उपसंहारे तृतीयश्लोके—

सर्वतन्त्रार्थतत्त्वज्ञः सर्वत्र च निबन्धकृत्।
वैयाकरणनागेशः स्फोटायनऋषेर्मतम्॥
परिष्कृत्योक्तवांस्तेन प्रीयतामुमया शिवः। (लघुमञ्जू० पृ० १७३)

इत्यादिना स्फोटायन ऋषिः स्फोटसिद्धान्तस्मर्तेत्यायाति।

२. महाभाष्यम्—१।१।७०। ३. तदेव। ४. महाभाष्यम्—१।१।७०।

स्याम्[1]', '**जातेरस्त्रीविषयादयोपधात्**[2]', '**सप्तम्यधिकरणे च**[3]', '**अधिकरणैतावत्त्वे च**[4]', '**कर्तरि कर्मव्यतिहारे**[5]', '**कर्मण्यण्**[6]', '**वोतो गुणवचनात्**[7]', '**गुणवचनब्राह्मणादिभ्यः कर्मणि च**[8]', '**आद्गुणः**[9]', इत्यादीनि सूत्राणि नह्येकार्थकानेव तत्तच्छब्दानुपादाय प्रवृत्तानि सन्ति। किं नाम वैयाकरणस्यापि निकाये शब्दानामेतादृशोऽभावः सञ्जातो येन अनेकार्थानेव शब्दान् गृहीत्वा अध्येतॄन् एतादृशे शङ्कापङ्के पातयितुं प्रयतेत आचार्यः। एतद्दोषपरिमार्जनाय—'**व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्**[10]', '**उभयगतिः पुनरिह भवति**[11]' इत्यादीनि वचनानि भाष्यकारादिभिराश्रितानि भवन्ति। यदि नाम भगवान् पाणिनिः स्वयमेव सर्वाणि सूत्राणि निरमास्यत्, तर्हि नैवंविधानि कोटिद्वयावगाहिपदार्थजटिलानि सूत्राणि उपन्यासिष्यत्।

यद्यपि एतद्घटकानां गुणादिपदार्थानां विचारः प्रतिमायां भविष्यति, तथापि संक्षेपतोऽत्र प्रसङ्गप्राप्तं द्रव्यं किञ्चिद् विचार्यते। सूत्रे महाभाष्ये च अधिकरणशब्द आधारवाचकत्वेन '**सप्तम्यधिकरणे च**[12]' इत्यादौ प्रयुक्तोऽस्ति। '**अधिकरणैतावत्त्वे च**[13]' इति सूत्रे '**सरूपसूत्रे**[14]', '**अधिकरणगतिः साहचर्यात्**' इति वार्तिके '**नैको द्रष्टानेकाधिकरणस्थमादित्यं युगपदुपलभते**[15]' इति महाभाष्ये च अधिकरणशब्दो द्रव्यापरपर्यायः प्रयुज्यते।

अत्रेयमाशङ्का—किं द्रव्यशब्दोऽधिकरणार्थकः सूत्रकाराभिमतोऽस्ति न वा? यतो हि '**द्रव्यं च भव्ये**[16]' इति सूत्रे द्रव्यशब्दो द्रुशब्दाद् इवार्थे यति निष्पद्यते। स च भव्यार्थकः। एवं स्थितौ द्रव्यशब्दस्याधिकरणापरपर्यायत्वं नैव सिध्यति, इत्येव तदुत्तरं देयम्। एतावताऽनुमीयते यद् द्रव्यशब्दस्याधिकरणार्थकत्वं वार्तिककारानन्तरमेव प्रसिद्धमिति। वार्तिककारो हि वैशेषिकैः संकेतितं द्रव्यशब्दस्य क्षित्याद्यर्थकत्वमभ्युपगम्य '**द्रव्याभिधानं व्याडिः**' इति सरूपसूत्रे प्रायुङ्क्त। वैशेषिकात्पूर्वं तु गुणाश्रयत्वादधिकरणपदेनैव क्षित्यादीनां व्यवहार आसीत्, अत एव क्षित्यादीनाम् अधिकरणपदवाच्यतैव पौर्वकालिकीति सिद्धम्। अयं विषयः (द्रव्यपदवाच्यतारूपः) प्रतिमायां प्रकटयिष्यते।

---

१. अष्टा० १।२।५८। २. तदेव–४।१।६३। ३. तदेव–२।३।३६।
४. तदेव–२।४।१५। ५. तदेव–१।३।१४। ६. तदेव–३।२।१।
७. तदेव–४।१।४४। ८. तदेव–५।१।१२४। ९. तदेव–६।१।८७।
१०. महाभाष्यम्–१।१।२। ११. तदेव–१।१।२३। १२. अष्टा० २।३।३६।
१३. तदेव–२।४।१५। १४. तदेव–१।२।६४। १५. महाभाष्यम्–१।२।६४।
१६. अष्टा० ५।३।१०४।

शब्दस्वरूपम्

तत्र कोऽयं शब्द इति जिज्ञासायां भाष्यमतमुपन्यस्ते। भाष्ये हि प्रथमं पस्पशाह्निके **'अथ गौरित्यत्र कः शब्दः'** इति प्रश्ने द्रव्यस्य क्रियाया गुणस्य आकृतेश्च शब्दत्वमाशङ्क्य प्रत्याख्याय च **"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति, स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते[1]"** अत्र येनोच्चारितेनेत्यस्य प्रकाशितेनेत्यर्थसत्त्वात् प्रथमलक्षणे स्फोटः शब्द इति सूच्यते, अथवेत्यनेन तु ध्वनिः शब्द इति निर्दिश्यते। तथा च—

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥[2]

इति तपरसूत्रभाष्येण उभयोरपि शब्दसम्बन्धितया तयोरेवात्रोपन्यासः। तथा च प्रथमम् आन्तरः शब्द उच्यते। अथवेत्यनेन तु बाह्यो ध्वन्यपरपर्यायः। सोऽपि ध्वनिर्द्विविधः—प्राकृतो वैकृतश्च।

तत्र—

शब्दस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥[3]

इति स्वोपज्ञटीकायां भर्तृहरिणोपन्यस्तायाः संग्रहकारिकाया बलेन तट्टीकासारार्थग्रहणेन च स्फोटध्वन्योर्भेदः प्रदर्श्यते।

एकस्यैव स्तोत्रस्य पठने कालवैविध्ये कारणम्

ध्वनिर्द्विविधः प्राकृतो[4]वैकृतश्च। तत्र येन विना अनभिव्यक्तं स्फोटरूपं न परिच्छिद्यते, स प्राकृतः। येन अभिव्यक्तं स्फोटरूपं पुनः पुनरविच्छेदेन प्रचिततरं कालमुपलभ्यते, स वैकृतः। एवं च वर्णविषये द्विविधः कालभेदः। प्रथमस्तु अपचितप्राकृतध्वनिनिमित्तो ह्रस्वः, प्रचितप्राकृतध्वनिनिमित्तो दीर्घः, प्रचिततरप्राकृतध्वनि-

---

१. महाभा० पस्पशाह्निकम्। २. तदेव—१।१।७०। ३. वाक्यपदीयम्—१।७७।

४. तथा चोक्तं वाक्यपदीये—

शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥ (वा० का० १२ श्लो० १०२)।

क्वचिद् उद्योते च 'वर्णस्य', इति पाठः। तथा चोक्तम्—

तस्मादभिन्नकालेषु वर्णवाक्यपदादिषु।
वृत्तिकालः स्वकालश्च नादभेदाद् विभज्यते॥

तथा टीकायां पुण्यराजः—"नादकृतपौर्वापर्यव्यहारः प्राकृतध्वनिभेदकृतश्च ह्रस्वदीर्घादिव्यवहारः। वैकृतध्वनिकृतस्तु द्रुतमध्यमविलम्बितव्यवहार इत्यर्थं" इति।

निमित्तः प्लुतः। स च प्राकृतध्वनिकालः स्फोटे अध्यारोप्यमाणः स्फोटकाल इत्युपचर्यते।

द्वितीयस्तु—वैकृतध्वनिप्रयुक्तो द्रुतामध्यमाविलम्बितारूपवृत्तित्रयहेतुभूतः। तथाहि अपचितवैकृतध्वनिनिमित्ता द्रुतावृत्तिः। प्रचितवैकृतध्वनिनिमित्ता मध्यमा वृत्तिः। प्रचिततरवैकृतध्वनिनिमित्ता तु विलम्बिता वृत्तिरिति निष्कृष्टोऽर्थः।

एवं च यथा घटादिरूपपरिच्छेदकवशादेकमप्याकाशं भिद्यते, तथैव तत्तद्ध्वनिरूपपरिच्छेदकवशाद् एकोऽप्यखण्डः स्फोटो वैविध्येन प्रतीयते, तथा च प्राकृतध्वनिभेदप्रयुक्तः स्फोटभेदः, अर्थभेदबोधे हेतुत्वं भजते। ध्वनिना शब्दोपलब्धिः कया रींत्या भवतीत्यत्र त्रयो मार्गाः सन्ति। तत्र केचिन्मन्यन्ते ध्वनिरुत्पद्यमानः श्रोत्रं संस्करोति, तच्च संस्क्रियमाणं श्रोत्रं शब्दोपलब्धौ द्वारतां प्रतिपद्यते। तस्मिन् संस्कारे विकल्पत्रयम्[1]—विषयग्रहणासमर्थस्य श्रोत्रस्य अपूर्वशक्त्याधानेन संस्कारः।

इन्द्रियविषययोः संस्कारः

विद्यमानायाः शक्तेः प्रबोधो वा, अथवा अर्थक्रियायां द्वयोरिन्द्रियविषययोः सान्निध्यमात्रसम्पादनं संस्कारः।

अन्ये तु अभिव्यक्तिवादिनो वदन्ति यत् शब्द एव ध्वनिसंसर्गात् प्राप्तसंस्कारः श्रोत्रस्य विषयो भवति। अपरे तु शब्दश्रोत्रयोरुभयोरपि संस्कारको ध्वनिरिति मन्यन्ते। तथा चैतन्मते सहकारिनिमित्तान्तरोपकृताभ्याम् इन्द्रियविषयाभ्यां शब्दविषया बुद्धिरुत्पाद्यते। तेषु इन्द्रियस्यैव संस्कारः इति स्वाभिमतं सिद्धान्तम्—

इन्द्रियस्यैव संस्कारः समाधानाञ्जनादिभिः।
विषयस्य तु संस्कारस्तद्गन्धप्रतिपत्तये[2]॥

इत्यनेन कारिकाकारः प्रदर्शयति। तथा च समाधानं चेतसोऽभिसंस्कारः। स च द्विविधः—लौकिकः, यथाऽर्वाग्दर्शनानाम्, अलौकिस्तु दिव्यदर्शनानाम्।

स च संस्कार इन्द्रिये विशेषमादधाति, न तु विषयरूपे दृश्ये। एवं च—

---

१. तथा चोक्तं वाक्यपदीये—

इन्द्रियस्यैव संस्कारः शब्दस्यैवोभयस्य वा।
क्रियते ध्वनिभिर्वादास्त्रयोऽभिव्यक्तिवादिनाम्॥ (वाक्य० का० १ श्लो० ७९)

वाक्यपदीयटीका भर्तृहरिकृता द्रष्टव्या।

२. वा० प० १।७९।

पराञ्चि[1] खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन् ।
कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्[2] ॥

इति श्रुत्या पराग्दर्शिन इन्द्रियाणां तादृशं संस्कारं कुर्वन्ति, येन लौकिकान् विषयानवबुध्यन्ते। प्रत्यग्दर्शिनस्तु इन्द्रियाणां बाह्यां प्रवृत्तिमवरुध्य स्वान्तःस्थमात्मानं पश्यन्ति, येन विज्ञातेन सर्वं विज्ञातं भवति ।

सम्यग् आधीयते स्वस्वरूपे व्यवस्थाप्यते चित्तम् अनेनेति समाधानं समाधिः । स च समाधिस्सम्प्रज्ञाताऽसम्प्रज्ञातभेदेन द्विविधः । अनयोरन्यतरेणापि समाधिना चित्तं संस्कर्तुं योगिजना एव समर्था भवन्ति । अर्वाग्दृष्टिस्तु न हि चित्तं समाधातुं शक्नोति; स हि चित्तं बाह्यविषयादवरुध्य न हि स्वान्तःस्थे परमात्मनि लगयितुं शक्नोति । अतस्तत्र समाधानशब्दो नहि तादृशार्थको मन्तव्यः; किन्तु तेषां स्थूलावस्थायामेव स्थापनं तेषामर्वाग्दृशां कृते मन्तव्यम् । तच्चालौकिकं समाधानं सूक्ष्मव्यवहितविप्रकृष्टवस्तूनामुपलब्धौ चक्षुरेवानुगृह्णाति । विषयसंस्कारे हि सूक्ष्मव्यवहितविप्रकृष्टानां वस्तूनां सर्वेषामपि ज्ञानं स्यात् ।

एवमेवाञ्जनादिद्रव्यं चक्षुरेव संस्करोति, न तु बाह्यविषयम् । विषयसंस्कारे हि विषयस्य अन्यैरपि ग्रहणं प्रसज्येत । विषयस्यापि संस्कार आतपे वह्नौ वा तैलं संस्थाप्य सुगन्धिद्रव्याणि तत्र प्रक्षिप्य कर्तुं शक्यते ।

एवमेव पृथिव्या उदकेन संस्कारे गन्धप्रतिपत्तिर्भवति । घ्राणेन्द्रियसंस्कारे तु संस्कृतासंस्कृतविषयेषु प्रतिपत्तिभेदो न स्यात् । विस्तरस्तु प्रतिमायां द्रष्टव्यः ।

बाह्यान्तरभेदेन स्फोटो द्विविधः

तथा च स्फोटो द्विविधः, आन्तरो बाह्यश्च । तत्र बुद्ध्यवच्छिन्नाकाशधर्माऽभ्यमान्तरः स्फोटः, स चायं स्फोट आन्तरप्रणवरूप एव । एवं[3] च पदादिरूप आन्तरः

---

१. अस्याः श्रुतेरयम्भावः—जगत्स्रष्ट्री प्रकृतिः यदा जगत् स्रष्टुं प्रववृते, तदा सृष्टेः का कथा ? सा हि तथा इन्द्रियाणि ससर्ज, यथा तानि अन्तर्दर्शनशक्तिविहीनानि सन्ति । बाह्यानेव विषयानवाबुध्यन्त । सा हि न हि सृष्टिः; किन्तु तेषामिन्द्रियाणां सा हिंसा । अत एव श्रुतौ **'व्यतृणत्'** इति पदमुपात्तम् । न तु साधारणी हिंसा सा, किन्तु विशिष्टा । अत एव हिंसार्थकस्य तृहेस्तत्रोपादानं कृतम्, न तु सृजेः । यो हि धीरो बुद्धेः प्रेरकः इन्द्रियाणि अन्तर्मुखीकर्तुं शक्नोति, स हि अमृतत्वं मोक्षं वाञ्छन् चक्षुः परावर्त्य अर्थात् इन्द्रियाणि अन्तर्मुखीभाव्य प्रत्यक् चैतन्यं पश्यतीति गूढोऽभिप्रायोऽस्याः श्रुतेः ।

२. कठोपनिषद्–२।१ ।

३. (लघुमञ्जूषा पृ० ३८९) (लघुमञ्जूषा पृ० २०१) पं० सभापतिशर्मोपाध्यायटीकिता—रत्नप्रभा पृ० २०२—प० २५ 'यद्वा केषांचिद् व्यक्तवाचामुच्चारणे ध्वनिः स्फोटश्च स्तः । अव्यक्तवाचामुच्चारणे ध्वनिरेव प्रतीयत इत्यर्थः । अत्र प्रतीयत इत्युक्त्या स्फोटस्यापि सत्ता

स्फोटो वाचक इति सिद्धम्[1]। **'ओंकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति[2]'** इति श्रुतेः। बह्वी वाक्यपदादिरूपा नानारूपा घटपटादिरूपा च। **'अकार एव'** इति श्रुत्यन्तरे पाठः। तत्राप्यवयवद्वारा प्रणवोपलक्षणत्वम्। द्वादश-स्कन्धे भागवते प्रणवस्य स्फोटत्वं स्फुटमेवोक्तम्। तत्र हि—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः।
हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते[1]॥

इत्यादिना लघुमञ्जूषायां समुपन्यस्तः। तथाहि—**'तथा चायं स्फोटो द्विविध, आभ्यन्तरो बाह्यश्च। तत्राभ्यन्तरो बुद्धयनुसंवृत्तिरूपः। बाह्यस्तु जातिव्यक्तिभेदाद् द्विविधः। संघातवर्त्तिनी जातिरेव वाचिकेत्याद्यः [जातिस्फोटः], एकोऽनवयवः स्फोट इति व्यक्तिस्फोटः।'**

अनया रीत्या लघुमञ्जूषायां स्फोटं प्रपञ्चयता नागेशभट्टेन न हि वर्णपद-वाक्यादिभेदेन अष्टौ स्फोटा उपन्यस्ताः; परं व्यञ्जनया तेनापि ते स्वीकृताः[3]। तन्मतेऽपि वर्णस्फोटपदेन प्रकृतिस्फोटः प्रत्ययस्फोटश्च ग्राह्यः।

सूचिता (पृ० २३५ चौखम्भा मञ्जूषा कुञ्जिका पृ० २३७)। 'एवं चेति स्फोटो द्विविधः, आन्तरो बाह्यश्च, तत्रान्तरस्य मुख्यं वाचकत्वमित्यर्थः, बाह्यस्तु जातिव्यक्तिभेदेन द्विविधः।' यत्तु कलायां (पृ० २३९ पं० २८) 'तेन व्यक्तवाचामुभयम्, अव्यक्तवाचां तु वर्णधर्माना-क्रान्तध्वनिरेवेत्यर्थः' इत्युक्तम्; तत्तु 'भेर्य्याघातस्थलेऽपि स्फोट एव भेरीताडनाभिव्यक्तः श्रोत्रग्राह्य इत्यर्थः' इति स्वोक्तिविरुद्धम् (पृ० २३९ प० २)।

१. तदुक्तं सूतसंहितायाम्—

परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।
प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः॥
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः।
प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवः स्मृतः॥ इति।

२. ऐतरेयब्राह्मणम्–३।६।७।

३. नागेशलघुमञ्जूषा (पृ० ८) तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः प्रकृतिप्रत्ययास्तदर्थ-वाचका इति तदर्थः। अत्र कला—'ननु वर्णस्फोट इत्यस्य वर्णा वाचका इत्यर्थः स्यात्, स चायुक्तः, तेषामानर्थक्यस्य भाष्य एव बहुशः स्पष्टत्वात्। किञ्चात्र पक्षेऽर्थबोधानुकूला शक्तिर्वर्णसमूहे एव पर्याप्ता, न प्रत्येकम्, तथा सति प्रत्येकमर्थवत्त्वात् प्रातिपदिकत्वाद्यापत्तौ धनं वनमित्यादौ नलोपाद्यापत्तेः। किञ्च प्रत्येकं शक्तिमत्त्वे प्रत्येकं वर्णादर्थबोधापत्तिः; किञ्च द्वितीयादिवर्णोच्चारणस्य वैयर्थ्यापत्तिः। न च प्रत्येकं वर्णैरर्थस्मरणमात्रं जन्यते, चरमेण पुनः स्पष्टं जन्यते, प्रत्यक्ष इव स्मरणेऽपि वैजात्याङ्गीकारादिति वाच्यम्, प्रतिवर्ण-मर्थस्मरणस्यानुभवविरुद्धत्वाद् गुरुत्वाच्च। न च प्रत्येकावृत्तेः कथं समुदायवृत्तित्वं द्वित्वादि-वदुपपत्तेरत आह प्रकृतीति। तथा च वर्णपदं पदैकदेशपरमिति भावः।

अष्टत्वं स्फोटानामुपन्यासः

वैयाकरणभूषणसारकारेण भट्टकौण्डेन स्फोटचन्द्रिकादिषु मौनिभट्टकृष्णादिभिरन्यैश्च ग्रन्थकारैरष्टौ स्फोटाः स्वीकृताः। श्रीमतां माननीयानामस्माकं गुरुकल्पानां पण्डितराजश्रीसभापत्युपाध्यायानां शिष्यमूर्धन्येन पञ्चोलिपण्डितबालकृष्णशास्त्रिणा भूषणसारटीकायां प्रभायां (पृ० ४४८) वक्ष्यमाणपद्धत्या अष्टौ ते प्रदर्शिता गतानुगतिकरीत्या। तथाहि—**"स च स्फोटोऽष्टविधः—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटिः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्च"** इति।

वर्णस्फोटस्य सखण्डाखण्डभेदेन द्वैविध्यं तु न, सुबन्ततिङन्ततदादिभिन्नस्य वाक्यभिन्नस्य च प्रकृतिप्रत्ययसमुदायरूपस्य प्रकृतिरूपस्य प्रत्ययरूपस्य चैकवर्णमात्रवर्णस्फोटघटकवर्णशब्देन ग्रहणात्। तदवयवानां चार्थाप्रत्यायकतयाऽर्थप्रत्यायकस्यैव खण्डस्य सखण्डपदस्फोटपदेन ग्रहणात् सखण्डवर्णस्फोटानुक्तिरित्याशयः।

तथा च वर्णपदबोध्यचरमवर्णाभिव्यक्तस्फोटेन यत्र बोधः, तत्रैव वर्णस्फोटपदव्यवहार्यत्वम्। एवं सुबन्ततिङन्ततदादिघटकान्त्यवर्णाभिव्यक्तस्फोटेनार्थप्रतीतौ पदस्फोट इति व्यवहारः। सुबन्ततिङन्तपदजन्यबोधपूर्वकचरमवर्णाभिव्यक्तस्फोटस्य बोधकत्वे वाक्यस्फोट इति व्यवह्रियते। प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधेऽखण्डपदस्फोटः। यथा—'मणिनूपुरादि', 'वः नः' इत्यादि च। पदजन्यबोधाभावे सति वाक्यस्फोटेन बोधेऽखण्डवाक्यस्फोटः। यथा व्याकरणज्ञानशून्यानां वाक्यतो बोधे वाक्यम्। वर्णपदवाक्यगतजातिव्यङ्ग्यस्फोटैर्बोधे क्रमशोवर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोट इत्युच्यते इत्युक्तम्[1]।

आद्यावधि प्रचलितानामष्टानां स्फोटानां स्वरूपं विचार्यते। तत्र वर्णस्फोटस्योदाहरणं 'पचति' इत्येतद्घटकपच्प्रकृतिव्यङ्ग्यः 'ति' इति प्रत्ययव्यङ्ग्यः स्फोटो वर्णस्फोटः। तार्किकाणां मते यच्छक्तं पदमिति तद्व्यङ्ग्यस्फोटस्यैव, शाब्दिकनये वर्णस्फोटशब्देन व्यवहारः, इति च प्रभायामुक्तम्।

अस्यां स्थितौ वाक्यार्थज्ञानामस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति' इत्यादौ पदस्फोटव्यवहारः। तथा चायं विभागो न हि युक्तियुक्तः। अत एव नागेशभट्टो नहि अष्टौ स्फोटान् मञ्जूषायां निरदिक्षत्; किन्तु केवलम् आन्तरबाह्यभेदेन द्वौ स्फोटौ प्रदर्श्य बाह्यस्फोटस्य जातिव्यक्तिभेदेन द्वावेव भेदौ प्रादर्शयत्। तथा च व्यवहारदृष्ट्या बाह्यस्फोटप्रदर्शने प्राप्ते वक्ष्यमाणरीतिरेवास्माभिरवलम्बनीया।

१. प्रभाख्यायां भूषणटीकायाम्–पृ० ४४८।

षोडश स्फोटाः

तथाहि—व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोट इत्येवं रूपेण द्वौ स्फोटावभ्युपगन्तव्यौ। यदि चावान्तरस्फोटप्रतिपादने आग्रहः, तर्हि कल्पितानि पदानि, कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः। एवं सति (१) प्रकृतिस्फोटः, (२) प्रत्ययस्फोटः, (३) प्रकृतिजातिस्फोटः, (४) प्रत्ययजातिस्फोटः, (५) पदस्फोटः, (६) पदजातिस्फोटः, (७) वाक्यस्फोटः, (८) वाक्यजातिस्फोटः, (९) अखण्डपदस्फोटः, (१०) अखण्डपदजातिस्फोटः, (११) अखण्डवाक्यस्फोटः, (१२) अखण्डवाक्यजातिस्फोट इति द्वादश स्फोटा भविष्यन्ति। तत्तदवयवविवक्षाविवक्षाभेदेन प्रकृतिप्रत्ययादिकल्पनाकल्पनाभ्यां सर्वेषां कृते एते द्वादश स्फोटा युक्तियुक्ता भवेयुः। एतदेव विचार्य मञ्जूषायां नागेशभट्टो द्वावेव स्फोटौ प्रत्यपादयत्।

यच्च भट्टनागेशो लघुमञ्जूषायाम्—**'तत्र प्रकृतिप्रत्ययनिपातानामेकवर्णानामर्थवत्त्वदर्शनात्' इत्यादिना प्रत्याहाराह्निके भाष्ये उक्तः प्रकृतिप्रत्यययोर्वाचकत्वमित्येवंरूपो वर्णस्फोटः शास्त्रीयप्रक्रियोपयोग्येव न वास्तवः।'** इत्याद्यवोचत्; तद्वक्ष्यमाणभाष्यविरोधाद्धेयमेव।

वस्तुतस्तु वर्णस्फोटोऽप्यधिकस्तत्र निवेशयितुं शक्यते। प्रत्याहाराह्निके 'ऐ औच्' सूत्रोपरि[1] **'अथवोभयतः स्फोटमात्रं निर्दिश्यते'** इति भाष्योक्त्या शुद्धेषु ऋकारादिवर्णेषु स्फोटसत्ताया अभ्युपगमात्। तथा च जातिव्यक्तिभेदेन द्वौ वर्णस्फोटावधिकौ तत्र सन्निवेश्याविति चतुर्दशस्फोटाः सम्पन्नाः। प्रकृतिप्रत्ययविषयेऽप्यखण्डसखण्डभेदेन द्वयोरपरयोरपि सम्मेलने षोडशस्फोटाः सम्पद्यन्ते। एते सर्वेऽपि स्फोटा नित्याकाशसदृशनित्यस्फोटमूलकवर्णपदवाक्यकल्पनया कल्पिता एव मन्तव्याः। स्फोटं विहाय पदवाक्यकल्पनायाः खपुष्पायमाणत्वात्। यद्यपि सूत्रे वार्त्तिके भाष्ये वा सृष्टिक्रमो नोक्तः, तथापि श्रुतिप्रामाण्याद् वक्ष्यमाणनिरुक्तसन्दर्भाच्च सोऽभ्युपगम्यते।

१, अत एव हरिणा व्याकरणस्य त्रिविधा वाग् विषय इत्युक्तम्—

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्या वाचः परम्पदम्॥ (वा० प० १।१४३)

"एतत् = व्याकरणम्। अनेकतीर्थेति श्लिष्टव्यक्तवर्णरूपा प्राप्तसाधुभावापभ्रष्टा दुन्दुभिवेणुवीणादिशब्दरूपा च इत्यर्थः।" इति तट्टीका।

किं च भेर्याघातस्थले अव्यक्तवाक्स्थले च स्फोटाभ्युपगमात् शब्दोऽपि शाब्दबोधे भासते इत्याद्युक्त्या च वर्णस्थलेऽपि स्फोटोऽङ्गीकार्यः।

सृष्टिक्रमः

तत्र प्रसङ्गवशात् शब्दस्वरूपविचारोपयोगार्थं स क्रमः प्रदर्श्यते। तथा च 'एकोऽहं बहुस्यां प्रजायेय[१]' इत्यादिश्रुत्या चिदानन्दज्ञानक्रियेच्छात्मकपञ्चशक्ति-विशिष्टस्य स्वतन्त्रस्य कर्तुर्लीनजगत्प्रपञ्चस्य सञ्चितप्रारब्धवशात् चितः संस्फुरणे क्रमशः स्रष्टुमिच्छायां पृथगिव संभूतायां षड्भावविकारा निरुक्तोक्ताः क्रमेणाविर्भवन्ति। 'इन्द्रो मायाभिः पुरुरूप इयते[२]' इति श्रुत्या बहूनि रूपाणि धत्ते। तत्र विविधाः प्रक्रिया-स्तैस्तैस्तैर्थिकैः स्वीये स्वीये सिद्धान्ते प्रदर्शिताः सन्ति।

अस्माकं वैयाकरणानां मते तु 'आख्यातोपयोगे[३]' इति सूत्रस्थभाष्यसिद्धान्तेन 'ज्योतिर्वज्ज्ञानानि भवन्ति' इति सन्दर्भेण 'सर्वस्य वा चेतनावत्त्वात्[४]' इति 'सन्[५]' सूत्रस्थवार्त्तिकेन च शब्दस्य चैतन्यकोटावन्तर्भावात्, 'स भूरिति व्याहरत्, भुवमसृजत्[६]' इति श्रुत्यार्थसृष्टौ सञ्जातायां चिज्जडयोः सम्मिश्रणात् सर्वोऽपि सृष्टिप्रपञ्चः क्रमश उदेति।

प्रकृते तु शब्दसृष्टिरेवाभिमताऽस्माकम्। अन्या सृष्टिस्तु यथास्थानं सन्निवेश-यिष्यते। एवं च तज्ज्ञानं कया पद्धत्या परिणमते विवर्तते वेति प्रश्न उदेति। तत्र सूत्रमात्रदर्शनेन परिणामवादो विवर्तवादो वेति निश्चेतुं न पार्यते। वार्त्तिके तु 'सर्वस्य वा चेतनावत्त्वात्[७]' इत्यनेन चैतन्यस्य तदाश्रयस्य च भेदः प्रतीयते। स भेदो व्याव-हारिकः, पारमार्थिको वेति विचार्यते। तत्र व्याकरणस्यैव खिलेंऽशे निरुक्ते षण्णां भावविकाराणामुपादानेन परिणामवाद एव समायाति।

यथा हि सूक्ष्मं वटबीजं विवृद्धं सदाविर्भूतचैतन्यं वृक्षरूपेण दृश्यते, तथैव तदेव स्फोटाख्यं शब्दब्रह्म स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिविशिष्टं सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूल-रूपेण प्रकाशरूपं वैखरीपर्यन्तशब्दराश्यात्मना विमर्शात्मना चार्थश्रेणिमवलम्बमानं सत्त्वरजस्तमोरूपेण बुद्ध्यहङ्कारेन्द्रियादिना सूक्ष्मस्थूलभूतात्मना च परिणमते। **'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति[८] वा'** इति **सूत्र इन्द्रशब्दोऽयं बह्वर्थः**। एतदर्थनिर्णयश्च भाष्यमनुसृत्यैव विधेयः। तत्र भाष्ये—**'इन्द्रशब्दः' 'इतीन्द्रवद् विषयः, तद् यथा एक इन्द्रोऽनेकस्मिन् क्रतुशत आहूतो युगपत् सर्वत्र भवति[९]'** इत्या-दिना विग्रहवद्देववाचको यो ह्यनेकं शरीरशतं निर्माय क्रतुशते उपतिष्ठते।

---

१. छा० उ० ६।२।३। २. बृ० उ० २।५।१९। ३. अष्टा० १।४।२९।
४. तदेव–३।१।७। ५. तदेव— । ६. तै० ब्रा० २।२।४२।
७. अष्टा० ३।१।७। ८. तदेव–५।२।९३। ९. तदेव–१।२।६४।

'इन्द्रश्चाध्येता बृहस्पतिश्च प्रवक्ता[१]**'** इत्यत्रापि स एवेन्द्रः, यस्य गुरुर्मन्त्री वा बृहस्पतिः। तथा च इन्द्रशब्दो देवाधिपत्वेन देवत्वेन वा प्रयुक्तो हविर्भागितया **'इन्द्रो मायाभिः पुरुरूप ईयते**[२]**'** इत्यादिश्रुतिषु परमात्मवाचकोऽपि दृश्यते।

भाषाविज्ञानप्राधान्यमत्र सृष्टिक्रमस्तु प्रासङ्गिकः

तथा च इन्द्रेण परमात्मना सृष्टम् इन्द्रियम्। इन्द्रस्य जीवात्मनो लिङ्गम् इन्द्रियम् इत्यादौ जीवेश्वरवाचकोऽपीन्द्रशब्दः। तथा च सृष्टिप्रकरणे इन्द्रियाणामपि सृष्टिर्भाष्यादपि प्रतीयते। परं शब्दसाधुत्वप्रतिपादकेऽस्मिन् शास्त्रे प्रासङ्गिका एव पदार्था दृश्यन्ते। त एव च निरूपणीयाः। प्राधान्येन तु भाषाविज्ञानं शिक्षा च व्याकरणस्य विषयः। तथा च—**'शुङ्गेन सन्मूलमन्विच्छ सौम्य**[३]**'** इति श्रुतिप्रदर्शितया रीत्या **'श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः', 'अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते**[४]**'** इत्याभ्यां लक्षणाभ्यां लक्षितः सूक्ष्मो वैखरीरूपो वा व्याकरणेनानुशिष्यते।

अदृष्टोत्पत्त्या अभ्युदययोगः

तत्र साधारणानामपि वैयाकरणानां कृते साधुवैखरीशब्दाभ्यासेन यथास्थानप्रयत्नमुच्चारणेन च विशिष्टस्य अदृष्टस्योत्पत्त्या तादृशसंस्कारसंस्कृता बुद्धिः स्वयमेव सन्मार्गं प्रदर्शयति। यथा हि—

योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते।
यो नियुक्तो हि योगेन स योगे रमते चिरम्[५]**॥**

इति श्रुत्या मूलभूतां पश्यन्तीं साक्षात्कृत्य वास्तविकवैयाकरणत्वं शिष्टत्वापरपर्यायं लभन्ते भगवदनुगृहीताः शुद्धान्तःकरणा मानवाः।

एवं स्थितौ स्फोटपदेन वैखर्यां मध्यमायां च बाह्यस्फोटस्यानुभवः। पश्यन्त्यां तु सूक्ष्मः स्फोटोऽनुभूयते। यस्य सूक्ष्मस्य स्फोटस्य साक्षात्कारे 'सर्वे सर्वार्थवाचकाः' इति स्थितौ रमन्ते वैयाकरणाः, तदानीं ते शिष्टपदव्यपदेशभाजो भवन्ति।

परा व्यवहारातीता

परासाक्षात्कारेऽधिकारनिवृत्तेः श्रवणात् तदवस्थामापन्नाः पुरुषधौरेया न ह्यस्माकं व्यवहारपथे प्रवेष्टुमर्हन्ति। अतस्तद्विषये विचारोऽनावश्यकः। एवं स्थितौ मध्यमावस्थामेवाश्रित्य पीठिकायां लेखिष्यमाणानपि विषयान् संक्षेपेणात्र निर्दिशामि। तत्र सर्वतः प्रथममेतदेवाहं वच्मि यदि मात्सर्यं विहाय अन्धपरम्परां च त्यक्त्वा पक्ष-

---

१. म० भा० पस्पशाह्निकम्–पृ० ५।
२. बृ० उ० २।५।१९।
३. छा० उ० ६।८।६।
४. महाभा० पस्पशाह्निकम्—पृ० १।
५. सौ० ल० उ० ४।१।

पातग्रहग्राहागृहीता विपश्चितः पश्येयुर्मदीयामुक्तिम्—अवश्यमेव शब्दतत्त्वं शनैः शनैः प्रकटितं भविष्यतीत्याशासे। अत्रान्येषां तैर्थिकानां मतान्यनुपन्यस्य केवलं वैयाकरण-दर्शनानुसारं प्रातिशाख्यशिक्षानुसारं च किञ्चित् प्रदर्शयामि।

ज्ञानस्य शब्दरूपेण परिणामः

तत्र सूक्ष्मं ज्ञानं ज्योतिःपदाभिधेयं स्वरूपं प्रकटयितुं यदा परिस्पन्दते, तदा तज्ज्ञानं वृत्तिरूपमासादयितुं बुद्धितत्त्वं पश्यति। दृष्टायां बुद्धावपाक्रान्तस्पृष्टलोहकल्पायां कश्चन क्षोभः समुत्पद्यते। तेन च मनः प्रेर्यते। तच्च मनः शरीरव्यापकं सूक्ष्मं तेजो विद्युन्निभमभिहन्ति। अभिहतेन तेजसा वायुः प्रेर्यते। स च वायुर्मूर्धानमभिहन्ति। तत्र च सुषिरमप्राप्य निवर्तते। तत्र नासिकारन्ध्रेण निःसरन् स्थूलबिन्दुभावमा-सादयति। स एव स्थूलो बिन्दुर्द्विधा भूत्वा विसर्गभावमवाप्य कण्ठे हकाररूपेण परिणमते। उरःस्थानस्थितश्च स एव हकारः प्रथमा मातृका सूक्ष्मविसर्गरूपा। सैव पञ्चसु कण्ठादि-स्थानेषु हयरलवेति ऊष्मरूपेण चतुरन्तस्थारूपेण कचटतपेत्यघोषरूपेण च विराजते। त एव पञ्चाघोषा यदा घोषात्मना संसृष्टाः, तदा गजडदवेति पञ्च रूपाणि आसादयन्ति। इमा इवोरस्यहकारसहिता षोडश मातृकाः **'अर्धमात्रा स्थिता नित्या यानुचार्य्या विशेषतः'**[1]।

षोडश मातृकाः

मार्कण्डेयपुराणोक्तपद्यनिर्दिष्टा नित्यषोडशिकापदव्यवहार्या आसन् निगमात् चिरं पूर्वकाले आगमे।

ताभ्य एव षोडशभ्यो मातृकाभ्यः प्रथमं स्वराणां सम्भूतिः। तथा हि कण्ठ-तालुमूर्धदन्तोष्ठरूपेभ्यः पञ्चभ्यः स्थानेभ्योऽभिव्यक्ताभ्यो हयरलवरूपाभ्योऽर्धमातृक-मातृकाभ्यः क्रमशः अ-इ-ऋ-ऌ-उकाररूपाणां पञ्चानामेकमात्रिकमातृकाणामभिव्यक्ति-र्भवति। **'इग्यणः संप्रसारणम्'** इति सूत्रयन् भगवान् पाणिनिरिममर्थं परिपुष्णाति।

एकविंशतिर्वर्णा व्यवहारोपयोगिनः

एवं च हयरलवेत्यर्धमात्रा मातृकाः संप्रसृताः अ-इ-ऋ-ऌ-उरूपं धारयन्ति। अनया रीत्या एकविंशतिर्वर्णा व्यवहारोपयोगिनः सञ्जाताः। यथा हि प्रत्येकस्मात् स्थानात् षोडशमातृकान्तर्गतानां तिसृणां मातृकाणां समुदयः, तथैव प्रत्येकस्मात् स्थानाद् एकैकस्य स्वरस्योद्भूतिर्युक्तियुक्ता प्रतिभाति। अस्यां स्थितौ व्यवहारपथे बिन्दुरूपः पिता एकविंशतिभिर्मातृकाभिर्युक्तोऽभिधेयमर्थं बोधयितुमावृत्तः पदवाक्यादि-रूपं धारयन् महावाक्यरूपेण सन्दर्भरूपेण च परिणमते।

---

१. तन्त्रेषु नित्यषोडशिकापदेन स्वरा गृह्यन्ते।

वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव ।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता[1] ॥

इत्यनया रीत्या मातृकासहितस्य पितुरेवेयं विभूतिर्येयं त्रयी विद्या ।

वर्णोच्चारणप्रक्रिया

तत्र प्रथममेषामन्येषां च वक्ष्यमाणानां वर्णानामुच्चारणोपयोगीनि स्थानादीनि अवसरप्राप्तानि निर्दिश्यन्ते । तथा चोक्तं शिक्षायाम्—

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च[2] ॥

इत्यष्टौ स्थानानि ।

स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतविवृततरविवृततमसंवृतभेदेन सप्ताभ्यन्तरप्रयत्नाः सन्ति । विवारसंवारौ श्वासनादौ घोषाघोषौ अल्पप्राणमहाप्राणौ उदात्तानुदात्तौ स्वरित इतीमे बाह्यप्रयत्नाः ।[3] आस्यबहिर्भूतकार्यजनकत्वेन बाह्यत्वमेषाम् । नासिकाऽपि

---

१. माघ० स० २।७२ ।   २. या० शि० १३ ।

३. 'तुल्यास्य·····' (अष्टा० १।१।९) इत्यत्र—'विवृततरौ वर्णावितौ' इति भाष्योद्द्योतादि-समालोचनया आकारो विवृततरेभ्योऽपि विवृततर इत्यायाति । तथा च सूत्राणि—'अथ शब्दोत्पत्तिः' (तै० प्रा० २।१), 'वायुशरीरसमीरणात् कण्ठोरसोः सन्धाने' (अ०२ सू०२), 'तस्य प्रातिश्रुत्कानि भवन्त्युरःकण्ठश्शिरोमुखं नासिके' (अ० २ सू० ३) इति ।

नागेशभट्टेन विवरणे **'तुल्यास्यप्रयत्नं सवर्णम्'** इत्यत्र 'तत्र पूर्वं स्पृष्टतादयश्चत्वारः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते' इति प्रदीपोपरि उद्द्योते 'भाष्ये प्रारम्भो यत्नस्येति, अत्र यत्नस्येति निर्धारणे षष्ठी । जातौ चैकवचनम्, आरम्भ इति कर्मणि घञ् । यत्नानां मध्ये प्रथमं वर्णोत्पत्तेः पूर्वमारम्यमाण इत्यर्थः । अत्रापि नासिकाया अग्रहणमुपपादितरीत्यैवेति बोध्यम् ।'

अत्रेदं बोध्यम्—शब्दप्रयोगेच्छयोत्पन्नयत्नात् नाभिप्रदेशात् प्रेरितो वायुर्वेगात् मूर्धपर्यन्तं गत्वा ततः प्रतिनिवृत्तो यत्नविशेषसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति । ततो यत्नविशेषसहायेन परावृत्तिसमये गलविवरादीनां विकासादीन् करोति । तत्र ये तत्तत्स्थानाभिघातका यत्नास्ते आस्यान्तर्गततत्तत्कार्यकारित्वाद् आस्ये प्रयत्ना इत्युच्यन्ते, आभ्यन्तरा इति प्रारम्भ इति च । गलविवरादिविकासादिकराश्च आस्यबहिर्भूतदेशे कार्यकरत्वाद् बाह्या इति ।

एवं मात्राकालिकत्वादिकमपि वाय्वल्पत्वमहत्त्वकृतमिति नाभिप्रदेशात् प्रेरकयत्न एव । कश्चिद् विलक्षणोऽल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य यत्नस्य वायुप्रेरणारूपं कार्यमास्यबाह्यदेशमिति तस्यापि व्यावृत्तिरास्यपदेनोक्ता 'अ इ उ ण्' सूत्रे भाष्ये । 'मूर्ध्नि प्रतिहते वर्णोत्पत्तेः पूर्वं स्पृष्टतादयः पश्चान्निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते' इति कैयटे ।

आस्यबहिर्भूतकार्यजननात् स्थानत्वेऽपि बहिर्गण्यते । एवं चैतानि स्थानादीनि वर्णोत्पत्तौ निमित्तकारणानि भवन्ति । तथा चैतदंशे वैयाकरणमतादभिन्नेन तैत्तिरीयप्रातिशाख्य-मतेन अनादिनिधनो विभुर्ब्रह्मव्यपदेशभाक् स्फोटः सर्ववर्णानामुपादानकारणं भवति ।

वर्गाणां तृतीयाः पञ्चमाश्चेत्यर्थः । इतरे वर्गाणां प्रथमाः शषसाश्चेत्यर्थः ।

इतः पूर्वं–संवारनादघोषाः, हकारः, विवारः, श्वासः, घोषश्च, अल्पप्राणः, महाप्राणः इति सप्त । स्वरविशेषहेतवस्तु उदात्तानुदात्तस्वरिता वक्ष्यन्ते । यद्यपि आन्तरतम्यपरीक्षायां हकारस्य नोपयोगस्तथापि तत्स्वरूपपरिचयस्तु अवश्यं विधेय इति कृत्वा स उपन्यस्तः ।

तानि च स्थानानि १. हनू, २. उत्तरोष्ठः, ३. तालुः, ४. वर्स्वाः ।

१ तत्र हनू—आस्यपार्श्वभागौ ।

४ वर्स्वाः—दन्तपङ्क्तेरुपरिष्टादुच्चप्रदेशः ।

(तै० प्रा० २।१८–त्रिभाष्यरत्नम्) इति ।

रेफटवर्गस्थानयोर्मध्यप्रदेशाः (वैदिकाभरणम्) (तै० प्रा० अ० २ सू० १८) ।

तालौ जिह्वामध्यमिवर्णे (तै० प्रा० अ० २ सू० २२) ।

३ तालुपदेन जिह्वाया अधस्तनः प्रदेश उच्यते (वैदिकाभरणम्) ।

तुल्यास्यसूत्रे 'किंपुनरास्ये भवम् ? स्थानं करणञ्च' इति भाष्ये स्थानकरणयो-र्निर्देशोऽत्यावश्यक इति मया तैत्तिरीयप्रातिशाख्यानुसारं प्रदर्शिते ते । प्रदीपे तु करणपदेन स्पृष्टतादीत्युक्त्वा प्रयत्नपदेन तद्ग्रहणसिद्धौ जिह्वाया अग्रोपाग्रमध्यमूलानां ग्रहणं निश्चितम् ।

अत्र वर्णोच्चारस्थानानि तैत्तिरीयप्रातिशाख्ये—

'हनुमूलं जिह्वामूलेन कवर्गे स्पर्शयति' (तै० प्रा० २।३५) ।

तालौ जिह्वामध्येन चवर्गे (तै० प्रा० २।३६) ।

जिह्वाग्रेण प्रतिवेष्टय मूर्धनि टवर्गे (तै० प्रा० २।३७) ।

जिह्वाग्रेण तवर्गे दन्तमूलेषु (तै० प्रा० २।३८) ।

ओष्ठाभ्यां पवर्गे (तै० प्रा० २।३९) ।

तालौ जिह्वामध्यान्ताभ्यां यकारे (तै० प्रा० २।४०) ।

रेफे जिह्वाग्रमध्येन प्रत्यग्दन्तमूलेभ्यः (तै० प्रा० २।४१) ।

दन्तमूलेषु च लकारे (तै० प्रा० २।४२) ।

ओष्ठान्ताभ्यां दन्तैर्वकारे (तै० प्रा० २।४३) ।

स्पर्शस्थानेषूष्माण आनुपूर्व्येण (तै० प्रा० अ० ३।४४) ।

करणमध्यं तु विवृतम् (तै० प्रा० २।४५) ।

कण्ठस्थानौ हकारविसर्जनीयौ (तै० प्रा० २।४६) ।

उदयस्वरादिसस्थानो हकार एकेषाम् (तै० प्रा० २।४७) ।

पूर्वान्तसस्थानो विसर्जनीयः (तै० प्रा० २।४८) ।

नासिक्या नासिकास्थानाः (तै० प्रा० २।४९) ।

मुखनासिक्या वा (तै० प्रा० २।५०) ।

तत्र शब्द विषये त्रीणि दर्शनानि सन्ति। तानि च वाक्यपदीये—

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।
कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः[१]॥

इति कारिकायां वायुः शब्दः, अणुः शब्दः, ज्ञानं शब्द इत्येवंभेदभिन्नानि त्रिविधानि मतानि प्रतिपादितानि सन्ति। इमानि त्रीण्यपि दर्शनानि अस्मच्छाखीयान्येव मन्तव्यानि।

यच्च मञ्जूषादिषु **'अणुः शब्द इत्यार्हता मन्यते'** इत्युक्तम्; तन्न सम्यक्। बहुषु स्थलेषु वाक्यपदीयटीकायाम्—**'अविक्रियाधर्मकं हि शब्दतत्त्वं ध्वनिं विक्रियाधर्माणमनुविक्रियते। तच्च सूक्ष्मे व्यापिनि ध्वनौ करणव्यापारेण प्रचीयमाने स्थूलेन अभ्रसंघातवदुपलभ्यमानेन नादात्मना प्राप्तविवर्तेन तद्विवर्तानुकारेण अत्यन्तमविवर्तमानं विवर्तमानमिव गृह्यते[२]'**—इत्यादिसन्दर्भेषु शब्दतत्त्वस्य, ध्वनौ विकृते सति, अभ्रसमूह इव प्रचीयमाने नादात्मना विवृत्ते अविवर्तमानत्वं विवर्तमानत्वमिव गृह्यते, इत्याद्युक्तिभिरणूनामित्ययं पक्षोऽपि वैयाकरणकुलस्यैव नत्वार्हतानामेव। एतत्सर्वं पीठिकायां विस्तरेण विवेचयिष्यते।

वर्णविशेषसृष्टिः, स्थानप्रयत्नविवेकः

ननु स्थानैक्येऽपि कथं वर्णभेदः ककारखकारयोरुभयोरपि कण्ठस्थानीयत्वात्? अत्रोच्यते—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्यासात्।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्[३]॥

इति तैत्तिरीयप्रातिशाख्योक्त्या अनुप्रदानादिरूपनिमित्तभेदस्य वर्णभेदे करणत्वमवधेयम्।

तथाहि—१. अनुप्रदानं नादादि, २. संसर्गो वायोः स्थानेष्वभिघातः। स च वायुस्त्रिप्रकारः—अयःपिण्डनिभः, दारुपिण्डसंकाशः, ऊर्णापिण्डसदृशश्चेति। स्पर्शानां यमानां चाभिव्यञ्जको वायुरयःपिण्डवत्, अन्तस्थानामुद्भावकोऽसौ दारुपिण्डवत्, ऊष्मणां स्वराणां च व्यञ्जक ऊर्णापिण्डवत् स्थानान्यभिहन्ति। स्थानं हनुमूलादि, ४. करणम् ओष्ठादि। तस्य वैविध्येन स्पर्शनं स्पृष्टतादि। ५. परिमाणं मात्रादिकालः। एभ्यो निमित्तेभ्यो वर्णानाम् असाधारणरूपेण भेदः सम्पद्यते।

परिमाणत्वेन वर्णविभागः स्वरवर्णमात्रविषयः

तैत्तिरीयप्रातिशाख्ये तु—**'परिमाणरूपं निमित्तं तु स्वराख्यवर्णमात्रविषयम्। अत एव तत् पार्थक्येनोक्तम्। तेन व्यञ्जनानां ङकारानुस्वारादीनां कालभेदे वर्णान्यत्वं न भवति'[४]** इत्याद्युक्तम्।

---

१. वा० प० १।१०८। २. वा० प० १।४८—टीकायाम्।
३. तै० प्रा० २३।२। ४. तै० प्रा० २३।२।

एवं च तैत्तिरीयाणां मतेऽनुस्वारस्य द्विमात्रत्वेऽपि न तद्वर्णद्वैविध्यमित्यायाति। पाणिनीयशिक्षादीक्षितानां तु चतुःषष्टित्वसम्पादने तद्द्वैविध्यमेव कारणम्। अत एव तत्तच्छाखादिभेदेन वर्णसंख्यापि भिद्यते।

स्थानैक्येऽपि अनुप्रदानप्रयुक्तो भेदः

एवं च ककारखकारयोः स्थानैक्येऽपि अल्पप्राणमहाप्राणरूपानुप्रदानभेदात्तयोर्भेदः सूपपादः। खकारघकारयोर्महाप्राणत्वेऽपि अघोषघोषरूपानुप्रदानभेदाद् भेदः सुकरः। कगयोरल्पप्राणत्वेऽपि अघोषघोषरूपानुप्रदानभेदाद् भेदः समर्थनीयः। अनयैव रीत्या सर्वेषु वर्णेषु भेदो बोद्धव्यः। विस्तरभिया नाधिकमुच्यते।

विवारसंवारयोरेवोपादाने आन्तरतम्यसिद्धौ अन्येषामुपादानस्यावश्यकता

ननु—**'खरो विवाराः श्वासा अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः'** इत्येवंरूपेण वर्णानां प्रयत्नविभागे विवारश्वासाघोषेषु संवारनादघोषेषु चैकेन विचारेण संवारेण चापेक्षितकार्यनिष्पत्तौ कथमन्ययोर्द्वयोरुपादानम्? अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानां च बाह्यप्रयत्नः क इति चेदत्र प्रक्रियाकौमुदीटीकायां प्रसादे समुपन्यस्त एव सन्दर्भः शङ्कोत्तरणेऽनुसन्धेयः। तथाहि संज्ञाप्रकरणे—**'तुल्यास्यप्रयत्नं सवर्णम्'**[2] इति सूत्रोपरि 'तत्र नाभिप्रदेशात् प्रयत्नप्रेरितः प्राण ऊर्ध्वमाक्रामन् कण्ठप्रभृतीनामन्यतरस्मिन् स्थाने प्रयत्नेन विधार्यमाणः स्थानमभिहन्ति। तस्मात् स्थानाभिघाताज्जातो ध्वनिः साकाशे वर्णश्रुतिः। स वर्णस्यात्मलाभः। तत्र ध्वनावुत्पद्यमाने यदा कण्ठादिस्थानं जिह्वाग्रोपाग्रमध्यमूलानि करणानि प्रयत्नेन परस्परं स्पृशन्ति, सा स्पृष्टता। ईषद् यदा स्पृशन्ति, सा ईषत्स्पृष्टता। सामीप्येन यदा स्पृशन्ति, सा संवृतता। दूरेण यदा स्पृशन्ति, सा विवृतता। एते आभ्यन्तरत्वं त्वेषां स्थानकरणप्रयत्नव्यापारेणोत्पत्तिकाल एव भावात्।

बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयोगिन इत्याचार्यवर्यैर्नोक्ताः। अस्माभिस्तु वर्णानामान्तरतम्यज्ञानायोच्यन्ते। ते चैकादश--विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेति। तत्र पूर्वोक्त एव वायुर्यदा मूर्ध्नि प्रतिहतो निवृत्तः कोष्ठमभिहन्ति, तत्र यदा गलबिलस्य संवृतत्वं तदा संवारो नाम वर्णधर्मो जायते। यदा विवृतत्वं तदा विवारः। संवृते गलबिले अव्यक्तशब्दो नादः। विवृते श्वासः। श्वास उपरिवर्ती वायुः। तौ श्वासानुप्रदानौ अनुप्रदानमित्याहुः। अनु पश्चात् प्रदीयते इति। तत्र यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते, तदा श्वासध्वनिसंसर्गादघोषः। महति वायौ महाप्राणः। अल्पे अल्पप्राणः।

१. सि० कौ० संज्ञाप्रकरम्। २. अष्टा० १।१।९।

यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रः स्यात्, तदा गात्रस्य निग्रहः कण्ठविवरस्य चाणुत्वं स्वरस्य च रौक्ष्यं स्यात्तमुदात्तमाहुः । यदा तु मन्दः प्रयत्नः स्यात्, तदा गात्रस्य स्रंसनं कण्ठविवरस्य महत्त्वं स्वरस्य च स्निग्धता स्यात् सोऽनुदात्तः । उदात्तानुदात्तसम्बन्धात् स्वरितः । वर्णोत्पत्तिकालानन्तरमुत्पत्तेर्बाह्यत्वमेषाम् ।

तत्र वर्गाणां प्रथमद्वितीयाः शषसा विसर्जनीय ᳲक ᳲपा विवृतकण्ठाः श्वासानुप्रदाना अघोषाः । वर्गाणां तृतीयचतुर्था अन्तस्था नासिक्या ह्यनुस्वारौ च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च । वर्गाणां प्रथमतृतीया अन्तस्थाश्च अल्पप्राणाः । इतरे सर्वे महाप्राणाः । यथा तृतीयास्तथा पञ्चमाः । आनुनासिक्यमेषामधिको गुणः । एते बाह्याः प्रयत्नाः । तत्र यमा नाम वर्गेष्वादितश्चतुर्णां पञ्चमेषु परतो ये त एव नासिक्याः जायन्ते । यथा—'पलिक्क्नीः', 'चख्ख्नतुः', 'आग्ग्मं जघ्घ्नतुः' अप्नस्वतीत्यादौ कुं खुं गुं घुं इति[1] इति ।

तैत्तिरीयप्रातिशाख्यानुसारं वर्णोत्पत्तिप्रक्रिया

तैत्तिरीयप्रातिशाख्यानुसारं तु कोष्ठ्यस्य वायोः शरीरे यत्समुत्थानं प्रयोज्यव्यापारः, तस्मादित्यर्थः । यद्वा समीरणादित्यत्र ण्यन्तात् ल्युट्प्रत्ययः । तथा च तस्य वायोः शरीरे यत् समुत्थापनं प्रयोजकव्यापारस्तस्मादित्यर्थः । एवं च कण्ठस्य उरसश्च मध्याकाशे शब्दस्योत्पत्तिर्भवति । तस्य सामान्यरूपस्य शब्दस्य विशेषरूपप्राप्तौ उरः, कण्ठः, शिरो मुखं नासिका इति पञ्च स्थानानि ।

तत्र मुखपदेन उत्तरदन्ताः, तन्मूलमुत्तरोष्ठो हनुमूलं तालु च । नासिकापदेन नासिकाच्छिद्रयोः कण्ठासन्नप्रदेश उच्यते । एतानि स्थानानि तस्य वर्णात्मकस्य शब्दस्य विशेषरूपनिष्पत्त्यर्हाणि भवन्ति ।

'वर्णोत्पत्त्यनन्तरभावी सवर्णसंज्ञानुपयुक्त आन्तरतम्यपरीक्षोपयुक्तश्च बाह्यप्रयत्नः[2]' इत्यर्थकं यदुक्तं व्याकरणस्य बहुषु पुस्तकेषु तन्न सम्यक्; बाह्यप्रयत्नमन्तरा वर्णविशेषोत्पत्तेर्दूरापास्तत्वात् । वक्ष्यमाणतैत्तिरीयप्रातिशाख्ये तथानुक्तेः ।

तत्र हि त्रिविधा वर्णाः—केचन नादप्रकृतयः, अपरे श्वासप्रकृतयः, अन्ये च हकारप्रकृतयः । तत्र संवृते कण्ठे यः शब्दः क्रियते स, नादसंज्ञो भवति । संवरणं नाम कण्ठस्य सङ्कोचः । स खलु संवारो नाम बाह्यप्रयत्नः । तस्मिन् प्रयत्ने सति नादाख्यो बाह्यः प्रयत्नो जायते । विवरणं कण्ठस्य विस्तरणम्, स एव विवाराख्यो बाह्यः प्रयत्नः । तस्मिन् सति श्वासो नाम बाह्यः प्रयत्नः क्रियते ।

---

१. अष्टा० १।२।९—सूत्रस्योपरि प्रक्रियाकौमुदी—प्रसादटीका—पृ० १८ ।
२. शब्देन्दुशेखरः–पृ० २९–नित्यानन्दपर्वतीयसंस्करणम् ।

तद्ध्वनिसंसर्गादघोषो नाम बाह्यः प्रयत्नो जायते। मध्ये नाम प्रकृतिस्थे नापि संवृते नापि विवृते कण्ठे हकारो नाम बाह्यः प्रयत्नः क्रियते। तेन च व्यञ्जनेषु घोषो जायते।

बाह्यानां न वर्णोत्पत्त्यनन्तरभावित्वम्

ते नादश्वासहकारा वर्णानां विशेषरूपोत्पत्तौ प्रथमकारणानि। तथा चोक्तं प्रातिशाख्ये—**'ता वर्णप्रकृतयः'**[1] इति सूत्रे। अत्र कृतिशब्दः करणसाधनः, कर्तुमारभ्यन्ते आभिर्वर्णा इति प्रकृतयः प्रथमकारणानीत्यर्थः। एवं च प्राग्भावित्वात् कारणानां बाह्यप्रयत्नरूपकारणानां न हि वर्णोत्पत्त्यनन्तरभावित्वम्।

तथा च स्वरेषु घोषवत्सु च वर्णेषु नादोऽनुप्रदानं भवति। अयं भावः—कोष्ठ्यवायुसमुद्भावात् परं मूर्ध्नि प्रतिघातान्निवृत्ते तस्मिन् वायौ कण्ठस्य संवारादयो यथोक्तास्तिस्रोऽवस्था भवन्ति। तदा प्रदीयन्ते स्थानेषु निवेश्यन्ते एभिर्वर्णा इत्यनुप्रदानानि।

हकारे चतुर्थेषु वर्णेषु च हकारः अनुप्रदानं भवति। तथा च हचतुर्था घोषवत्सु महाप्राणाः। इतरे अल्पप्राणाः। अघोषेषु श्वासः अनुप्रदानं भवति।

'भूयान् प्रथमेभ्योऽन्येषु'[2] इति सूत्रेण प्रथमव्यतिरिक्तेषु अघोषेषु प्रकृष्टः श्वासः अनुप्रदानं भवति। ततश्च प्रथमा अल्पप्राणाः, इतरे तु महाप्राणाः। पूर्वोक्ते सन्दर्भे रूपविशेषहेतवो बाह्यप्रयत्ना उक्ता दर्शिताश्च। स्वरविशेषहेतवस्तु उदात्तादयो वक्ष्यन्ते।

स्थानकरणाभ्यन्तरप्रयत्नानामुपन्यासः, तत्र स्वराणां स्थानादीनि

अथात्र स्थानकरणे आभ्यन्तरप्रयत्नाश्च वक्ष्यन्ते। १. तथा च अकारस्य हनू स्थानम्, ओष्ठौ करणम्, संवृतः प्रयत्नः। २. दीर्घप्लुतयोरवर्णयोस्तु स्थानकरणे ते एव, विवृतस्तु प्रयत्नः। ३. इवर्णस्य तु तालु (जिह्वाया अधस्तनः प्रदेशः) स्थानम्, जिह्वामध्यं करणम्। **'तालु जिह्वा च इवर्णस्य करणम्'** (अ० २ सू० ३२) इति वैदिकाभरणे। ४. उवर्णस्योत्तरोष्ठः स्थानम्, अधरोष्ठः करणम्। ५. ऋ ॠ ऌ एषां वर्स्वाः (दन्तमूलोन्नतभागः) स्थानम्, जिह्वा हनू च करणम्। **'ओष्ठौ हनू जिह्वा च करणम्'**[3] इति वैदिकाभरणे। ६. एकारस्य हनू तालु च स्थानम्, ओष्ठौ जिह्वामध्यं च करणम्। **'ओष्ठौ जिह्वा च करणम्'**[4] इति वैदिकाभरणे। ७. ऐकारस्य हनू तालु च स्थानम्, ओष्ठौ जिह्वा च करणम्। ८. ओकारस्य हनू उत्तरोष्ठश्च स्थानम्, ओष्ठौ करणम्। ९. औकारस्यापि पूर्वोक्तमेव सर्वम्। प्रयत्नस्तु अधस्तनानां विवृतम्।

---

१. तै० प्रा० २।७। २. तै० प्रा० २।११।
३. तै० प्रा० २।३२। ४. तदेव–२।१६।

तैत्तिरीये संवृतविवृतावेव प्रयत्नौ

यद्यपि तैत्तिरीयप्रातिशाख्ये संवृतविवृतौ द्वावेव प्रयत्नौ अत्युपसंहृतातिव्यस्त-पदाभ्याम् आश्लेषविश्लेषार्थकाभ्यां स्पर्शयति, शब्दसूचितः स्पृष्टप्रयत्नश्चेति त्रय आभ्यान्तराः प्रयत्नाः प्रदर्शिताः, तथापि स्पृष्टत्वव्याप्यत्वेनेषत्स्पृष्टस्यापि ग्रहणम्। एवमेव व्यापकस्य विवृतस्योपादानेन व्याप्यानाम् ईषद्विवृतविवृततरविवृततमानामपि ग्रहणं सूपपादम्। **'नाज्झलौ'** इति सूत्रयता पाणिनिना स्पृष्टेषत्स्पृष्टविवृतसंवृतरूपा-श्चत्वार एवाभ्यन्तरप्रयत्नाः सूचिताः।

तैत्तिरीयमते ऋऌवर्णयोरिति वार्त्तिकस्यानुत्थितिः

तैत्तिरीयप्रातिशाख्ये ऋ ॠ ऌ इत्येतेषामेकस्थानजन्यत्वात् सवर्णसंज्ञासिद्धौ ऋऌवर्णयोरिति वार्त्तिकस्यानुत्थितिः। एषां तैत्तिरीयाणां मतेन ऌकारोच्चारणं वर्त्स्वैनैव क्रियते। तत्र वर्त्स्वा इति बहुवचनोपादानेन तस्य स्थानस्य शरीरं महदस्ति। ऋऌवर्णयोः स्थानभेदः स्थानैक्यं चोच्चारणस्य शैल्या भेदेन कर्तुं शक्यते।

उच्चारणशैलीभेदात्स्थानभेदः

अथोच्चारणरीतिः प्रदर्श्यते—ह्रस्वाकारे उच्चारणीये ओष्ठौ हनू च नात्यन्त-मुपश्लिष्टे तेनायं संवृतः। दीर्घप्लुतयोस्तु तयोर्विश्लेषभूयस्त्वम्, तेन तौ विवृतौ। ओकारे उच्चार्यमाणे नातिव्यस्तता हन्वोः, ओष्ठयोस्तु उपश्लिष्टतरता, तेन विवृत-प्रयत्नता। एकारोच्चारणे ओष्ठौ ईषत्प्रकृष्टौ हनू तु उपश्लेषिततरे। **'तालौ जिह्वामध्य-मिवर्णे'**[१], **'एकारे च'**[२] तेनास्य हनू तालु च स्थानम्। ओष्ठौ जिह्वामध्यं च करणम्। जिह्वाया मध्यं जिह्वामध्यम्, तस्य अन्तौ ताभ्याम् उत्तराञ्जम्भ्यान् स्पर्शयति। हनुमूलयोरुपरिप्रदेशा उत्तरजम्भ्याः। अत्र अव्यञ्जनपूर्वक एकारे स्पर्शनम्। व्यञ्जन-पूर्वके तु न स्पर्शनम्। दन्तपङ्क्तेरुपरिष्टात् प्रदेशेषु (वर्त्स्वेषु) हन्वोः परस्परोपश्लेषः जिह्वाग्रस्य वर्त्स्वेषूपसंहारश्च कार्यः, ॠकारे ऋकारे ऌकारे चोच्चार्यमाणे।

अन्येषां मतेन अनुस्वारे हनूपसंहारः कार्यः। स्वरभक्तौ जिह्वाग्रस्य वर्त्स्वेषु उपसंहारः कार्य इत्यर्थः। तेषां मते अनुस्वारस्तावन्नासिक्यः। स्वरभक्तिरप्यर्कारार्ध-रूपेति। स्वमते तु वक्ष्यति आनुनासिक्यम्। **'अनुस्वारोत्तमा अनुनासिकाः'**[३], **'नासिका-विवरणादानुनासिक्यम्'**[४] स्वरभक्तेस्तु रेफस्थानादिकं भवति। **'रेफस्वरभक्तिः'**[५] इति हि वक्ष्यति।

इवर्णे उच्चार्यमाणे जिह्वामध्यं तालुनि जिह्वाया अधस्तनप्रदेशे उपसंहर्तव्यम्। तद् (जिह्वाया अधस्तनः प्रदेशः) इवर्णस्य स्थानम्, जिह्वामध्यं करणम्। सव्यञ्जने

---

१. तै० प्रा० २।२२; २. तदेव—२।२३।
३. तै० प्रा० २।३०; ४. तदेव—२।५२; ५. तदेव—२१।१५।

एकारे उच्चार्यमाणे जिह्वामध्यं तालुनि उपसंहर्तव्यम्। तथा च सव्यञ्जनस्यैकारस्य तालु स्थानं जिह्वामध्यं करणम्। उवर्णे उच्चार्यमाणे ओष्ठयोरुपसंहारः परस्परं श्लेषः। अत्रोपसंहारो न हि सन्निकृष्टतामात्रम्, किन्तु सन्निकृष्टौ ओष्ठौ दीर्घौ च स्याताम्। अकारस्य अर्धम् ऐकारस्य औकारस्य च आद्यवयवो भवति। तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति। एकेषां मते तु संवृतकरणतरम् अनयोरादिर्भवति। स्वमते तु संवृतकरणमेव। ऐकारस्य अवशिष्टोऽर्धः अध्यर्धमात्र इकारः। तेन तदीयाः स्थानकरणप्रयत्नास्तस्मिन्नंशे भवन्ति। औकारस्य उकारोऽध्यर्धमात्रः शेषो भवति, तेन तदीयाः स्थानकरणप्रयत्नास्तस्य भवन्ति।

अनुस्वार उत्तमाश्चानुनासिका भवन्ति। अनुस्वारोऽप्युत्तमवद् व्यञ्जनमेवास्मच्छाखायाम्[1], अर्धगकाररूपत्वात्। स्वराणां यत्रोपसंहारः संश्लेषविशेषस्तत्स्थानम्। यदङ्गमङ्गान्तरे वक्त्रा उपसंह्रियते तत् करणम्।

अथ व्यञ्जनानां स्थानादीनि

'अन्येषां तु यत्र स्पर्शनं तत् स्थानम्' [2]। स्वरेभ्योऽन्येषां व्यञ्जनानां तत् स्थानं यत्र स्पर्शनं क्रियते। यथा हनुमूलं कवर्गस्य। तालु चवर्गस्य। मूर्धा टवर्गस्य। दन्तमूलानि तवर्गस्य। उत्तरोष्ठः पवर्गस्य। तालु दन्तमूलानि दन्ता इत्यन्तस्थानाम्। ऊष्मादिषु स्पर्शनाभावादतिदेशादिना स्थानावगतिः।

'येन स्पर्शयति तत् करणम्'[3] व्यञ्जनानां तत्करणं येनाङ्गेन तत् स्थानं स्पर्शयति। यथा जिह्वा कवर्गादीनां चतुर्णां वर्गाणां यरलवानां च। अधरोष्ठः पवर्गवकारयोः। ऊष्मादीनां तु करणावगतिर्वक्ष्यते।

व्यञ्जनोच्चारणप्रक्रिया

अथ व्यञ्जनानामुच्चारणप्रक्रियोच्यते—कवर्गे उच्चार्यमाणे जिह्वामूलेन हन्वोर्मूलयोर्वर्णान् प्रापयेत्। कर्मत्वाविवक्षया अधिकरणत्वं विवक्षितं हनुमूलादीनाम्। चवर्गे कार्ये जिह्वामध्येन तालौ स्पर्शयेत्। टवर्गे कार्ये प्रतिवेष्टितेन जिह्वाग्रेण वर्णान् मूर्धनि स्पर्शयेत्। **'मूर्धशब्देन वक्त्रविवरोपरिभागो विवक्ष्यते'** इति त्रिभाष्यरत्नकृत्। **'शिरः'** इति वैदिकाभरणकारः[4]।

पवर्गे कार्ये ओष्ठाभ्याम् अन्योन्यं स्पर्शयेत्। अत्रोत्तरोष्ठः स्थानम्, उत्तरत्वसाम्यादेषां स्थानानाम्। अधरोष्ठः करणम्। तत्राधरेण तु विचाल्यतरेण उत्तरं स्पर्शयति। जिह्वाया मध्यं तस्य अन्तौ ताभ्यां तालौ स्पर्शयेद् यकारे उच्चार्यमाणे। रेफे कार्ये जिह्वाग्रस्य मध्येन दन्तमूलस्याभ्यन्तरे उपरिभागे स्पर्शयेत्।

---

१. तैत्तिरीयशाखायाम्। २. तै० प्रा० २।३३।
३. तदेव–२।३४। ४. तै० प्रा० २।३७।

'ओष्ठान्ताभ्यां दन्तैर्वकारे'[१] शब्देनात्र अधरोष्ठ उच्यते। ओष्ठस्य बाह्याभ्यन्तर-भेदेन द्वौ भागौ स्तः। दन्तैरिति सप्तम्यर्थे तृतीया। तथा च वकारे कार्ये उत्तरदन्तेषु अधरोष्ठस्याभ्यन्तरेणान्तभागेन स्पर्शयेदित्यर्थः सम्पद्यते। यत्र त्वसौ ओष्ठोपसंहार-योरोष्ठ्यस्वरयोर्मध्यवर्ती भवति, तत्र सामार्थ्याद् बाह्यः अन्तः करणं भवति। यकारा-दीनां चतुर्णां करणान्तव्यापारनिष्पाद्यत्वादन्तस्था इत्याख्या।

'स्पर्शस्थानेषूष्माण आनुपूर्व्येण,'[२] हकारस्य स्थानं पृथग् वक्ष्यते। ततोऽन्येषां पञ्चानां जिह्वामूलीय-श-ष-सोपध्मानीयानाम्। आनुपूर्व्येण कवर्गादीनां पञ्चानां वर्गाणां स्थानेषु उत्पत्तिर्भवति। तेषाम् ऊष्मणां करणमध्यं यदा विवृतं भवति, तदा ते स्वस्वरूपं लभन्ते। तेन एषां विवृतप्रयत्नता सिध्यति। तत्र प्रथमस्य ऊष्मणो हनुमूलोत्पादिनो जिह्वामूलौपलम्भात् जिह्वामूलीय इत्याख्याऽवकल्प्यते। हकारस्य तु उत्तमपरस्य अन्तस्थापरस्य च उरःस्थानं वेदितव्यम्। एतद्भिन्नश्च हकारः कण्ठ-स्थानः। तथा चोक्तं शिक्षायाम्—

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम्।
उरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतम्[३] ॥ इति।

करणानुक्तौ स्थानमेव करणं वेदितव्यम्, **'शेषाः स्थानकरणाः'**[४] इत्यापिशलि-शिक्षावचनात्।

'उदयस्वरादिसस्थानो हकार एकेषाम्'[५] एकेषां मतेन हकारात् परस्य वर्णस्य य आदिस्तत्समानस्थानो हकारो भवतीत्यर्थः। ऐकारौकारयोरंशद्वयं भिन्नस्थानं भवति, ताभ्यां पूर्वे हकारे स्थानसंशयो मा भूदिति आदिशब्द उपादीयते।

विसर्जनीयः पूर्वस्वरस्य अन्तेन समानस्थानो भवति एकेषां मतेन। अन्तग्रहण-मपि एतदैकारौकारयोरसन्देहार्थम्।

नासिक्या यमा नासिकास्थाना भवन्ति। मुखनासिक्या वा। एवमुक्तस्य पक्षद्वयस्य व्यवस्थाऽऽश्रयितव्या। स्पर्शेभ्यः परे प्रथमादिव्यपदेशभाजो मुखनासिक्याः। हकारात् परस्तु नासिकामात्रस्थान इति।

'वर्गवच्चैषु'[६] अत्र ये मुखनासिक्या अनन्तरोक्ताश्च शब्दा अन्वादिष्टाः, तेषु वर्गवत् स्थानयोगो भवति।

एतदुक्तं भवति—मुखशब्देनात्र पञ्चापि वर्गस्थानानि संगृहीतानि। तत्र कवर्गीयात् परस्य नासिक्यस्य हनुमूलं तावद् द्वितीयं स्थानं भवति। चवर्गीयात् परस्य तालु। एवं तत्तद्वर्गीयात् परस्य तत्तद्वर्गस्थानं द्वितीयस्थानमित्यवगन्तव्यम्।

---

१. तै० प्रा० २।४३। २. तै० प्रा० २।४४। ३. पा० शि० १५।
४. तै० प्रा० २।४६। ५. तदेव–२।४७। ६. तदेव–२।५१।

अनुनासिका ये वर्णा अनुस्वारोत्तमास्तेषामानुनासिक्यं नासारन्ध्रस्य विस्ताराद् भवति। नासिक्येषु नासिका संवृतैव भवति। ळकारस्य तु स्थानादिकमत्र नोच्यते संहितायां तदभावात्।

यमानां स्वरभक्तेश्च विचारः

अत्र यमानां स्वरभक्तेश्च विचारः क्रियते। तत्र **'स्पर्शादनुत्तमादुत्तमपरादनुपूर्व्यान्नासिक्याः'**[1] उत्तमव्यतिरिक्तेभ्यः प्रथमादिभ्यः स्पर्शेभ्य उत्तमपरेभ्यः परत आनुपूर्व्यात् प्रथमादयो नासिक्या आगमा भवन्ति। तदुदाहरणानि विस्तरभयान्नोच्यन्ते। पीठिकायां विशेषतो विचारो भविष्यति। **'तान् यमानेके'**[2] तान् नासिक्यान् एके शाखिनो यमान् ब्रुवते। **'हकारान्नणमपरान्नासिक्यम्'**[3] नकारणकारमकारपराद् हकारात् परतो नासिक्यागमं केचिदिच्छन्ति।

नन्वयमागमविधिर्नोपपद्यते प्रथमानिर्देशाभावात्। नैतदस्ति—अस्ति ह्यत्र प्रथमानिर्देशः **'आनुपूर्व्यान्नासिक्याः'**[4] इति। तेनास्मिन् प्रकरणे आगमविधानमुपपद्यते। हकारादिति पञ्चमीनिर्देशश्चागमविधावेवोपपद्यते। यथा—**'अघोषादूष्मणः परः'**[5], **'स्पर्शादनुत्तमात्'**[6] अस्मिंस्तु सूत्रे द्वितीयानिर्देश एकेशब्दान्वयार्थः।

नन्वयं शब्दान्तरादेशः किं न स्यात्? विकारिणोऽनुपदेशात्। सतो हि कार्यिणः कार्येण भवितव्यम्। असति तस्मिन् कस्यादेशः स्यात्? गुणविधिस्तु नैव घटते। गुणविकारिणो गुणशब्दस्य च प्रथमानिर्देशे हि स भवति, तस्मादिह सूत्रशक्त्या वर्णान्तरागमविधिनिश्चयाच्छिक्षायामनुक्तोऽपि पञ्चमो नासिक्योऽस्माकमवश्याभ्युपगन्तव्यः। हकारस्य मकारान्तस्थापरस्योच्चारणे विशेषः शिक्षायां स्मर्यते—

न वायुं हमसंयोगे नासिकाभ्यां समुत्सृजेत्।
न वदेदुरसाऽत्यन्तं तथा यरलवेषु च॥

'रेफोष्मसंयोगे रेफः स्वरभक्तिः'[7] रेफस्योष्मणश्च संयोगे सति तत्रोष्मसंयुक्तो रेफः स्वरभक्तिरिति जानीयात्। भक्तिः अवयवः। योऽस्य रेफस्य समानकरणः स्वरस्तद्भक्तिः स्यात्। ऋकारश्चास्य जिह्वाग्रकरणत्वेन श्रुत्या च समानधर्मा। अर्थादेकमात्रिकस्य ऋकारस्य आदिः, अणुमात्रः स्वरः मध्ये रेफः, अर्धमात्रः अन्तेऽप्यणुमात्रः स्वरभागः एतद् ऋकारस्वरूपम्। अत्र ऋकारमध्यवर्तिनि रेफे विभज्यमाने सति तौ भागौ पूर्वोत्तराणुसहितौ प्रत्येकं स्वरभक्तिनामधेयं भजेते। सा च स्वरभक्तिरर्धमात्रा। क्व का स्वरभक्तिरित्याशङ्क्य शिक्षाकारैरुक्तम्—

---

१. तै० प्रा० २१।१२। २. तदेव–२१।१३।
३. तदेव–२१।१४। ४. तदेव–२१।१२।
५. तै० प्रा० १४।९। ६. तदेव–२१।१३। ७. तदेव–२१।१५।

शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम् ।
शषसेषु विवृतां हकारे संवृतां विदुः ॥ इति ।

स्वरभक्त्यन्तरमपि शिक्षायामुक्तम्—

करेणुः कर्विणी चैव हरिणी हारितेति च ।
हंसपदेति विज्ञेयाः पञ्चैताः स्वरभक्तयः ॥

कीदृश्यः क्व च एता इति चेत्—

करेणू रहयोर्योगे कर्विणी लहकारयोः ।
हरिणी रशसानां च हारिता लशकारयोः ॥
या तु हंसपदा नाम सा तु रेफषकारयोः ।
एवं पञ्चविधां भक्तिमुच्चरेत् स्वर्गकामुकः[1] ॥

विस्तरस्तु पीठिकायां द्रष्टव्यः । उदात्तादिस्वरविषयकोऽपि विचारस्तत्रैव करिष्यते ।

यजुःप्रातिशाख्यानुसारं वर्णोपन्यासः

तैत्तिरीयानन्तरं यजुःप्रातिशाख्यमतेन वर्णोपन्यासः । तत्र अ आ इ ई उ ऊ ऋ ॠ ऌ[2] ए ऐ ओ औ आ ३, ई ३ ओ ३ इति षोडश स्वराः । तेषु अ इ उ ऋ इति चत्वारो ह्रस्वदीर्घभेदेन अष्टौ, ऌकारः एकः, सन्ध्यक्षराणि चत्वारि । संकलनया त्रयोदश । शुक्लयजुर्वेदे आ३ ई३ ओ३ इति त्रय एव प्लुताः । एवं षोडशैव स्वराः (१६) शुक्लयजुःशाखिनाम् । पञ्चविंशतिः स्पर्शाः (२५) । चत्वारोऽन्तस्थाः (४) । चत्त्वार ऊष्माणः (४) । अनुस्वारविसर्गौ द्वौ (२) । यमाश्चत्वारः (४) । तथा च माध्यन्दिनानां पञ्चपञ्चाशदेव वर्णाः सन्ति । एषां विशेषेण विचारः पीठिकायां करिष्यते । तत्र हि प्रथमेऽध्याये—

त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः ।
द्विचत्वारिंशद् व्यञ्जनानि एतावान् वर्णसंग्रहः[3] ॥

'प्लुताश्चोक्तवर्जम्'[4], इत्यनेन **'सर्वमग्ना३'**, **'इ लाजी३ञ्छाचो३निति त्रिमात्राणि च'**[5] **'प्रणवश्च'**[6], **'विवेशा ३ इति चानुदात्तम्'**[7] **'आसी ३ दिति चोत्तरं विचार'**[8] एभिः सूत्रैरुक्तेभ्यः प्लुतेभ्योऽन्ये स्वराः प्लुता न सन्ति माध्यन्दिनानाम् ।

अस्मिन् प्रातिशाख्ये प्रारम्भे वर्णसमाम्नायमनुपन्यस्य अन्तिमेऽष्टमाध्याये वर्णा उपन्यस्ता इति विशेषः । भाष्यकारेण अनन्तभट्टेन **'वर्णसमाम्नायस्य सर्वोपयोगित्वाद्**

---

१. तै० प्रा० २१।१५ । २. ऌकारप्रयोगोऽन्वेषणीयः । ३. शु० यजुः प्रा० ८।२८ ।
४. तदेव–८।३० । ५. तदेव–२।५० ।
६. तदेव–२।५१ । ७. तदेव–२।५२ । ८. तदेव–२।५३ ।

यद्यपि प्रथमाध्याय एव वक्तुमुचितः, तथापि मुनेः स्वतन्त्रेच्छत्वात् अन्तिमाध्याये कथ्यते' इत्युक्तम् । तथा च तन्मतस्यापि प्रथममस्योपन्यासः उचित इत्यायाति ।

'तस्मिलँ् ळ्ह जिह्वामूलीयोपध्मानीयनासिक्या न सन्ति, माध्यन्दिनानाम्[१]' 'ऌकारो दीर्घः प्लुताश्चोक्तवर्जम्[२]' इति सूत्रप्रामाण्यात् पञ्चपञ्चाशदेव वर्णा माध्यन्दिनानां शाखायां सिध्यन्ति । पञ्चषष्टेर्वर्णानां तत्रोपन्यासस्तु सम्भाव्यमानवर्णदृष्ट्या मन्तव्यः । एषां वर्णानां स्थानप्रयत्नादिकन्तु पीठिकायां प्रदर्शयिष्यते ।

ननु सति कुड्ये चित्रमिति न्यायेन वर्णोपदेशानन्तरमेव **'सिमादितोऽष्टौ स्वराणाम्[३]', 'सन्ध्यक्षरं परम्[४]', 'व्यञ्जनं कादि'** इत्यादीनां सूत्राणामुपन्यासो युक्तः ।

अत्र प्रातिशाख्ये तु अष्टमाध्याये वर्णसमाम्नायो निर्दिष्टोऽस्ति । किञ्च तत्र अ इति आ इति आ ३ इतीत्येवंरूपेण प्लुतानामप्युपन्यासात् **'सिमादितोऽष्टौ स्वराणाम्[५]'** इत्यादिना सूत्रेण स पाठो ग्रहीतुं न शक्यते 'अ आ इ ई उ ऊ ऋ ॠ' इत्येवंरूपाणामेवाष्टानां वर्णानां सिम्संज्ञाया निश्चितत्वात्, इति चेदस्यां स्थितौ **'अथ शिक्षाविहिताः[६]'** इति सूत्रस्यायमेव वक्ष्यमाणोऽर्थः स्वीकर्तव्यः । तथा हि शिक्षाविहिता वर्णाः स्थानकरणप्रयत्नादयश्चानुसन्धातव्या इति । तथा सति शिक्षां प्रथममधीत्यैव छात्रः प्रातिशाख्याध्ययने प्रवर्तेत । नन्वेवमस्य सूत्रकारस्याष्टमाध्याये वर्णोपदेशो व्यर्थ एव; किञ्च स्वानभिमतवर्णोपदेशेन युक्त्यसङ्गत एव स पाठः प्रतीयत इति चेत्, न, लोके सम्भाव्यमानानामेव वर्णानां तत्रोपन्यासस्याभिप्रेतत्वात् ।

ऋक्प्रातिशाख्यानुसारं वर्णोपन्यासः

ऋक्प्रातिशाख्यानुसारे वर्णसमाम्नायः प्रदर्श्यते । तत्र हि लौकिको वर्णसमाम्नायो द्विविधः—प्रथमस्तावद् अ, आ, ऋ, ॠ, इ, ई, उ, ऊ, ए, ओ, ऐ, औ, ऌ, ई ३ प्लुत इति चतुर्दशैव स्वराः । १. क ख ग घ ङ । २. च छ ज झ ञ । ३. ट ठ ड ढ ण । ४. त थ द ध न । ५. प फ ब भ म । ६. य र ल व । ७. ह श ष स । ८. अः (विसर्गः) । ᳵक इति जिह्वामूलीयः । ᳵप इत्युपध्मानीयः । अं (अनुस्वारः) । हुँ इति नासिक्यः । कुं खुं गुं घुं इति यमाः । अयं हि वर्णक्रमः सूत्रकाराभ्युपगतः । इममेव क्रममवलम्ब्य **'अष्टौ समानाक्षराण्यादितः[७]'** इत्यादीनि सूत्राणि प्रवृत्तानि ।

ऋक्प्रातिशाख्यभाष्यानुसारं लौकिको वर्णसमाम्नायक्रमो द्विविध इत्यायाति । तथा च पूर्वमुपन्यस्त एकः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ, क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श स ष ह, ᳵक

---

१. यजुः प्रा० ८।२९ । २. तदेव—८।३० । ३. तदेव—१।४४ ।
४. तदेव—१।४५ । ५. यजुः प्रा० १।४४ । ६. तदेव—१।२९ ।
६. ऋ० प्रा० १।१ ।

(इति जिह्वामूलीयः), ॅप (इत्युपध्मानीयः), अं (इत्यनुस्वारः), अः (इति विसर्जनीयः), हुं (इति नासिक्यः), कुं खुं गुं घुं (इति यमाः) ।

'एते पञ्चषष्टिर्वर्णा ब्रह्मराशिरात्मवाचः[१]' अयं चापरो लौकिको वर्णक्रमो यश्च यजुःप्रातिशाख्येऽष्टमाध्याये परिगृहीतः ।

अत्रैव प्रातिशाख्ये **'इति स्थानानि**[२]', **'अत्र यमोपदेशः**[३]', एतदनन्तरं **'जिह्वामूलं तालु चाचार्य आह, स्थानं डकारस्य तु वेदमित्रः**[४]', **'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः । ळहकारतामेति स एव चास्य डकारः सन्नूष्मणा सम्प्रयुक्तः । इळा साळहा चात्र निदर्शनानि वीड्वङ्गः इत्येतदवग्रहेण**[५]' इति आभ्यां सूत्राभ्यां द्वौ अपरौ अपि वर्णौ ळकारळहकारौ मन्तव्यौ । किञ्च स एव डकारो जिह्वामूले तालुस्थानो यदा ऊष्मणा हकारेण संयुज्यते, तदा ढकाररूपं धत्ते, स एव ढकार ळहकारतामापद्यते । एतेन स्पष्टं प्रतीयते यद् ढकारो नहि वर्णान्तरम्, किन्तु संयुक्त एव वर्णः । अनया रीत्या सर्वेऽपि द्वितीयचतुर्थवर्णाः, प्रथमतृतीयवर्णैर्हकारयोगेनैव निष्पद्यन्ते, इति षोडशमातृकापक्षोऽनेन दृढीभवति ।

एवं च ऋक्प्रातिशाख्यमते चतुर्दशस्वराः, पञ्चविंशतिस्पर्शाः, चत्वारोऽन्तस्थाः, अष्टौ ऊष्माणः, एको हुँ इति नासिक्यः, चत्वारो यमाः, द्वौ ळकारळहकारौ सङ्कलनया अष्टपञ्चाशद् वर्णाः सञ्जाताः ।

अनुस्वारोच्चारणे विशेषः

प्रसङ्गतोऽनुस्वारोच्चारणविषये किञ्चिदुच्यते—

नपुंसकं यदूष्मान्तं तस्य बह्वभिधानजः ।
अनुस्वारो दीर्घपूर्वः सिष्यन्तेषु पदेषु सः[६] ॥

अत्र हि भाष्ये—**'किमर्थमनुस्वारस्य दीर्घपूर्वस्य पदमध्ये वर्तमानस्य बहुभिः श्लोकैर्लक्षणं क्रियते । ननु पाठादेव सिद्धम्, यथाऽन्येषां वर्णानां पाठात् सिद्धम्, सत्यम्, किन्तु दुराम्नाननिवृत्त्यर्थमनयोः शिक्षापटलयोर्बहूनां वर्णानां लक्षणं क्रियते । कथं पुनर्दुराम्नानप्रसङ्गः ? सन्ति ह्यतीर्थोषिता अलसा अगुणदोषज्ञा अन्योन्याध्यापकाः सर्ववर्णान्यत्वजनयितारः । तद्दोषनिवृत्त्यर्थम् आचार्येण शिष्यहितार्थमिदमारब्धम् । अनुस्वारस्य तावत् स्थाने ङकारं जनयन्ति, तस्माद् ङकारात् परं ककारमन्तःपातं जनयन्ति 'हवींषि' 'सर्पींषि', 'भासांसि' । तन्निवृत्त्यर्थम् अनुस्वारलक्षणं क्रियते**[७]' इति । तथा च **'हवींषि'** इत्यत्र **'हवीङ्क्षि'** इत्येवमुच्चारणं पूर्वं बहुभिः कृतमासीत्, तन्निवृत्यर्थमिदमुच्यते ।

---

१. शु० यजुःप्रा० ८।१५ । २. ऋ० प्रा० १।४९ । ३. तदेव–१।५० ।
४. तदेव–१।५१ । ५. तदेव–१।५२ । ६. तदेव–१३।२२ ।
७. ऋ० प्रा० १३।२२–सूत्रे भाष्यम् ।

सामप्रातिशाख्यानुसारं वर्णोपन्यासः

सामप्रातिशाख्ये तु ह्कारः, अकारः, आकारः विसर्जनीयश्च कण्ठस्थानाः। अथवा उरसि विसर्जनीयः। कवर्गऋकारॠकारजिह्वामूलीया जिह्वामूलस्थानाः। तालुस्थानाः शकारचकारयकाराः, इकार ईकार एकार ऐकारश्च। यद्यपि **'तालुनि इच्येः'**[1] इति सूत्रे भाष्ये ऐकारो न लिखितः, तथापि स तत्रैव सन्निवेश्यः। मूर्धन्याः षकारटवर्गाः। दन्त्यास्तवर्गसकारलकाराः। रेफो दन्त्यो दन्तमूल्यो वा। ओष्ठस्थाना वकार ओकार औकार उपध्मानीयपवर्गौ उकार ऊकारश्च, एवं स्थानं तेषां वर्णानां तत्रोक्तम्। प्रथमप्रपाठके च मूले दश समानानि अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ इत्येवं-रूपाणि अक्षराणि। ए ऐ ओ औ इति चत्वारि सन्ध्यक्षराणि। आ ॠ ॡ ई ऊ ऋ ऌ इ उ अ दशैते नामिनः। कादयः पञ्चविंशतिः स्पर्शाः। य र ल वा इति चत्वारोऽन्तस्थाः। ह् श ष स इत्यूष्माणो योगवाहाः चत्त्वारः। अथायोगवाहाः अः इति विसर्जनीयः, ᳵक इति जिह्वामूलीयः, ᳶप इत्युपध्मानीयः। हुमित्यनुनासिकः। कुं खुं गुं घुं इति यमाश्चत्वारः। अथानुस्वारौ अं आं इत्यनुस्वारौ। ह्रस्वाद्दीर्घः, दीर्घाद् ह्रस्वः। दशायोगवाहाः। एवं चैतन्मते त्रिपञ्चाशदेव वर्णाः सन्ति। परमत्र **'किट्-किडाकारौ ह्न्वाम्'**[2] इति सूत्रेण कोऽयं वर्ण उक्त इति न ज्ञायते।

तृतीये दशके प्रथमसूत्रं **'अर्धं वा'**[3] इति। अनेन यकार-वकारयोरर्धं लुप्यते, तेन पादमात्रिकाविमौ।

एवं च शाकटायनेन एकोनषष्टिर्वर्णाः सामप्रातिशाख्ये निर्दिष्टाः। एतेषां स्थान-प्रयत्नादयः पीठिकायां द्रष्टव्याः।

लकारस्य रेफः पादमङ्गुलिमित्येवमादीनाम्[4]।

'कृपो रो लः'[5] वालमूललध्वलमङ्गुलीनां वा लो रमापद्यते।

अथर्वप्रातिशाख्यानुसारं वर्णोपन्यासः

अथर्वप्रातिशाख्यानुसारं तु वर्णा नहि तत्र स्वरूपतो निर्दिष्टाः; किन्तु वर्णानां स्थानकरणादिनिर्देशस्तु कृत एव। तेनैव वर्णानामप्युपन्यासः क्रियते। तत्र टीकायाम्—**'किं पुनः स्थानम्, किं करणम्' यद् उपक्रम्यते तत् स्थानम्, येनोपक्रम्यते तत् करणम्**[6]**'**। **'स्वराणां यत्रोपसंहारस्तत् स्थानम्'**[7], (उपसंहारो नाम संश्लेषविशेषः)। **'यदुपसंहरति तत् करणम्'**[8], **'अन्येषां तु यत्र स्पर्शनं तत् स्थानम्'**[9], **'येन स्पर्शयति तत् करणम्'**[10] इति।

१. ऋ० प्रा० १।५।
२. सा० प्रा० २।१०।
३. सा० प्रा० ३।१।
४. अथर्वप्रा० पृ० ३७८।
५. अष्टा० ८।२।१८।
६. अ० प्रा० १।१८।
७. तदेव–२।३१।
८. तदेव–२।३२।
९. तदेव–२।३३।
१०. तदेव–२।३४।

तत्र हि स्थानानि वक्ष्यमाणानि निर्दिष्टानि सन्ति—१. कण्ठः, २. तालुः, ३. मूर्धा, ४. दन्ताः, ५. औष्ठौ, ६. नासिका ।

करणानि च यथा—१. अधरकण्ठः, २. हनुमूलम्, ३. मध्यजिह्वम्, ४. जिह्वाग्रम्, प्रतिवेष्टितम्, ५. द्रोणिका, ६. जिह्वाग्रं प्रस्तीर्णम्, ७. अधरोष्ठम्, ८. नासिका, ९. मुखनासिकम्, १०. दन्तमूलम्, ११. स्पृष्टम्, १२. ईषत्स्पृष्टम्, १३. विवृतम्, १४. विवृततमम्, १५. अत्यन्तविवृततमम्, १६. संवृतम्, १७. तत्र कण्ठ्यानामधरकण्ठः[1]' इति सूत्रेण अकुहविसर्गाणां कण्ठः स्थानम्, अधरकण्ठः करणम् ।

जिह्वामूलीयानां जिह्वामूलं स्थानम् हनुमूलं करणम् । इचुयशानां तालु स्थानम्, मध्यजिह्वं करणम् । ऋटुरेफाणां मूर्धा स्थानम्, प्रतिवेष्टितं जिह्वाग्रं करणम् । मूर्धन्यषकारस्य द्रोणिका करणम् । लृतुलसानां दन्ताः स्थानं प्रस्तीर्णं जिह्वाग्रं करणम् । ओष्ठ्यानाम् अधरोष्ठः करणम् । नासिक्यानां नासिकास्थानम्, नासिकैव करणम् । केषाञ्चिन्मते तु अनुनासिकानां तत्तत्स्थानम्, मुखनासिकं करणम् । रेफटस्य दन्तमूलानि करणम् ।

इदानीं करणैः स्थाने कीदृशः प्रयत्नो विधेय इत्यत्रोच्यते । स्पर्शानां स्पृष्टं करणम्, अन्तःस्थानाम् ईषत्स्पृष्टम्, ऊष्मणां विवृतं च, चकाराद् ईषत्स्पृष्टमपि; स्वराणां च । एके स्वराणां स्पृष्टमाहुः । यकारे ओकारे च विवृततमम्, आकारस्य अत्यन्तं विवृततमम् । अकारः संवृतः । संस्पृष्टरेफम् ऋवर्णम् दीर्घप्लुतयोः संस्पृष्टरेफं पूर्वा मात्रा भवति । लृवर्णं लकारेण संस्पृष्टम् । संध्यक्षराणि संस्पृष्टवर्णानि भवन्ति । एकवर्णवच्च तत्र व्यवहारः । अत्र व्यञ्जनस्यापि एका मात्रा निर्दिष्टास्ति । **'लकारस्य रेफः पादमङ्गुलिमित्येवमादीनाम्**[2]' ।

महाभाष्येऽपि लकारस्य रेफो विधीयते । **'बालमूललध्वलमङ्गुलीनां वा लो रमापद्यते**[3]' । बाह्यप्रयत्नविषये तु—**'द्वितीयचतुर्थाः सोष्माणः**[4]' । अर्थात् प्रथमतृतीयाः प्रतिवर्गम् अनूष्माणः, द्वितीयचतुर्थास्तु सोष्माणः । एवं च—

सस्थानैरूष्मभिः पृक्तास्तृतीयाः प्रथमाश्च ये ।
चतुर्थाश्च द्वितीयाश्च सम्पद्यन्त इति स्थितिः ॥ इति ।

अथर्वभाष्यीयश्लोकबलाद् ऊष्मवायुसंपर्कवशादेव प्रथमास्तृतीयाश्च द्वितीयाश्चतुर्थाश्च क्रमशः सम्पद्यन्ते । **'उत्तमा अनुनासिकाः**[5]', **'नासाप्रयत्नात्त एव तृतीया**

---

१. अथर्वप्रा० १।१९ ।
२. अ० प्रा० १।६० ।
३. तत्रैव–पृ० ३९८ भाष्यम् ।
४. अ० प्रा० १।१० ।
५. तदेव–१।११ ।

उत्तमाः संपद्यन्ते ।' उपरिष्टाच्च—**'श्वासोऽघोषेषु अनुप्रदानः[१]', 'नादो घोषवत्स्वरेषु[२]'** इति । अनयोः सूत्रयोरयं भावः—यदा हि प्रयोक्ता कण्ठाद् बहिर्भवेन कण्ठसंवरणरूपेण बाह्यप्रयत्नेन वर्णमुच्चारयति, तदा काकले कश्चनापूर्वः स्पन्दो भवति, यो हि नाद-प्रयत्नपदेन व्यवह्रियते । यदा च गलबिलस्य विवारो भवति, ककाले कश्चन क्षोभो न भवति, तदा वायुः सध्यङ्निःसरति, तदा तत्र नादात्मको ध्वनिर्न भवति; किन्तु केवलं श्वसनमात्रं प्रतीयते । अयं नादः स्पन्दनमुच्यते ।

पाणिनिशिक्षानुसारं वर्णाः

तत्र सम्प्रति प्रचलितपाणिनिशिक्षानुसारं वर्णाः प्रदर्श्यन्ते । तथा चायं श्लोकपाठः—

त्रिषष्टिर्वा चतुःषष्टिर्वर्णाः सम्भवतो मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ≍क ≍पौ चापि पराश्रितौ ।
दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव च ॥ इति ।

एतत् शिक्षोपरि बहवो विद्वांसः स्वस्वमतानुसारं टीकामरचन् । तेषु कश्चन अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयानगणयित्वैव चतुःषष्टिं संख्यामपूरयन् । लकारं द्विःस्पृष्टपदेन निरदिशत् । ऌ३कारं प्लुतं चामन्यत । सङ्कलनाज्ञानशून्यतया तदुक्तिः सर्वथा दृष्टिप्रक्षेपानर्हैव ।

अपरोऽपि कश्चन त्रिषष्टिरित्यादिसंख्या न व्यक्तीकृता; किन्तु धर्मकृतेत्यादिना स्वेनोत्थापितां शङ्कां समाधात् । तत् सर्वं वर्णविभाजकधर्माज्ञानविजृम्भितमेव । वर्णविभाजकधर्माश्च—

अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात् ।
जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमात्[3] ॥

इत्यनेन सूत्रेण तैत्तिरीयप्रातिशाख्ये प्रोक्ताः ।

एवं सति वर्गे वर्गे तुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयानामनुप्रदान-कृतः श्रुतिविशेषः । 'कचटतप', गजडदब' इति ।

तत्र तुल्यस्थानप्रयत्नानुप्रदानानामपि प्रथमद्वितीयानां तथा तृतीयचतुर्थानां तथा तृतीयपञ्चमानां च संसर्गकृतः श्रुतिविशेषः । द्वितीयचतुर्था ऊष्मणा संसृज्यन्ते अनुस्वारेण पञ्चमाः । एवं तुल्यप्रयत्नानुप्रदानानामपि स्थानकृतः श्रुतिविशेषः । **यथा**

---

१. अ० प्रा० १।१२ । २. तदेव–१।१३ । ३. तै० प्रा० २३।२ ।

अ ऋ इ उ। क च ट त प। य र ल व। ह श ष स। तुल्यस्थानानुप्रदानानामपि इकारजकारयकाराणां करणकृतः श्रुतिविशेषः। तुल्यस्थानप्रयत्नानुप्रदानयोरपि समानाक्षरयोः परिमाणकृतः श्रुतिविशेषः। यथा—अ आ। ऋ ॠ। इ ई। उ ऊ। तथा च पूर्वोक्तपाणिनिशिक्षानुसारम्—

अ आ आ ३। इ ई ई ३। उ ऊ ऊ ३। ऋ ॠ ॠ ३। ऌ। ए ए ३। ऐ ऐ ३। ओ ओ ३। औ औ ३ इति—एकविंशतिः स्वराः। क ख ग घ ङ। च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म इति पञ्चविंशतिः स्पर्शाः। य र ल व इति चत्वारोऽन्तस्थाः। श ष स ह इति चत्वार ऊष्माणः। कुं खुं गुं घुं इति चत्वारो यमाः। एवम् २१ + २५+४ + ४ + ४ (५८) अष्टपञ्चाशत्, अं अः, ‿क ‿प इति चत्वारोऽनुस्वारविसर्गजिह्वामूलीयोपध्मानीया (६२)। दुःस्पृष्टः ळकारः (ईळे) प्लुत ऌ३कारः चतुःषष्टिर्वर्णाः।

केषाञ्चिन्मते दुःस्पृष्टो नास्ति केषाञ्चिन्मते प्लुत ऌ३कारो नास्ति। तेषां मते त्रिषष्टिर्वर्णाः।

पञ्जिकाभिधे शिक्षाभाष्ये तु—

ह्रस्वादिभेदैश्चत्वारः प्रथमा द्वादश स्मृताः।
ऌकारो ह्रस्व एवैचोष्टौ स्वरा एकविंशतिः॥ १॥
पञ्चविंशतिरष्टाब्धिः स्पर्शाः स्युर्यादयो यमाः॥ २॥
अनुस्वारो विसर्गश्च ‿क ‿पौ प्लुत ऌ३ कारकः।
त्रिषष्टिरेवं वर्णाः स्युर्ह्रस्वदीर्घादिभेदतः॥ ३॥
अनुस्वारद्वयाद् वर्णाश्चतुःषष्टिरितीरिताः। इति।

एवं सति एतन्मतेन दुःस्पृष्टं ळकारं विहाय ह्रस्वदीर्घभेदेन अनुस्वारद्वयस्वीकारात् चतुःषष्टिवर्णा निर्दिष्टाः सन्ति। तत्रैव भाष्ये दुःस्पृष्टश्चेत्यस्य ईषत्स्पृष्टो वर्णधर्मो न वर्णान्तरम्, तेन दीर्घप्लुतभेदेन ईषत्स्पृष्टयोः ऋकारऌकारयोः सत्त्वात् चत्वारोऽधिकाः स्युरिति नापादनीयमिति तद्भाष्यकर्तुरभिप्राय इत्यायाति।

पाणिनीये व्याकरणे वर्णनां स्थितिः

अत्र संक्षेपेण किञ्चिद् विचार्यते। पूर्वोक्तया पद्धत्या शिक्षायां प्रातिशाख्ये च वर्णा निर्दिष्टाः; परं पाणिनीयव्याकरणे कियन्तो वर्णा अद्य यावदात्मलाभमाप्ताः सन्ति, तान् निर्दिशामि।

तत्र चतुर्दशसु सूत्रेषु वर्णसमाम्नाये स्वरूपतो निर्दिष्टैर्वर्णैर्येऽपरे प्रत्याय्यन्ते, ते एकविंशतिः स्वराः। प्लुतम् ऌकारं च गृहीत्वा द्वाविंशतिः। स्पर्शाः पञ्चविंशतिः। यादयोऽष्टौ। एवम्—२२ + २५ + ४ + ४ = ५५ पञ्चपञ्चाशदेव बुध्यन्ते। **'अयोगवाहा-**

नामद्सूपसंख्यानम्[1] इति वार्तिकेन **'के पुनरयोगवाहाः विसर्जनीयजिह्वामूलीयोपध्मा-नीयानुस्वारनासिक्ययमा**[2]', इत्यनेन भाष्येण च इमे नव तत्र संकल्यन्ते, तर्हि चतुः-षष्टिर्वर्णाः । चतुर्मात्रौ ऐचौ । दीर्घप्लुतभेदेन, ईषत्स्पृष्टयोर्ऋकारऌकारयोश्च सत्त्वाच्च-त्वारोऽधिकाः ।

'व्योर्लघुप्रयत्नतरः शाकटायनस्य[3]' इत्यनेन पादमात्रिकयोर्यकारवकारयोः सत्त्वात् पुनरपरौ द्वौ वर्णौ । एवं संकलनया द्वासप्ततिः । उरस्यस्य हकारस्यापि स्वीकारात् त्रिसप्ततिर्वर्णाः पाणिनीये मते सिध्यन्ति । यद्यपि उरस्यो हकारः पाणिनीये मते नायाति; तथापि पाणिनेरपि पूर्वं **'हयवरट्**[4]', **'हल्**[5]' इत्यनयोः सूत्रयोर्द्विविधस्य हकारस्य सत्तानुमीयते ।

यद्यपि महाभाष्यकारेण द्वयोर्हकारयो रूपमेकमेव मत्वा फलं प्रदत्तम्, तथापि स्थानभेदेन वर्णभेदाङ्गीकारे बाधाभावात् किमुत वर्णैक्ये विरोधादेव द्विविधो हकारो गवेषकैरभ्युपगन्तव्य एव । यद्यप्यनुस्वारद्वैविध्यं सूत्रवार्तिकभाष्येषु नोपलभ्यते; तथापि शिक्षासु तैत्तिरीयप्रातिशाख्ये ऋक्तन्त्रे व्याकरणे तृतीयदशके 'अनुस्वारौ च'[6] इति सूत्रे ह्रस्वाद् दीर्घो दीर्घाद्ध्रस्व इति भाष्ये चानुस्वारद्वैविध्यम् शिक्षाभाष्ये पञ्चिकायां चोपलभ्यते । तदुपलम्भाद् अन्योऽप्येको वर्णोऽधिकः संग्रहीतव्यः, स च द्विमात्र इति कथयितुं शक्यते इति चेत्, न, परिमाणकृतो वर्णभेदः स्वरविषय एवेति तैत्तिरीयप्राति-शाख्यभाष्योक्त्या[7] तत्प्रयुक्तसंख्याधिक्यस्याप्रामाणिकत्त्वात् ।

सम्भाव्यमाना वर्णाः

वस्तुतस्तु सम्भाव्यमानानां वर्णानां निरूपणं पद्धतिप्राप्तम् । यतो हि तत्तत्प्राति-शाख्येषु पञ्चषष्टिर्वर्णाः सम्भाव्यमानत्वेनैव निर्दिष्टाः । तथा च तद्रीत्या कियन्तो वर्णा इति चिन्तायामुच्यते—अ, इ, उ, ऋ इमे चत्वारो ह्रस्वदीर्घप्लुतभेदेन द्वादश । ऌकारो ह्रस्वप्लुतभेदेन द्विविधः । दीर्घप्लुतभेदेन एचोऽष्टौ । ईषत्स्पृष्टौ ऋकारऌकारौ दोर्घल्लुतभेदेन चतुर्विधौ । चतुर्मात्रौ ऐचौ । तथा चैवम्—१२ + २ + ८ + ४ + २ = २८ । एवं संकलनयाष्टाविंशतिः स्वराः । पञ्चविंशतिः स्पर्शाः । यादयोऽष्टौ । अष्ट अयोगवाहाः । दीर्घोऽनुस्वारः । दुःस्पृष्टः ळकारः । हुँ इति नासिक्यो भाष्येऽयोगवाहेषु परिगणितः । उरस्यो हकारः । पादमात्रौ यकारवकारौ । तथा चैवम्—(२८ + २५ + ८ + ८ + १ + १ + १ + १ + २ = ७५) । एवं संकलनया पञ्चसप्ततिर्वर्णा अस्मिन् वाङ्मये विद्यन्ते ।

---

१. महाभा० प्रत्याहाराह्निकम्–पृ० २८ । २. महाभा० प० पृ० २८–वार्तिकम् ।
३. अष्टा० ८।३।१८ । ४. तदेव । ५. तदेव ।
६. ऋ० त० ३।३ । ७. तै० भा० २३।२ ।

यदि च एकमात्र एकार् ओकारश्च विद्येते, तर्हि सप्तसप्ततिर्भवेयुः। परमस्माकं संध्यक्षरविषये संस्कृतवाङ्मयानुसारमेकमात्रत्वं दोष इति न हि तयोः सम्भाव्यमानता स्वीकार्या। किञ्च ढकारस्थाने विधीयमानः ळहकारोऽपि गणनीयश्चेत् तर्हि अष्टसप्ततिर्भवेयुः। यदि तु रङ्गस्वरभक्ती अपि ग्रहीष्येते तर्हि अशीतिर्भवेयुः। यदि चैकमात्रोऽपि ङकारस्तर्हि एकाशीतिः।

अपरमपि किञ्चिदवशिष्यते। अरबीयभाषायां द्वौ हकारौ स्तः, परमस्माकं मते पञ्च ते सन्ति। तथा हि विसर्गः कण्ठ्यो हकारः, उरस्यो हकारः, पादमात्रो हकारो यो हि हार्धमात्रापदेनोच्यते। हार्धार्धमात्राऽपि हकारस्य विद्यते तन्त्रेषु। एवं सति अष्टमांशमात्र एको हकारः। तथा चोक्तं परात्रिंशिकायाम्—**'सा तु सप्तदशी देवी हकारार्धार्धरूपिणी'**[1] इति।

तन्त्रालोकेऽपि बहुत्रायं हकारो लिखितः। अस्यां स्थितौ द्वावपरावपि हकारौ संकलनीयौ चेत्तर्हि त्र्यशीतिर्वर्णाः सम्भाव्यमानत्वेन निर्देश्याः।

सन्धिभेदाश्चत्वारः पञ्च वा

प्रसङ्गादेषां वर्णानां योगे सन्धिर्भवति। तत्र व्याकरणे पञ्चसन्धिपदेन सन्धीनां व्यवहारो दृश्यते। तत्र कति सन्धयः शास्त्रप्रमाणगम्या इति चिन्तायामुच्यते—

याज्ञवल्क्यशिक्षायां पदपाठानन्तरं सप्तमसूत्रे **'सन्धिश्चतुर्विधो भवति लोपागमौ वर्णविकारः प्रकृतिभावश्चेति**[2]**।'** ऋक्प्रातिशाख्ये **'चतुःप्रकाराः सन्धयो भवन्ति, द्वयोः स्वरयोः; द्वयोर्व्यञ्जनयोः, व्यञ्जनस्वरयोः, स्वरव्यञ्जनयोरिति**[3]**'**। अत्र यदि **'प्रकृत्येति करणादौ प्रगृह्याः**[4]**'** इति सूत्रोक्तो याज्ञवल्क्यशिक्षायां चोक्तः प्रकृतिभावोऽपि ग्रहीष्यते, तदा पञ्च सन्धयो भवन्ति।

त्रय एव सन्धयः

किञ्च कातन्त्रपर्यालोचनया सन्धौ पञ्चपादा उपस्थापिताः सन्तीति। पञ्चपादः सन्धिरित्यत्र पादशब्दलोपे पञ्चसन्धिरिति पदं निष्पद्यते। वस्तुतस्तु अस्माकं मते सृष्टिस्थितिसंहारभेदात् त्रिविधः सन्धिः। तत्र **'आद्गुणः**[5]**'**, **'वृद्धिरेचि**[6]**'**, **'एत्येधत्यूठ्सु**[7]**'**, **'हशि च**[8]**'** इत्यादिसूत्रैर्वर्णानामधिकमात्रत्वसम्पादकसन्धिः सृष्टिसन्धिपदेन व्यवह्रियते। प्रकृतिभावस्तु स्थितिपदेन गृह्यताम्। **'इको यणचि**[9]**'**, **'एचोऽयवायावः**[10]**'**, **'लोपः शाकल्यस्य**[11]**'** इत्यादिभिर्निष्पाद्यः सन्धिः संहारसन्धिपदेन बोध्यः। यतो हि

१. परात्रिंशिका–पं० ६; पृ० २०१।
२. या० शि० १।
३. ऋ० प्रा० २।८।
४. तदेव–२।५१।
५. अष्टा० ६।१।८७।
६. तदेव–६।१।८८।
७. तदेव–६।१।८९।
८. तदेव–६।१।११४।
९. तदेव–६।१।७७।
१०. तदेव–६।१।७८।
११. तदेव–८।३।१९।

'इग् यणः सम्प्रसारणम्'[1] इति सूत्रप्रामाण्याद् यदा यणोऽर्धमात्रिकाः सम्प्रसृता भवन्ति, तदा इको रूपम् एकमात्रं धारयन्ति। तथा च इको मूलं यणेव विद्यते। एवं स्थितौ **'इको यणचि'**[2] इत्यादिसूत्रबलाद् यदा इकः स्वकारणभूते यणि लीयन्ते, तदा संहार-सन्धित्वेन व्यवहार इति शम्।

वैष्णवतन्त्रानुसारं वर्णस्वरूपम्

तत्तत्प्रातिशाख्यव्याकरणानुसारं वर्णस्वरूपेऽवगम्यमाने तत्तत्तन्त्रानुसारं वर्ण-विषये संक्षेपेण किञ्चिदुच्यते। विशेषस्तु पीठिकायां द्रष्टव्यः। वैष्णवतन्त्रानुसारम् अहिर्बुध्न्यसंहितातो वर्णस्वरूपं प्रदर्श्यते। तत्र शुद्धसंविन्मयी भगवतो विष्णोः क्रिया-शक्तिः परापदेनोच्यते। तत्र यः प्रथम उन्मेषो भगवतः, स एव भाव्यभावकभेदेन द्वैविध्यं भजते। तत्र भाव्यो य उन्मेषः, स भूतिरिति कथ्यते। भावकस्तु विष्णुसङ्कल्पः सुदर्शनपदेनोच्यते। उद्यती सा क्रियाशक्तिर्नादरूपतां धत्ते। स एव नादो दीर्घघण्टा-नादोपमः समाधौ योगिभिरनुभूयते। यो हि नाद उन्मेषं प्राप्तो बिन्दुर्भवति। स च बिन्दुर्नामनामिभेदेन द्विधा भिद्यते। तत्र नामरूपेणोदयं प्राप्य शब्दब्रह्मपदेनाभिधीयते। नामिरूपेणोदिता भूतिरुच्यते।

प्रकृते सा बिन्दुमयी शक्तिर्वर्णरहिताऽपि अनुत्तररूपेण स्थिता स्वरव्यञ्जन-भेदेन द्विधा व्यवतिष्ठते। तस्या अ इत्युन्मेषः, अनुत्तरपदेनोच्यते। अनया रीत्या 'अ, इ, उ, ऋ, ऌ, ए, ओ एते सप्त स्वराः सूर्यरश्मयः। आकारादय उत्तरे सप्त स्वराः सोमरश्मयः। अधुना व्यञ्नसृष्टिरुच्यते—ह् स ष क्ष व ल र य म भ ब फ प न ध द थ त ण ढ ड ठ ट ञ झ ज छ च ङ घ ग ख क तथा च व्यञ्जनेषु ळकारं विहाय चतुस्त्रिंशद् व्यञ्जनानि सन्ति। चतुर्दश च स्वराः सन्तीति संकलनयाऽष्टचत्वारिंशदेव वर्णा एतन्मते। तत्रापि समालोचनया चत्वारि सन्ध्यक्षराणि ऋकारऌकारौ ॠकारो दीर्घः। ऌ ३ कारश्च प्लुत इतीमेऽष्टौ स्वराः सन्धिजत्वात् स्वरमध्ये न गणनीयाः। अ, इ, उ, एते त्रय एव मौलिकाः स्वरा दीर्घभेदेन षडेवाभ्युपगम्यन्ते। तथा च संक-लनया चत्वारिंशदेव वर्णा एतन्मते।

यद्यपि षोडशाध्याये पूर्वोक्तपद्धत्या अष्टचत्वारिंशदेव वर्णाः प्रतिपादिताः सन्ति, तथाऽपि सर्वेषां मूलभूतौ बिन्दुविसर्गावपि क्वचित्सन्निवेशनीयावेव[3]। एवं सति पञ्चाशद् वर्णा भवन्ति। अत एव सप्तदशाध्याये स्वरेषु **'ओंकारः', 'अनुस्वारः', 'विसर्गः'** इतीमे त्रयोऽधिकाः सन्निवेशिताः। व्यञ्जनप्रकरणेऽपि अनुस्वारविसर्गौ निर्दिष्टौ स्तः। एवं सति अनुस्वारविसर्गौ स्वरौ व्यञ्जने च।

---

१. अष्टा० १।१।४५।   २. तदेव–६।१।७७।

३. एतत् सर्वमहिर्बुध्न्यसंहितातो गृहीतम् (अहिर्बुध्न्यसंहिता–अ० १६)।

प्रातिशाख्यादिष्वपि स्वरव्यञ्जनयोरुभयत्र गणना दृश्यते। तथा सति सप्तदश-स्वराश्चतुस्त्रिंशद् व्यञ्जनानीति सङ्कलनया एकपञ्चाशद् वर्णा भवेयुः। तथा च द्वयोरध्याययोः संवादार्थं यथा लकारस्य न वर्णान्तरत्वम्, तथैव ओंकारस्य न वर्णविभाजकत्वम् अनुस्वारविसर्गयोस्तु वर्णत्वमभ्युपगन्तव्यमेव। अनुस्वारविसर्गयोरुभयात्मकत्व-सूचनायैव उभयत्र तयोः सन्निवेशः। एवञ्च पञ्चाशद् वर्णाः स्वीकर्तव्या एतन्मते।

परमत्र येन क्रमेण वर्णाः (व्यञ्जनानि) निर्दिष्टाः, नेनैव क्रमेण वक्ष्यमाणतत्त्व-रूपता तेषां बोध्या। तथा हि हादिक्षान्ताः पञ्चब्रह्मेति शब्दिताः। क्षकारं विहाय अन्ये स्वस्वपूर्ववर्णानां कारणानि सन्ति अन्तस्थपुरुषेशयत्वाद् इमे अन्तस्था उच्यन्ते। मरूपा मातृका सर्वेषां चेतनानां समष्टिरुच्यते, तस्माद् भकारः प्रकृतिवाचकः। अनया रीत्या बकारो बुद्धितत्त्वम्, फकारः अहंकारः, पकारो मनः, नकारः श्रोत्रेन्द्रियम्, ततो धकारः त्वगिन्द्रियम्, ततो दकारश्चक्षुरिन्द्रियम्, ततस्थकारो रसनेन्द्रियम्, ततस्तकारो घ्राणेन्द्रियम्, ततः कर्मेन्द्रियवाचकत्वं टवर्गस्य ञादिचान्तं तन्मात्रवाचकम् ङादिकान्ता वर्णसंहतिर्भूतपञ्चकात्मिकेत्यवधेयम्।

शैवशाक्ततन्त्रानुसारं वर्णाः

इदानीं शैवशाक्ततन्त्रानुसारं वर्णविषयो विचार्य्यते। तथा हि साधकमूर्द्धन्येन श्रीभास्कररायापरनाम्ना भासुरानन्दनाथेन वरिवस्यारहस्यस्यादौ समुपन्यस्तां वर्ण-विभाजनपद्धतिं प्रदर्शयामि। वटवृक्षीयसूक्ष्मरूपतुल्यशब्दसृष्टिसूक्ष्मरूपशालिनी पूर्वोक्त-रूपा त्रिपुरसुन्दर्येव[1] परापदवाच्या, सैव मातृकापदेनोच्यते। ततः स्रष्टव्यपदार्थानालोच्य **'तदैक्षत बहु स्यां प्रजायेय'**[2] इति श्रुतिरीत्या तादृशमीक्षणमेव प्रवृत्तिनिमित्तीकृत्य तस्यां पश्यन्तीति पदं प्रवर्त्तते। तदवयवाश्च वामादयोऽष्ट शक्तयः[3]। वामा-शिखा-ज्येष्ठारूपा सा त्रिपुरसुन्दरी ज्ञानक्रियेच्छात्मिका ब्रह्मविष्ण्वीशरूपिणी। सैव व्यष्टि-समष्टिभेदेन नवविधा। ततो[4] नव नादा जाताः, तत्समष्टिश्च नादध्वन्यादिपदवाच्या नातिसूक्ष्मा परावत्, नातिस्थूला वैखरीवत्, अतो मध्यमाख्या मातृका। ततो नव-भिर्नादैः अकचटतपयशळाख्यवर्गनवकवती वैखरी मातृका जाता। इदं वाणीचतुष्टयं यथा स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमभेदम्, तथैव तद्वाच्या अर्था अपि तथा तथोन्नेयाः।

तत्रत्यः सृष्टिक्रमः

अत्रायं सृष्टिक्रमो यथा सूर्याभिमुखदर्पणे तदन्तःप्रविष्टकिरणाद् उभयकिरण-संकलनारूपः तेजोबिन्दुविशेषः कुड्यादौ प्रादुर्भवति, तथा प्राण्यदृष्टवशात् स्वान्तःसंहृत-

---

१. वामा ज्येष्ठा रौद्री अम्बिका (अनुत्तरांशभूता) इच्छा ज्ञानक्रिया शान्ता (ऊर्ध्वावयवा) एता अष्ट शक्तयः परासहिता नव।

२. तै० उ० २६।

३. तन्त्रालोकः—३, पृ० ७८।

४. नव नादाः चिणीति प्रथमः, चिणिचिणीति द्वितीयः घण्टानादस्तृतीयः, शंखनादश्चतुर्थः, पञ्चमस्तन्त्रीनादः, षष्ठस्तालनादः, सप्तमो वेणुनादः, अष्टमो भेरीनादः, नवमो मृदङ्गनादः।

विश्वसिसृक्षया प्रकाशरूपं ब्रह्म स्वीयां शक्तिमवलोकयितुं तदभिमुखीभूय तदन्तस्तेजोरूपेण प्रविश्य शुक्लबिन्दुभावमयते, ततस्तं बिन्दुं रक्तरूपा शक्तिः प्रविशति। तेन सम्मिश्रो बिन्दुरुच्छूनो भवति, स च बिन्दुः समष्टिरूपेणैको व्यष्टिरूपेण द्वयम्। तत्र शुक्ल इन्दू रक्तोऽग्निरिति बिन्दुद्वयात्मकत्वाद् विसर्ग इति च व्यवह्रियते तत्र समष्टिबिन्दो रवित्वम्।

एवं च कामाख्यो बिन्दुः; विसर्गः, हार्दकला (हार्धकला) चेति त्र्यवयवक एकः पदार्थोऽणादिप्रत्याहारवत् कामकलेत्युच्यते। इदमेव च समस्तसृष्टिबीजम्। एतन्मूलभूतं ब्रह्म तुरीयं बिन्दुरित्युच्यते। इयमेव प्रकाशविमर्शमयी परा शक्तिः पञ्चभूतात्मिका उत्तरोत्तरवृद्धिद्वारा पञ्चदशसंख्याकमात्राक्षरतिथ्यभिमानदेवतास्वरूपिणी सञ्जाता। तत्रायं क्रमः—प्रकाशाख्य एक एव परमेश्वरः तस्य शक्तिर्विमर्शाख्या, सा च पाञ्चविध्यं समागता। सैव अ इ उ ऋ ऌ इति पञ्चात्मना व्यवस्थिता। पुनरपि आ ई ऊ ॠ ॡ इत्येवं संकलनया दश। तत ए ओ ऐ औ अं इति पञ्चदश विसर्ग इति षोडश स्वराः। कादयः पञ्चवर्गाः पञ्चविंशतिः। यरलवाश्चत्वारः, शषसहाश्चत्वारः क्षकारेण सह पञ्चाशन्मातृकाः सम्पन्नाः।

तन्त्रालोकानुसारम्

तन्त्रालोके तु अयमेव विषयो भङ्ग्यन्तरेण वर्णितोऽस्ति[1]। अथ प्रकाशस्वरूपस्य बिन्दोः प्रकाशेनैव सर्वं प्रकाशते। तत आविर्भूतायाः पश्यन्त्यास्तस्मिन् बिन्दौ प्रतिबिम्बितत्वम्। यथा मुखस्य दर्पणे प्रतिबिम्बितत्वम्, तथाऽस्य शब्दस्य नभसि प्रतिबिम्बमस्ति। यथा दर्पणसम्मुखीभावे एव मुखस्य तत्र प्रतिबिम्बं गृह्यते, तथैव यत्र श्रोत्राकाशस्य सान्निध्यं तत्रैव श्रोत्राकाशरूपे नभसि तस्य प्रतिबिम्बं दृश्यते।

तथा चास्यां संविदि सर्वं विश्वं प्रतिबिम्बीभवति। स्वातन्त्र्यं हि विमर्शः, स चास्य प्रकाशस्य मुख्यः स्वभावः। न हि निर्विमर्शः प्रकाशः सम्भवति। स एव प्रतिभानुत्तरादिशब्दैरभिधीयते। तस्यैव भगवतः परमेश्वरस्य प्रकाशरूपया चिच्छक्त्या स्वातन्त्र्याभिधयाऽऽनन्दशक्त्या आनन्दचमत्कारात्मिकया इच्छाशक्त्या आमर्शात्मिकया ज्ञानशक्त्या सर्वाकारोपयोगिन्या क्रियाशक्त्या जुष्टस्याष्टैश्वर्यात्मकमूर्त्तेः परिपूर्णस्य शिवशक्त्यादिभेदासहिष्णोर्विश्वमवबिभासयिषोः प्रथमं शिवशक्तिरूपताऽऽत्मन्येव भास्यते। स एवानुत्तरो हतादनाहताच्च शब्दात् सदा द्योतमानो योगिभिरनुभूयते समाधौ।

तस्य परैव शक्तिः शिवेन संघट्टमासाद्योत्थिता सती इच्छाज्ञानक्रियारूपतां धत्ते। तथा चानुत्तराख्यः प्रकाशो बिन्दुः, स्वातन्त्र्यात्मके विमर्शाभिधे विसर्गे

१. तन्त्रालोकः–३, पृ० २३४।

परिणमते। तथा च बिन्दो रूपद्वयम् अकारोऽनुस्वारश्च। एवं विसर्गस्यापि उभयी वृत्तिः विसर्जनीयो हकारश्चेति। एतौ चाकारहकारौ अविभक्तभावेन शिवशक्त्यात्मकौ सदावभासेते। स एवानुत्तर आनन्दशक्तिमभिव्यञ्जयन्नकाररूपं धत्ते। तस्य सिसृक्षातः परामर्शस्योदये इच्छा शक्तिः इकारः। ईशित्री सैवेच्छा ईकारः। उन्मिषन्नुकारः। यदा ज्ञेयापेक्षया ज्ञानमूनं भवति, तदा ऊकारस्योदयो भवति। तथा चैतदेव विमर्शात्मकं परामर्शषट्कं बीजपदेनोच्यते। तथा चोक्तम्—

> **स्वराणां षट्कमेवेह मूलं स्याद् वर्णसन्ततौ।**
> **षड् देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः[1]॥**
> **आसामेव समावेशात् क्रियाशक्तितयोदितात्।**
> **संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते[2]॥** इति।

'**एवं च शक्तयोऽस्य जगत् सर्वम्**[3]' इत्युक्तरीत्या अ आ इ ई उ ऊ इत्येतेषामेव सर्वं जगत् शक्तिरिति। एवं चेयमिकाररूपा अक्षुब्धा क्षुब्धा च दीर्घरूपा इच्छा शक्तिः रेफलकारोभयेच्छायाधारित्वाद् ऋ ॠ ऌ ॡ३ इत्येतद्वर्णचतुष्टयरूपं धत्ते।

अस्मिन् ऋकारादिचतुष्टये क्षोभोदयाभावाद् वर्णान्तरोत्पत्त्यसंभवान्न बीजत्वम्। क्षोभाधारत्वाभावाद् योनित्वाभावस्यापि निश्चयाद् बीजयोनिवैलक्षण्यमेषाम्। एवम् इच्छोन्मेषशक्तिभ्याम् इकारोकाराभ्याम् अनुत्तरानन्दयोः संघट्टे एकार ओकारश्च सम्पद्येते। एवमेव यदा अनुत्तरानन्दशक्ती वृद्धिप्ररोहावाप्नुतः, तदा एकारयोगे ऐकार ओकारयोगे औकारश्च सम्पद्येते।

> **इच्छैवानुत्तरानन्दयाता शीघ्रत्वयोगतः।**
> **वायुरित्युच्यते वह्निर्भासनात् स्थैर्यतो धरा[4]॥**

इत्युक्तरीत्या यरलवानामन्तःस्थानां वायुसूर्यधरावरुणरूपाणामुदयः। अत्रोन्मेषस्यापि ग्रहणाच्चतुष्कोद्भूतौ न किञ्चिद् बाधकम्। सैवेच्छा शक्तिः स्वोष्मणा स्वात्मस्वातन्त्र्यप्रेरणात्मना बहिर्भाव्य शषसत्रितयात्मना स्फुरति। विसर्गस्यैव यथा स्थूलेन हकारात्मना स्थितिः, तथैव अनुत्तरादयः कादिसान्तत्वेनावभासन्ते[5]।

तथा हि—अनुत्तरात् पञ्चात्मनः कवर्गस्य प्रसवः, एवमिच्छाशक्तेः चवर्गस्य। द्विरूपाया ऋ ऌ इत्येवं रूपं प्राप्ताया इच्छाया एव टतवर्गोत्पत्तिः। उन्मेषात्पवर्गोत्पत्तिः। तथा च कषसंयोगात् क्षकारोत्पत्तिः। एवं सति पञ्चविंशतिः स्पर्शाः, चत्वारोऽन्तस्थाः, चत्वार ऊष्माणः, षोडश स्वराः संकलिताः क्षकारेण पञ्चाशद् वर्णाः सञ्जाताः। तत्रानुस्वारविसर्गौ स्वरेषु गणनीयाविति षोडश स्वराः सम्पद्यन्ते। तदुक्तं तन्त्रालोके टीकायाम्—

---

१. तन्त्रालोकः–३।१८४–८५।　　　२. तदेव–३।२५०–५१।

३. परात्रिंशिका–पृ० ४०।　४. तन्त्रालोकः–३।१५७।　५. तदेव–३।१४८–४९।

अकाराज्जात आकार इकाराद् ई इति स्मृतः।
ऊकारश्च उकारात् स्याद् ऋकाराच्च नपुंसकम् ॥
एकार ऐस्वरश्चैव ओकार औकार एव च।
अंकारश्च अनुस्वारः अः विसर्ग इति स्मृतः[1] ॥

एतच्च सर्वं विसर्गादुत्पन्नं विसर्ग एव तत्तदामर्शात्मना प्रस्फुरित इत्यर्थः। स एव हि परप्रमात्रैकरूपोऽशेषविश्वक्रोडीकारेण अनुत्तरहकारात्मना प्रस्फुरन्नन्तर्बही-रूपतया नरशक्तिशिवात्मतामाभासयेत्[2]।

मातृकाचक्रानुसारं वर्णोपन्यासः

अधुना मातृकाचक्रविवेकानुसारं वर्णाः प्रदर्श्यन्ते। तत्र हि पञ्चभ्यो भूतेभ्यः क्रमशः पञ्चानां वर्गाणामुत्पत्तिः। अर्थात् कण्ठ्यतालव्यमूर्धन्यदन्त्यौष्ठ्यात्मका वर्णाः क्रमश आकाशवायुतेजोजलपृथिवीसम्बन्धिनः। तथा चैतन्मते 'लं' जलबीजम्। 'वं' धराबीजमित्यायाति। परं टीकायां स्वीयसंस्कारानुसारं 'वं' जलबीजम्, 'लं' तु पृथिवीबीजमित्युक्तम्[3]।

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः इतीमे स्वरा निर्दिष्टाः। इकारोकारयोः संकुचद्रूपौ यकारवकारौ, ऋऌवर्णयोः संकुचद्रूपौ रलौ च निर्दिष्टाः।

---

१. तन्त्रालोकः–३।२२२–टीकायाम्।

२. (क) अनुत्तरानन्दभुवामिच्छाद्ये भोग्यतां गते।
सन्ध्यक्षराणामुदयो भोक्तृरूपश्च कथ्यते ॥ (तन्त्रा० ३।१८९–९०)
(ख) स्वराणां षट्कमेवेह मूलं स्याद् वर्णसन्ततौ। (श्लो० १८४)
(ग) षड् देवतास्तु ता एव ये मुख्याः सूर्यरश्मयः।
सौराणामेव रश्मीनामन्तश्चान्द्रकला यतः ॥ (श्लो० १८५)
(घ) अतोऽत्र दीर्घत्रितयं स्फुटं चान्द्रमसं वपुः। (श्लो० १८६)
तासां नामानि—
(ङ) दहनी पाचनी धूम्रा कर्षिणी वर्षिणी रसा। (पृ० १८१ टीका)

३. (क) षडेव हि स्वरा मुख्याः कथिता मूलकारणम्।
ते च प्रकाशरूपत्वाद् विज्ञेयाः सूर्यरश्मयः ॥ (तन्त्रा० पृ० १८१ टीका)
(ख) इच्छाशक्तिश्च या द्वेधा क्षुभिता क्षुभितत्वतः।
सा विजातीयशक्त्यंशप्रोन्मुखी याति यात्मताम् ॥
(ग) सैव शीघ्रतरोपात्तज्ञेयकालुष्यरूषिता।
विजातीयोन्मुखत्वेन रत्वं लत्वं च गच्छति ॥ (तन्त्रा० ३।१५४–५५)
(घ) तद्वदुन्मेषशक्तिर्द्विरूपा वैजात्यशक्तिगा।
वकारत्वं प्रपद्येत सृष्टिसारप्रवर्षकम् ॥ (श्लो० १५६)

अकारस्य संकुचद्रूपः कवर्गः, इकारस्य चवर्गः, ऋकारस्य टवर्गः, लृकारस्य तवर्गः, उकारस्य पवर्ग इति । ऊष्माण इत्यनेन शषसहा उक्ताः । उक्तं च—**'श्लिष्टं पुरः स्फुरितसद्द्वयकोटिळक्षरूपं परस्परगतञ्च समं च कूटम्'**[1] इत्यनेन ळक्षौ उक्तौ ।

तथा चैतन्मते षोडश स्वराः, पञ्चविंशतिः स्पर्शाः, चत्वारोऽन्तःस्थाः, चत्वार ऊष्माणः, दुःस्पृष्टः ळकारः । कूटस्थः क्षकार इति संकलनया एकपञ्चाशद् (१६ + २५ + ४ + ४ + २ = ५१) वर्णा निर्विष्टाः सन्ति ।

परमत्र अकारादीनां संकोचे कवर्गादय उत्पद्यन्ते इति यदुक्तम्, तन्न सम्यक्, हयरलवानां तैर्बीजत्वस्वीकारेण स्वोक्त्यैव विरोधात् । अनुत्तराद् अल्पमात्रतोऽधिकमात्रवर्णोत्पत्तिस्वीकाराच्च ।

किञ्च संकुचद्रूपः कवर्ग इत्युक्त्या लयस्यैव प्रतीत्या न हि अधिकमात्रेभ्यो वर्णेभ्योऽल्पमात्रवर्णानामुत्पत्तिरिहाभिप्रेता । विस्तरेणैतत् पीठिकायां प्रकटयिष्यते ।

सर्वेऽपि विषया आर्षप्रभावप्रभवाः

अथ भूमिकायां पीठिकाया विषयान् संक्षेपेण प्रदर्श्य प्रतिमाविषया अत्यन्तं संक्षिप्ततया प्रदर्श्यन्ते । न हि भूमिकायां सर्वेऽपि विषया आमूलचूडं सन्निवेशिताः; तथा सति पीठिकाप्रतिमयोर्वैयर्थ्यापत्तिः । अतो भूमिकायां यावदुक्तं तावतैव सन्तोष्टव्यम् । अधिकं जिज्ञासुभिः पीठिका प्रतिमा च द्रष्टव्ये ।

अस्मिन् हि अस्मदीये दर्शने योगजसामर्थ्यमेव—**'ईश्वरप्रणिधानाद्वा'**[2] इति सूत्रसूचितं मूलमवधार्यम् । स्वस्मिन् पात्रतासम्पादनेन भगवदिच्छया यथाकालं पतन्तः कारुण्यपारावारशीकराः स्वात्मानमाप्याययिष्यन्ति । तद्बलेनैव विशुद्धा दृष्टिः पदार्थान् स्फोटयिष्यति । नाहमात्मनः शक्तेरुपरि लब्धाभिमानः किञ्चिदपि स्फोटयितुं प्रभवामि । केवलं सर्वं भारं तदुपरि संस्थाप्य तदीयज्ञानप्रणालिकामात्मनि सम्भाव्य पूर्वाचार्यपरम्पराप्राप्तान् विषयान् सन्तक्ष्योपस्थापयामि ।

आधुनिकदर्शनानां मूलं संग्रह एव

इह हि पुरा पाणिनीये व्याकरणे दाक्षायणेन व्याडिनोपरचितं सकलदर्शनसूत्ररूपं ग्रन्थलक्षपरिमाणं संग्रहाभिधानं नाम निबन्धनमासीत् । तच्च कालवशात् सुकुमारबुद्धीन् सूत्रवृत्तिमात्ररटनपटून् वैयाकरणान् लब्ध्वा निष्ठामुपागमत् । ते हि सुकुमारबुद्धयो वैयाकरणा अशितबुद्धयो दार्शनिकगूढार्थावबोधेऽक्षमाः, प्रतिभाविरहिताः सम्प्रदायागतयथार्थज्ञानलेशहीनाः संग्रहाध्ययनोपेक्षाप्रधानास्तदध्ययनं व्यजहुः । एवं रीत्या संग्रहे निष्ठां गते कियत्कालानन्तरं साधुत्वज्ञानौपयिकतया धर्मसाधनत्वेनोपजातोपयोगाय व्याकरणस्मृतेरविच्छेदाय करुणाप्रयुक्तेन भगवता पतञ्जलिना वार्त्तिक-

---

१. मातृकाचक्रविवेके–पृ० १२१ । २. योगसूत्रम्–१।२३ ।

व्याख्यानपुरःसरं महाभाष्यनिबन्धनमुपरचितम्। तदपि महाभाष्यं कालवशात् परस्परवैमत्यादागमसंज्ञाविरहेण च परिभ्रष्टं सद् दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितम् आसीत्। ततः पश्चात् चन्द्राचार्यवसुरातप्रभृतयो गुरवो व्याकरणागममिमं बहुशाखत्वमनयन्।

तथा च भर्तृहरिः स्वयं गुरुपूर्वकत्वं व्याकरणागमस्य प्रदर्शयति—

न्यायप्रस्थानमार्गांस्तानभ्यस्य स्वं च दर्शनम्।
प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः[1] ॥ इति।

तथा चात्र वाक्यपदीयग्रन्थेषु सूत्रेषु वार्त्तिकेषु च विप्रकीर्णान् विषयान् संकलय्य दर्शयामि। नाहमत्र दर्शनान्तरीयसंस्कारसंस्कृतचेता विषयानुपस्थापयितुं समीहे; किन्तु आर्षव्याकरणसमालोचनया तदविरुद्धपद्धतिप्रभूतांश्च प्रमेयप्रमाणव्रातानत्रोपन्यसितुं यतिष्ये। यथासम्भवं श्रुतिमूलका एव विषया अस्मद्दर्शने स्थानं लभेरन्। एवं सत्यपि वाक्यपदीयसंस्कारोऽवश्यमेव मां स्प्रक्ष्यत्येव।

सत्तैव मूलं सत्त्वम्

तत्र सच्चिदानन्दस्वरूपस्य परब्रह्मणोऽभिन्ना येयं सत्ता नाम, सैव सत्ता विविधानि रूपाणि धारयति। सैव सर्वास्वपि क्रियास्वनुस्यूताऽऽपामरमनुभूयते। अहमस्मीति प्रत्ययस्य आगोपालाङ्गनासु प्रसिद्धेर्निष्प्रत्यूहत्वात्। तथा च सत्ता चिद् आनन्द इतीयं त्रयी अन्यानि त्रीणि रूपाणि प्रसूते। तत्र आनन्द इच्छारूपम्, चित् तु ज्ञानरूपम्, सत्ता च क्रियारूपं धत्ते। तासु शक्तिषु सत्ताया ब्रह्मरूपत्वात् तामगणयित्वा शक्तिपञ्चकमेव तान्त्रिकग्रन्थेषु समुद्घोष्यते।

सर्वोऽपि क्रियाकलापः सत्ताया एव विवर्त्तः परिणामो वेति मनसि निधाय, इत्यादिना भर्तृहरिः सर्गप्रतिसर्गौ निरदिक्षत्।

सैव भावविकारेषु षडवस्थाः प्रपद्यते।
क्रमेण शक्तिभिस्ताभिरेवं प्रत्यवभासते[2] ॥

अन्यच्च **'षड् भावविकारा भवन्तीति ह स्माह भगवान् वार्ष्यायणिः'** इति निरुक्तकारः। तत्र च परमार्थरूपस्य सत्तात्मकस्य भावस्य द्विविधः परिणामः, एकोऽनुलोमः, अपरश्च प्रतिलोमः। एतावेव द्वावुपादाय भगवान् वार्ष्यायणिः **'जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति'** षड् भावविकारानाह। तत्र वृद्ध्यन्तोऽनुलोमः, अपक्षीयते विनश्यतीत्याभ्यां प्रतिलोमः स प्रतिपादितस्तेन।

भूवादिसूत्रे एतद्व्याख्यावसरे कैयटः **'भावस्य क्रियायाः षट्प्रकारा इत्यर्थः। तेषु च अस्तिः पठित इति तस्यापि क्रियात्वमित्यर्थः। अथवा भावस्य सत्ताया एते**

१. वा० प० २।४९०। १. वा० का० ३ जातिसमुद्देशे श्लो०–३६।

प्रकाराः । सत्तैवानेकक्रियात्मिका साधनसम्बन्धादवसीयमानसाध्यरूपा जन्मादिरूपतयाऽवभासते । एते च भावविकारा[1] निरुक्ते निपुणं व्याख्याताः । इह तु प्रकृतानुपयोगान्न व्याख्यायन्ते'[2] ।

तत्रैव अथवेति प्रतीकमुपादाय 'उत्पत्तिविनाशयोरपि सूक्ष्मरूपेण वस्तुनो भावात् तेषामपि सत्तात्मकत्वम् इति बोध्यम् । भावस्य सत्ताया ब्रह्मसत्ताया एते विकाराः क्रियाप्रकारा मायावशात् त इव भासमाना इति वार्ष्यायण्युक्तेरित्यर्थः । सत्तैवेत्यादि । सत्तैव = ब्रह्मसत्तैव । अनेकक्रियात्मिका = अनेकक्रियाविवर्तात्मिका । साधनैः = कारकैः संबन्धादवसीयमानसाध्यस्वरूपा जन्मादिरूपतया भासत इत्यर्थः । एतच्च निरुक्तभाष्येस्पष्टम्'[3] इति नागेशभट्टेन अधस्तनः सन्दर्भः समुट्टङ्कितः ।

एवमेव **'सैव भावविकारेषु'**[4] इति कारिकायाष्टीकायां हेलाराजः 'षड भावविकारा भवन्तीति ह स्माह भगवान् वार्ष्यायणि इति निरुक्तकारः । तत्र च भावस्य परमार्थरूपस्य जन्मादयो विकारा इत्यर्थः । सन्मात्रस्वभावा हि सत्ता उत्तरोत्तरविकारापत्तौ जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति व्यपदेशमासादयति' ।

'प्रथमतरं च सन्मात्ररूपम् अस्तिशब्देन नाभिधीयते, अपि तु जन्मोत्तरभावी तस्या अवस्थाविशेषः । जन्मानन्तरभावि हि रूपं तस्या लोके सदिति व्यवहार्यम् । ततः प्राक् पश्चाद् भाविन्यः पुनरवस्था जन्मविपरिणामादिरूपेण व्यवहार्याः । तथा हि स्वशक्तिमाहात्म्यात् पूर्वं जायत इत्यवसीयते, पश्चादस्तीति । अवस्थितस्य विकारापत्तिरिति विपरिणमते, तच्च विपरिणमद् मुहूर्तमपि नावतिष्ठते इति, वर्धते यावदनेन वर्धितव्यम् । ततोऽपक्षीयते मुहूर्तमप्यनवस्थानादेव । अत एवोक्तं ततोऽपायेन युज्यते इति । ततोऽपि विनाश इत्येवं क्रमस्थितिः । एवंभूतास्तस्याः काश्चन शक्तयो विद्यन्ते, येनैकैव सती तथा विचित्ररूपेण प्रतिभासते ।

न च परिणतिदर्शनाभिप्रायेणायं विकारशब्दः अनित्यत्वप्रसङ्गात्, अपि तु विवर्तपर्यायोऽयम् । तथा हि सर्वशक्त्यात्मभूतत्वाद् ब्रह्मणोऽनेकविकारप्रदर्शनसामर्थ्यलक्षणा अविद्याख्या शक्ति कार्यभेदादुपचरितनानात्वा समस्तीत्यागमविदः ।

इत्थं च स्वाभिरेव शक्तिभिरनतिरिक्ताभिर्जन्मादिरूपतयाऽविद्यायामाभासते । तदेव ब्रह्म सर्वभावेषु समानरूपं सत्तात्मकम् । अन्यस्य तद्व्यतिरिक्तस्याभावादित्येषोऽत्रार्थः'[5] इत्युक्तवान् ।

---

१. विकारशब्दः प्रकारवाचीति नागेशः पृ० १२४ । २. अष्टा० १।३।१ ।
३. महाभाष्यम्–१।३।१–नागेशभट्टटीकायाम् । ४. वा० प० ३।३।३६ ।
५. वा० प० ३।३।३६–इति कारिकोपरि हेलाराजटीका ।

एतत् सर्वमन्यद् वा एतादृशं षड्भावविकारा भवन्तीत्यादेर्व्याख्यानं स्वीयानिर्वचनीयतावादविवर्तवादादिसंस्कारसंस्कृतमनसां पक्षपातधीकालुष्यकलङ्कितया हेयमेव ।

यतो हि पस्पशाह्निके **'अथवा नेदमेव नित्यलक्षणम् । ध्रुवं कूटस्थमविचाल्यनुत्पत्त्यव्ययवृद्धियोगि यत्तन्नित्यमिति तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते'**[१] इत्येतद्भाष्यव्याख्यानप्रवृत्ते उद्द्योते 'उत्पत्तेः सत्तापर्यन्तत्वाद् अनुत्पत्तीत्यनेन जन्मसत्तारूपौ भावविकारौ निरस्तौ, अवृद्धीत्यनेन तृतीयो वृद्धिलक्षणः, अनुपजनेति चतुर्थः परिणामः, अनपायेति पञ्चमोऽपचयः, अव्ययेति षष्ठो विनाशः एतद्रूपविकाररहितमिति तदर्थः' इति नागेशभट्टोक्त्याऽपि वार्ष्यायणिप्रदर्शितषड्भावविकारा यस्मिन् न भवन्ति तदेव नित्यम् ।

तथा च स्पष्टमेव षड्भावविकारा भवन्तीति ग्रन्थेन ब्रह्मणो भिन्नाया एव प्रकृतेः स्वरूपावगमार्थं षण्णां भावविकाराणामुपन्यासः कृतः। तद्भिन्नस्यैव ब्रह्मणश्चितो वा नित्यत्वस्वीकारात् । एतादृशविकारशून्यं यत्तन्नित्यमितीदृशं नित्यत्वं ब्रह्मण्येव सन्तिष्ठते । तथा च द्विविधं नित्यत्वम्—एकं षड्विधविकारशून्यत्वम्, अपरं च आश्रयप्रवाहाविच्छेदप्रयुक्तम् । एवं स्थितौ षड्भावविकारा भवन्तीत्यस्य विवर्तवादमाश्रित्य व्याख्यानं दर्शनान्तरसंस्कारेणैवेति ध्येयम् ।

यच्च हेलाराजेन **'न च परिणतिदर्शनाभिप्रायेणायं विकारशब्दः अनित्यत्वप्रसङ्गात्, अपि तु विवर्तपर्यायोऽयम्'**[२] इत्युक्तम्, तत्तु **'अथवा नेदमेव नित्यलक्षणम्—ध्रुवं कूटस्थेत्यादि'** भाष्यविरोधाद्धेयमेव । तेन हि भाष्येण षड्विधभावविकारयुक्तस्य अनित्यत्वस्वीकारात् । तथा चास्माकं व्याकरणदर्शने परिणामवाद एवेति सिद्धान्तः । विवर्तशब्दोऽप्यस्माकं परिणामार्थक एव मन्तव्यः ।

द्विविधो विवर्तः

विवर्तवादे तु द्विविधो विवर्तः—द्रव्यरूपेण सिद्धविवर्तः, क्रियारूपेण साध्यविवर्तः । तथा चोक्तम्—

तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः[३] ॥ इति ।

तथा च महासत्तयाऽनया अवियोगात् प्रातिपदिकमात्रवाच्या सत्ता । तदुक्तम्—**'प्रातिपदिकार्थः सत्तेति'** । अयमेव सिद्धविवर्तः धातुभिरपि साधनाधीनलब्धजन्मसु क्रियाव्यक्तिषु समवेता यथोपाध्यनुगृहीतनानात्वा सत्तैवाधेयत्वमापद्यते,

१. महाभाष्यम्–पस्प० पृ० ७ । २. वा० प० ३।३।३६–हेलाराजटीका ।
३. वा० प० ३।३।३४ ।

अयं साध्यविवर्तः। तथा च सच्छब्दात् तल्प्रत्यये सत्ता त्वप्रत्यये च सत्त्वमिति[1] निष्पद्यते। प्रत्ययभेदेन च अर्थभेदः। वस्तुतस्तु नास्ति तथार्थभेदः। प्रातिपदिकस्थले सत्त्वपदेन सा सत्ताऽभिधीयमाना द्रव्यार्थिका, धातुस्थलेऽभिधीयमाना क्रियार्थिका इति तस्या एव द्विधा विवर्तः।

परिणामवादोऽस्माकं वैयाकरणानाम्

एवं विवर्तवादपरिणामवादयोरुभयोरपि आधुनिकव्याकरणग्रन्थेषु उपलब्धतया वास्तविके परिणामवादे कया रीत्या सत्तायाः परिणाम इति पूर्वमत्यन्तं संक्षिप्ततया संस्पृष्टोऽपि विषयोऽधुना वितन्यते।

'सदेव सोम्येदमग्र आसीद्[2]' इति रीत्याऽस्माकं मते एक एवानन्तापरिमित-शक्तियुक्तः सत्पदार्थः परिस्फुरितस्वातन्त्र्यापरपर्यायकालाख्यशक्तिविशिष्टो विराजते। तदा स **'एकोऽहं बहु स्यां प्रजायेय[3]'** इति पद्धत्या कर्तृरूपं धत्ते। अस्यामवस्थायां धातू-नामकर्मकत्वम्। तदानीं कालाख्यैव शक्तिः करणभावं भजते। तथा च स्वस्मिन्नधि-करणे स्थित्वा कालाख्येन करणेन प्रकृतिं स्वस्वरूपं भिन्दन् क्रीडति, तदा चिदा-नन्दात्मकं पत्रद्वयं शक्तिद्वयं वा समुज्जृम्भयति। तयैव पद्धत्या तदन्तर्लीनमेव तच्छक्ति-द्वयं ततः प्रादुर्भवति। तयोश्च शक्त्योः परस्परमभेदः पुरासीत्। इदानीं तु तयोर्भेदे सत्यपि परस्परमाभासः समुन्मिषति। एवं त्रिकोणरूपं दधत् सत् स्वात्मनि चिति आनन्दे च स्फुरत् चितो ज्ञानम् आनन्दाद् इच्छां चाविर्भावयति। अस्यामवस्थायां कर्मणोऽपेक्षणाद् धातूनां सकर्मकत्वम्। अनयोर्ज्ञानेच्छयोर्भेदेऽपि परस्परमाभासः पूर्व-वदेव विजृम्भितः। तदनन्तरं ते द्वे ज्ञानेच्छे शक्ती क्रियारूपं धत्तः। एवं तस्मिन् सति सत्ता चिदानन्दज्ञानेच्छाक्रियाशक्तिरूपा परापदव्यवहार्याऽत्यन्तं सूक्ष्मा स्वस्यामेकस्यां षड्रूपा सती एकत्वेन क्रियात्मना भासमाना प्रकाशस्वभावा विमृशन्ती पश्यन्तीरूपं धत्ते। तस्यां च सूक्ष्मौ शब्दार्थौ भासमानावास्ताम्। ततो मध्यमावस्थां प्राप्तौ शब्दार्थौ परस्परं सङ्घटमानौ वैखरीरूपं धत्तः।

तस्यामेव वैखर्यां कारणात्मना अपरास्तिस्रो वाचोऽपि लब्धास्पदाः सन्ति। तत्र स्थूलरूपं दधती पश्यन्ती बहिः सृष्टिं कर्तुं प्रभवति। तत्र च परम्पराद्वयं प्रचलति। एका शब्दपरम्परा, अपरा च अर्थपरम्परा। अनयोः परम्परयोः सम्बन्ध-परम्पराऽपि न जहाति द्वयोर्धाम। असम्बद्धा च नहि क्षणमपि स्थातुमर्हति। अनेन क्रमयोगेण स्थूलपश्यन्त्यां सृष्टिः प्रवर्तते। तस्यामेव जन्मादयः षड् विकाराः सन्ति। ते एव भावभेदस्य योनयः। उपरिष्टाच्च यथावसरं ते प्रदर्शयिष्यन्ते।

---

१. सत्त्वशब्दः सदेस्त्वन्यपि उणादौ निष्पन्नो गुणाश्रयत्वप्रवृत्तिनिमित्तकः। **परमयमर्थोऽत्यन्तं रहस्यभूतः।**

२. छा० उ० ६।२।१।

३. तदेव–६।२।३।

सत एव सर्वमुत्पद्यते

तत्र प्रथमं सत्पदवाच्यं शब्दब्रह्म[1] रवात्मकमभवत्। स एवास्माकं मते रविरुच्यते। तस्मान्नादः समुत्पद्यते। तद्यथा—

उत्तरो देवो नादः दिव्यः सूर्यो रविः रवो वा।
शब्दब्रह्मैव उत्तमं ज्योतिरित्ययं वैदिकक्रमः॥ इति।

अन्यच्च—

सूक्ष्मामर्थेनाऽप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानाम्।
उतान्ये विदुरमृतामिव च पूतां नानारूपामात्मनि सन्निविष्टाम्[2]॥

अस्याः श्रुतेरयमर्थो निःसरति यत् सैवैका वाणी अर्थेनाविष्टा भेदवतीव चित्ते नानारूपा भासते। तथा च—'शब्दार्थयोः स एव नित्यस्तादात्म्याख्यः सम्बन्धो न हीश्वरकृतः, किन्तु सर्गादिभुवां महर्षिदेवतानामीश्वरेण बोधितस्तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्सङ्केतः[3]' इति न्यायवाचस्पत्ये उक्तम्। तत्र कृत इत्यस्य प्रकाशित इत्यर्थः।

तथा च योगवाचस्पत्ये **'सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः शब्दानां सम्बन्ध ईश्वरसङ्केतस्तु प्रकाशकः[4]'** इति।

अत एव **'नित्यः शब्दार्थसम्बन्धः[5]'** इति तान्त्रिकाः (वैयाकरणाः)। सर्वैरर्थैः सर्वशब्दानां सम्बन्धश्च योगिगम्य एव। तेषां योगबलेन शब्दार्थोभयरूपायाः परायाः प्रत्यक्षात्।

युक्तं चैतद् एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोपादानत्वेनोभयरूपतया (शब्दार्थोभयरूपतया) तत्कार्ययोः (शब्दब्रह्मकार्ययोः) उभयरूपत्वात् (प्रत्येकमुभयरूपत्वात्)।

तथा चोक्तम्—

क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम्।
प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् परा[6]॥ इति।

---

१. इदं शब्दब्रह्म उत्तमज्योतिःपदेनापि व्यपदिश्यते। उद्वयमित्यादि (यजुः०अ० २० म० २१) मन्त्रेण योगाभ्यासप्रक्रियायां चत्वारि चक्राणि सन्तीति ज्ञायते। तत्र हार्धमात्रा प्रतिभापदेन धृतिपदेन वा गृह्यते। तथा च सा तमः प्रतिभा, धृतिर्वा कथ्यते। स्वः = (शब्दः तेजश्च) बिन्दुपदेन गृह्यते।

उत्तमज्योतिषो दिव्यः सूर्यः, तस्मादुत्तरो देवस्तस्माद् रवः, ततस्तमः। अयं प्रतिलोमक्रमम्।

२. वा० प० १।१—टीकायाम्। ३. न्या० वाचस्पत्यम्–२।१।५५–टीका।
४. योगवैशारदी–समाधिपादे–२। ५. वा० प० १।२३।
६. लघुमञ्जूषा—पृ० ४९।

'अयं भावः—मायानुपहितं ब्रह्म निर्गुणम्, मायोपहितं सगुणम्। तच्च ब्रह्म-जगदुपादानकारणम्, तदेव बिन्दुशब्दवाच्यम्। स च बिन्दुः कारणरूपः सूक्ष्मः। कार्यरूपस्तु त्रिविधः—बिन्दुः, बीजम् नाद इति। बिन्दुर्ब्रह्मरूपः, शक्तिर्बीजम्, तयोः क्षोभ्यक्षोभकाख्यः संबन्धो नादः'[१] इति मञ्जूषायाम्[२]।

निरुक्तमूलकः शब्दार्थसृष्टिक्रमः

अधुना यावत् शब्दार्थौ अत्यन्तं संसृष्टावास्ताम्। ततश्च प्रकाशमयो बिन्दुः प्रकृतिः, अस्यामेव प्रकृतौ लीनः प्रत्ययो निःसृत्य बिन्द्वंशसंपृक्तहार्धमात्रारूपं धारयति। सैव हार्धमात्रा धृतिः प्रतिभा वा कथ्यते। ततः सैव विसर्गात्मना महत्तत्त्वरूपं दधाति। अनया रीत्या शब्दार्थसृष्टिर्लब्धास्पदा भवति। तस्माद् विसर्गादुरस्यो हकारोऽहंकार-रूपम्, विद्यारूपं वा धत्ते। ततः कण्ठ्यो हकारो मनोभावमासादयति। तथा च तस्या एव हार्धमात्राया उद्भूतस्य विसर्गस्य रूपत्रयमस्ति। विसर्गः, उरस्यो हकारः, कण्ठ्यो हकारश्चेति[३]।

स एव कण्ठ्यो हकारो मनःस्वरूपः शब्दतन्मात्ररूपेण परिणमते। स एवाग्रे प्रसरन् तालुस्थानं संप्राप्य स्पर्शतन्मात्ररूपे यकारे परिणतो भवति। स एव मूर्धानं गत्त्वा रूपतन्मात्ररूपेण रेफेण परिणम्यते। ततो दन्तस्थानं लब्ध्वा रसतन्मात्रेण लकारेण विवर्तते। तत ओष्ठस्थानमासाद्य गन्धतन्मात्रे वकारे स्वीयं रूपमाविर्भावयति। तथा चायमेव विसर्गो हयरलवेति पञ्चात्मना व्यवतिष्ठते। ततश्च स एव विसर्गः कचटतपेति पञ्चानां ज्ञानेन्द्रियाणां रूपं दधाति। गजडदबेति कर्मेन्द्रियपञ्चकरूपं च बिभर्ति। इमाः सविसर्गाः षोडश मातृकाः। **'अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः[४]'** इति मार्कण्डेयपुराणे निर्दिष्टाः सन्ति।

---

१. (क) अस्या बिन्दुरूपिण्याश्चिदचिन्मिश्रायाः प्रकृतेः शब्दब्रह्म पराऽभवत्।
(ख) अत्रेदं तत्त्वम्—तान्त्रिकसंस्कारसंस्कृतचेतसा भट्टनागेशेन शब्दब्रह्मणः परायाश्चोत्पत्तिः कण्ठरवेणोक्ता। वस्तुतस्तु अस्माकं परमवैदिकानां मते उद्वयम् (यजुः अ० २० म० २१) इति मन्त्रोक्तं स्वरेव (शब्दः तेजश्चे) प्रकृतिपदेन बिन्दुपदेन वा गृह्यते। आस्माकीनं शब्दब्रह्म तु उत्तमज्योतिःपदेन गीयते, तच्च बिन्दोरूर्ध्वं चतुर्थसोपाने चकास्ति। विस्तृतं चैतत् प्रतिमायां द्रष्टव्यम्।

२. मञ्जूषा—पृ० ५०।

३. अत्रेदं रहस्यम्—यदि हि हार्धमात्रापदेन धृतिः प्रतिभा वा गृह्यते, तदा हार्धार्धपदेन (यो हि तान्त्रिकग्रन्थेषु बहुत्र प्रयुज्यते) बन्दिुः प्रकृतिर्वा गृह्यताम्। तथा सति हार्धार्धमात्रा नाम मात्राया अष्टमोंऽशः हार्धमात्रापदेन चतुर्थोंऽशः, विसर्गपदेन तु अर्धमात्रा। अन्यत् सर्वं मूले निरूपितम्।

४. दुर्गासप्तशती—१।५५।

स्वरसृष्टिः षोडशमातृका स्वरूपं च

यदा च हयरलवेति पञ्चकं संप्रसृतं भवति, तदा स्वीयमर्धमात्रात्मकं रूपं वर्धयित्वा एकमात्रारूपं दधत् भूतपञ्चकरूपं धारयति। एवमेता एव पञ्चमातृका अ इ ऋ ऌ उ रूपेण परिणमन्ते। **'इग् यणः संप्रसारणम्'** इति सूत्रयन् भगवान् पाणिनिरिममर्थं परिपुष्णाति। एवं हकाररूपमातृकया यदा वर्गपञ्चकप्रथममातृकाः संयुज्यन्ते, तदा ख छ ठ थ फेति स्थूलानि पञ्चज्ञानेन्द्रियाधिष्ठानरूपाणि भवन्ति। एवमेव यदा वर्गपञ्चकतृतीयमातृका हकाररूपमातृकयाऽऽश्लिष्यन्ते, तदा घ झ ढ ध भेति पञ्चानां कर्मेन्द्रियाणामधिष्ठानानि सम्पद्यन्ते। बिन्दुना पित्रा यदा प्रत्येकवर्गतृतीयमातृकाः संसृज्यन्ते, तदा ताभ्यो वर्गाणां पञ्चमा वर्णाः सञ्जायन्ते। इमे पञ्चमा वर्णा न हि मातृकाः; किन्तु पुरुषा एव।

तथा हि एको बिन्दुः पितृस्थानीयस्तस्य षोडश मातृकाः स्त्रियः सन्ति। यदा हकाररूपमातृकया संसृज्य कादयो गादयश्च पञ्च पञ्च वर्णाः खादीन् घादींश्च पञ्च पञ्च वर्णान् सुवते, तदा ता आयुर्वेदपद्धत्यनुसारं स्त्रिया सह स्त्रियाः संयोगे जायमाना वर्णा नहि पुम्भावमापन्नाः; किन्तु नपुंसकतामेवासादयन्ति। अनयैव रीत्या चत्वारो यमाः पञ्चमो यमश्च तैत्तिरीयप्रातिशाख्योक्तः, तदा वर्गाणां पञ्चमा वर्णा दशसु ज्ञानेन्द्रियकर्मेन्द्रियेषु पुंस्त्वमादधते, तदा तानि पुरुषाणां दशेन्द्रियाणि स्त्रीणामिन्द्रियापेक्षया वैशिष्ट्यमधिकां च पुंस्त्वशक्तिमासादयन्ति। विसर्गस्य कचटतपरूपमातृकातः पूर्वं स्थितौ जायमाना जिह्वामूलीयशकारषकारसकारोपध्मानीयाः पञ्च ऊष्मविभूतयः स्त्रीणां ज्ञानेन्द्रियेषु पञ्चसु वैशिष्ट्यमादधते। कर्मेन्द्रियेषु **'पादरहितेषु'** तासां वैशिष्ट्यं तु एकार ओकार ऐकार औकारश्च निदधते।

पूर्वस्मिन् मदीये लेखे प्रतिभाविद्याशब्दौ धृत्यहंकारसमानार्थौ मयोपात्तौ। तत्राऽस्मदीये दर्शने च निरुक्तमपि मूलम्। **'व्याकरणस्यैव कात्स्न्र्यं निरुक्तम्'**[2] इति यास्कोक्त्या यो ह्यंशः पाणिनीये व्याकरणे नोपलभ्यते, स चावश्यं निरुक्ताद्याश्रयणेन पूरणीयः।

सृष्टिक्रमे मूलभूतनिरुक्तयोपन्यासः

अपश्यं गोपामनिपद्यमानम् आ च परा च पथिभिश्चरन्तम्।
स सध्रीचोः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः[3]॥

'आवरीवर्ति भुवनेष्वन्तः' इति। अथैष महानात्मा सत्त्वलक्षणस्तत् परं तद् ब्रह्म तत् सत्यं तत् सलिलम्, तदव्यक्तम्, तदस्पर्शम्, तदरूपम्, तदरसम्, तदगन्धम्,

---

१. अत एव स्त्रीणां पादेषु पुरुषपादापेक्षया शक्तिसंकोचः।
२. निरुक्तम्–१।१५। ३. ऋ० सं० १।१६४।३१।

तदमृतम्, तच्छुल्कम्, तन्निष्ठो भूतात्मा । सैषा भूतप्रकृतिरित्येके । तत् क्षेत्रं तज्ज्ञानात् क्षेत्रज्ञम् अननुप्राप्य निरात्मकम् । अथैष महानात्मा त्रिविधो भवति, सत्त्वं रजस्तम इति । सत्त्वं तु मध्ये विशुद्धं तिष्ठति अभितो रजस्तमसी । रज इति कामः, द्वेषस्तम इत्यविज्ञातस्य विशुध्यतो विभूतिं कुर्वतः क्षेत्रज्ञपृक्त्वाय कल्पते ।

प्रतिभालिङ्गो महानात्मा, आत्मलिङ्गा विद्या, प्रकाशलिङ्गं मनो निश्चयलिङ्ग आकाशः । आकाशगुणः शब्दः, आकाशाद् वायुर्द्विगुणः स्पर्शेन । वायोर्ज्योतिस्त्रिगुणं रूपेण ज्योतिष आपश्चतुर्गुणा रसेन । अद्भ्यः पृथिवी पञ्चगुणा गन्धेन । पृथिव्या भूतग्रामस्थावरजङ्गमाः । तदेतदहर्युगसहस्रं जागर्ति । तस्यान्ते सुषुप्स्यन्नङ्गानि प्रत्याहरति । भूतग्रामाः पृथिवीमपियन्ति । पृथिवी आपः, आपो ज्योतिषम्, ज्योतिर्वायुम्, वायुराकाशम्, आकाशो मनः, मनो विद्याम्, विद्या महान्तमात्मानम्, महानात्मा प्रतिभाम्, प्रतिभा प्रकृतिम् । सा स्वपिति युगसहस्रं रात्रिः । तावेतौ अहोरात्रौ अजस्रं परिवर्तेते । स कालः तदेतदहर्भवति ।

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः[1] ॥

अत्रेदं रहस्यम्—**'षड् भावविकारा भवन्तीति वार्ष्यायणिः[2]'** जायते, अस्ति, विपरिणमते, वर्धते । एते अनुलोमा भावविकाराः । त एव चतुर्दशेऽध्याये निरुक्ते[3] **'तदेतदहर्युगसाहस्रं जागर्ति'** इत्येतेन ग्रन्थेन प्रतिपादिताः सन्ति **'तस्यान्ते सुषुप्स्यन् अङ्गानि प्रत्याहरति'** इत्यादिना तु प्रतिलोमा भावविकारास्तत्रैव चतुर्दशेऽध्याये प्रतिपादिताः । ये हि प्रथमेऽध्याये **'अपक्षीयते नश्यति'** इत्यनेन निर्दिष्टाः । एते च विकाराः प्रकृतेर्भवन्ति, यतो हि निरुक्ते प्रथमम् **'अथैष महानात्मा सत्त्वलक्षणस्तत् परं तद् ब्रह्म तत् सत्यम्[4]'** इत्यादिना परब्रह्मणः प्रतिपादनानन्तरम् **'तन्निष्ठो भूतात्मा सैषा भूतप्रकृतिरित्येके'** इत्यादिना प्रकृतेरेवोपक्रमात् । उपसंहारेऽपि प्रकृतावेव प्रतिभायां, लयप्रदर्शनाच्च, क्षेत्रज्ञस्य क्षेत्ररूपप्रकृतिभिन्नत्वेन व्यवस्थापितत्वाच्च ।

पूर्वोक्ते निरुक्ते विद्यापदेन अहंकारस्य प्रतिभापदेन धृतेश्च ग्रहणम् । इयं हि धृतिर्नहि विस्तरेण कस्मिन्नपि ग्रन्थे प्रतिपादिताऽस्ति, किन्तु गीतायाम् सात्त्विकी-

१. श्रीमद्भगवद्गीता—८।१७ । २. निरुक्तम्—१।२।८ ।
३. तथा च परब्रह्मणोऽन्तःस्था प्रकृतिरिति सूच्यते । ४. निरुक्तम्—१४।३ ।
५. इयं प्रतिभा वाक्यपदीयोक्तप्रतिभातः 'प्रातिभं वा सर्वम्' इत्युक्तप्रतिभातश्चान्या । प्रतिभाया-मेतस्या भिन्नायाः प्रतिभायाः स्वरूपमुपपादयिष्यते ।

धृतिर्नाम सुखे दुःखे यया नाप्नोति विक्रियाम् ।
तां भजेत सदा प्राज्ञो यं इच्छेद् भूतिमात्मनः ॥

इत्यनेन यद् धृतेर्लक्षणमुक्तम् सा धृतिरितोऽन्या ।

राजसी-तामसीभेदेन त्रिविधो भेदो धृतेः प्रदर्शितः। सा च धृतिर्भगवता शंकरेण **'ज्ञानं बुद्धेर्वृत्तिः। बुद्धिस्तु वृत्तिमती। धृतिस्तु वृत्तिविशेष एव बुद्धेः'** इत्यनेन ज्ञानमिव धृतिरपि बुद्धिवृत्तिरेवेत्युक्तम्। परं धृतेर्बुद्धिवृत्तित्वे पार्थक्येन धृतेः प्रदर्शनमसङ्गतं स्यात्।

भगवता श्रीरामानुजाचार्येणापि भाष्ये धृतेः स्वरूपं न सम्यग् वर्णितम्। तट्टीकाकर्त्रा वेदान्ताचार्येणापि स एव पन्था अवलम्बितः **'अयमपि संकल्पदार्ढ्यादिरूपो बुद्धिस्वभावविशेष एव'** इत्यादिना। तथा च चिरादिमां धृतिं गीतोक्तामन्विष्यन् निरुक्ते प्रतिभापदव्यपदिष्टां संप्राप्य परं प्रमोदमावहम्। सा च धृतिः (सत्त्वरजस्तमसां त्रयाणां गुणानां समाहारः प्रकृतिरिति) गुणानां वैषम्ये सत्त्वप्राधान्ये प्रकृतेरुदेति, रजःप्राधान्ये तु बुद्धिः। तमःप्राधान्ये त्वहंकारस्य समुदयः। गुणवैषम्येऽपि त्रयो गुणा यदा परस्परमहमहमिकया संमिश्रिताः साम्यमिवापन्ना भवन्ति, तदा मनस आविर्भावो भवति।

यद्यपि धृतेर्बुद्धेश्च सत्त्वप्राधान्ये एव समुदयः, तथापि यदा क्षोभोन्मुखा सा भवति, तदा धृतिरुदेति। क्षुब्धायां च तस्यां बुद्धिरुदेति इति उत्तरप्रदेशशिक्षामन्त्रिणः श्रीसम्पूर्णानन्दमहोदयाः।

बुद्धौ ज्ञानस्य प्राधान्यं धृतौ तु क्रियायाः

यद्यपि **'प्रवृत्तिं च निवृत्तिं च'** इत्यादिषु त्रिषु श्लोकेषु गुणत्रयभेदभिन्नाया बुद्धेर्लक्षणे 'वेत्ति', 'प्रजानाति', 'मन्यते' इति ज्ञानार्थकैस्त्रिभिर्धातुभिर्बुद्धेः कार्यनिर्देशेन बुद्धौ ज्ञानस्य प्राधान्यं प्रतिभाति। **'धृत्या यया धारयते'** इत्यादिषु त्रिषु श्लोकेषु त्रिविधाया धृतेर्लक्षणे 'धारयते', 'न विमुञ्चति' इति धारणार्थकधातोरुपादानेन क्रियायाः प्राधान्यं धृतौ प्रतीयते। एवं स्थितौ **'बुद्ध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च'**[1] इति गीताबलेन च विशुद्धज्ञानेन विशुद्ध्या धृत्या च कर्तव्यावाप्तिः सम्भवति।

किञ्च धृतिर्बुद्धेरर्वाग्भाविनीति च सिध्यति, तथापि निरुक्तप्रामाण्याद् बुद्धेः कारणभूतैव प्रतिभा धृतिपदेन ग्राह्या। तस्यां च प्रतिभायां क्रियायाः प्राधान्यं ज्ञानं तु गुणीभूतम्। किञ्च प्रकृतावपि क्रियाया एव प्राधान्यं विशुद्धं चैतन्यं तु गुणीभूतम्। अत एव सा प्रकृतिः कथ्यते प्रतिभायामपि सैव कृतिः प्रकृतेस्तत्त्वं प्रधानभूतम्, इति प्रकृतेः सन्निहिता प्रतिभा। बुद्धिस्तु व्यवहिता तस्यामवस्थायां बुद्धिर्नहि कृत्युन्मुखीभवति। अपि चेयं क्रिया सैव ग्राह्या, या हि कर्तृत्वव्यपदेशे मूलभूता। सर्वा अपीमाः

१. 'क्रियाशक्तिप्रधानायाः' इत्यादिपूर्वोक्तः श्लोकोऽत्रानुसन्धेयः। ज्ञानेच्छाकृतिषु पूर्वापरीभावसत्त्वेऽपि प्रकृतौ प्रतिभायां बुद्धौ वा तत्प्रयुक्तः पूर्वापरीभावो न युक्तः।

शक्तयः परस्परं संश्लिष्टा विश्लिष्टाश्च भवन्ति। कार्यभेदात् सृष्टावासां विश्लेषो लये संश्लेष इत्यवगन्तव्यम्।

सृष्टिविसृष्ट्योः स्वरूपम्

यद्यपि तन्त्रालोकादितान्त्रिकग्रन्थेषु व्यापकस्य सङ्कोच एव सृष्टिः। यथा व्यापकमाकाशं सृष्टौ वाय्वादिक्रमेण पृथिवीरूपं धत्ते, तस्यां च पृथिव्यां व्यापकस्याकाशस्य रूपं सङ्कुचितं जातम्। विसृष्टौ तु यदा सैव पृथ्वी जलादिक्रमेण आकाशे लीयते, इति सङ्कुचितं तस्या रूपं विस्तृते व्यापके आकाशे लीनं भवतीति सङ्कोच एव सृष्टिः, विकासश्च लयः।

तथापि व्यावहारिकदृष्ट्या सूक्ष्मरूपेण विसृष्टिर्भवति, स्थूलरूपेण सृष्टिरिति द्वयोर्मदुक्तेस्तान्त्रिकोक्तेश्च सामञ्जस्यं विधेयम्।

षोडशमातृकाविषये तान्त्रिकाणामस्माकं च मतभेदः

षोडशानां नित्यानां मातृकाणां विषये तु तान्त्रिकैः सहास्माकं वैयाकरणानां नास्ति सामञ्जस्यम्; तैः षोडशानां स्वराणामेव नित्यषोडशिकात्वेन व्यवहृतत्वात्। तस्य स्फोरणं च पीठिकायां प्रतिमायां च भविष्यति।

किञ्च तेषां मते शुक्लशोणितात्मकबिन्द्वंशभूताद् अरुणाद् बिन्दोर्नादोत्पत्तिरुच्यते। परमस्माकं वैयाकरणानां मते 'उद्वयं तमसः परि स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यम्'[1] इति वैदिकमन्त्रमूलिका उत्तमज्योतिः, दिव्यः सूर्यः, उत्तरो देवः, स्वः, तमः[2] इत्येवं क्रमिकं भावमापन्ना विसृष्टिरेवाभिमता।

तथा हि उत्तमज्योतिःस्वरूपं सूक्ष्मादपि सूक्ष्मं शब्दब्रह्म स्वकं रूपं साधकानां कृते रविरूपेण स्वात्मकेन दिव्येन सूर्येण स्फोरयति। ततो नादात्मना उत्तरदेवरूपेणाविर्भवति, ततः स्वारूपेण बिन्दुना प्रकृतिरूपेण जागर्ति, ततस्तमोरूपेण[1] हार्धमात्रारूपेण प्रतिभात्मना धृत्यपरपर्यायेण परिणमते, ततो विसर्गात्मना बुद्धिरूपेणाविर्भवतीति प्रक्रिया पूर्वग्रन्थभावस्फोरकत्वेन मन्तव्या (अन्यत्तु पूर्ववत् सांख्यप्रक्रियानुकूलमेव।)

परमत्र यदान्तःकरणस्य निरोधावस्था, तदा निरुद्धं तत्स्वात्मनि विकसितं वृत्त्यात्मना परिणमते। तत्रापि पञ्चसु वृत्तिषु आद्या प्रमाणाख्या वृत्तिरधिक्रियते, सैव वृत्तिरधुना भवतां पुरः स्थापयितुं प्रयत्यते।

अस्माकं वैयाकरणानां मतेऽन्तःकरणपरिणामविशेषस्यैव प्रमाणत्वात् प्रमाणमपि प्रमेयान्तःपातित्वेनैव व्यवतिष्ठते।

---

१. शु० य० २।२१। २. इदं तमो तमोगुणाद् भिन्नम्।

किञ्चित्प्रमाणविषये विचार्यते

तत्र प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः प्रमाणानि । अस्माकं वैयाकरणानां मते शब्द एव प्रमाणानां मूर्धन्यः[1] । तथा चोक्तं महाभाष्ये **'शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम् । शब्दश्च शब्दज्ञाने धर्ममाह'**[2] इत्यादि ।

तत्र लोके प्रत्यक्षरूपप्रमाणस्य प्राधान्यं राजते । अनुमानस्यापि तन्मूलकत्वाद् अनुमानमपि न हि प्रत्यक्षापेक्षया बलवत् । तदेव प्रत्यक्षं प्रथममालोच्यते । किं भो ! भवता प्रत्यक्षं प्रमाणं प्राधान्येन स्थापयितुं शक्यते ? ओमिति चेत्, हृदये हस्तं निधाय ब्रवीतु भवान्, किं पुरोवर्तिवस्तु चक्षुःसन्निकृष्टं भवान् द्रष्टुं शक्नोति, नेत्येव मनसि धारणीयम् । न हि कश्चिदपि वस्तु सर्वतोभावेन द्रष्टुं शक्नुयात् । तथा चोक्तं वाक्यपदीये—

दुर्लभं कस्यचिल्लोके सर्वावयवदर्शनम् ।
कैश्चित्त्ववयवैर्दृष्टैरर्थः कृत्स्नोऽनुमीयते[3] **॥**

युगपत् सर्वावयवदर्शनस्यासम्भवात् कतिपयावयवदर्शनेन सकलार्थपरिच्छेदस्तत्रानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति[4] ।

---

१. यद्यपि वैयाकरणैः शब्दस्य मुख्यं प्रामाण्यं स्वीकृतम्, तच्चास्मिन्नेव प्रघट्टके मूले मया सन्दर्शितम् । तथापि केवलशब्दप्रामाण्येन नास्माकं सकलेष्टसिद्धिः । प्रत्यक्षप्रमाणमन्तरा शब्दस्य श्रावणप्रत्यक्षाभावे मूलोच्छेदः । अनुमानं विनाऽपि अनुमानेनैव सिद्धानां बह्वीनां परिभाषाणां विलयापत्तिः । किञ्च वैयाकरणैर्व्यवहारपथान्न स्खलनीयम् । प्रत्यक्षानुमानप्रामाण्यमन्तरा पदे पदेऽन्धकूपे पातः ।

२. महा० भा० १; पृ० ११ । ३. वा० प० २।१५ ।

४. (क) किञ्च स्वयं भगवान् पतञ्जलिरपि उपलब्धिम् (अनुमानात् पार्थक्येन) अनुमानञ्च प्रामाण्येनाभ्युपागच्छत् । 'आदिरन्त्येन सहेता' (अ. १।१।७१) इति सूत्रेऽर्थापत्तिरपि ध्वनिता । प्रत्यक्षमपि तथाऽभ्युपगतवान् ।

(ख) उपमानविषये तु वाक्यपदीये वृत्तिसमुद्देशे भर्तृहरिस्तट्टीकाकारश्च—

अनिर्ज्ञातस्य निज्ञानं येन तन्मानमुच्यते ।
प्रस्थादिकेन मेयात्मा साकल्येनाभिधीयते ॥
अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते ।
साकल्येनापरिज्ञानादुपमानं तदुच्यते ॥ (वा० प० ३।१४।३५९–६०)

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् । तथा हि अप्रसिद्धम् अनिर्ज्ञातं गवयादि प्रसिद्धेन गवा सादृश्यतस्तद्धर्मः तस्यैव धर्मो यस्य तदिवेति परिच्छिद्यते । सादृश्यमात्रेण परिच्छेदो नारोहपरिणाहसाकल्येन विशिष्टात्मनाऽपि । अत एव सादृश्यं प्रत्यक्षेण स्फुटमत्रावधार्यते, इति तदपेक्षोपमानस्येति नेदं मानम्, अपि तु तस्य समीपं किञ्चिद्रूपतया परिच्छेदात् ।

शब्दस्य मुख्यं प्रामाण्यम्

तत्र प्रत्यक्षानुमानोपमानशब्दानुपलब्धिप्रभृतीनि तेषु तेषु शास्त्रेषु स्वस्वाभिमतानि प्रतिपादितानि सन्ति, परमस्माकं वैयाकरणानां मते शब्द एव प्रमाणानां मूर्धन्यः। तथा चोक्तं महाभाष्ये **'शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाहेति'**।

लोके तु प्रत्यक्षरूपप्रमाणस्य प्राधान्यं राजते। अनुमानस्यापि तन्मूलकत्वात् तदनुमानमपि नहि प्रत्यक्षापेक्षया बलवत्। तदेव प्रथममालोचितम्[1]।

अपि च अतिदूरस्थं वस्तुनो रूपं कियन्मितमिति न वक्तुं पार्यते। एवं सति प्रत्यक्षप्रमाणविलये अनुमानप्रमाणस्य गर्भस्राव एव स्यात्। तथा सति कया रीत्या व्यवहर्तव्यमिति चिन्तायामुच्यते—**'नहि एषु प्रत्यक्षमस्त्यनृषेरतपसो वा, पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवतीत्युक्तं पुरस्तात्। मनुष्या वा ऋषिषु उत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति? तेभ्य एतं तर्कमृषिं प्रायच्छन्**[2]' इति निरुक्तोक्तिमनुसृत्य व्यवहर्तव्यमस्माभिः।

ऋषि-मुनि-मनुष्य-पशुभेदभिन्नाश्चतुर्विधा मानवाः

तथा च मनुष्येषु चत्वारो भेदाः सन्ति। ऋषिः, मुनिः, मनुष्यः, पशुश्चेति। तत्र ये सर्वतोभावेन विषयान् पश्यन्तीति त एव ऋषयः। ये च ऋषयो दृष्ट्वा मननं कुर्वन्ति, ते मुनय उच्यन्ते। ये विषयानंशतो दृष्ट्वा मननेनावगच्छन्ति, ते मनुष्या उच्यन्ते। ये च परान् स्पशन्ते बाधन्ते ते पशवो भवन्ति। तथा च स्पशतेरेव पशुशब्दो व्युत्पादनीयः। अस्यामवस्थायां प्रत्यक्षप्रमाणविलयमेवालोच्यः। तथा च—

---

१. 'अत एव उपमानस्य प्रामाण्येऽपि विवदन्ते किल इत्यादि' किञ्च **'उपमानानि सामान्यवचनैः'** (२।१।५५) इति सूत्रे महाभाष्ये 'मानं हि नाम अनिर्ज्ञातार्थमुपादीयते, अनिर्ज्ञातमर्थं ज्ञास्यामीति तत्समीपे यन्नात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातो गवयोऽनिर्ज्ञातः। उद्द्योतः—'मानं हीति—अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकत्वं हि तत्त्वम्। यथा प्रस्थादि अज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकम्, न तथोपमानम्। गौर्हि गवयं कतिभिश्चिद् धर्मैरेव तद्गतैर्ज्ञापयति न साकल्येन' इति।

अस्यां स्थितौ भाष्यादिपर्यालोचनया यथोपलब्ध्यनुमानादीनां प्रामाण्यं सिध्यति, न तथोपमानस्य। कण्ठरवेणैव भगवता भाष्यकारेण मानसामीप्यमेवोपमानस्य प्रतिपादितम्। अतोऽस्माभिरुपमानस्य प्रमाणान्तरत्वं नाङ्गीक्रियते। विस्तरेणैतद् विचारयिष्यते प्रतिमायाम्। 'आदिरन्त्येन सहेता' (अ० १।१।७१) 'सम्बन्धिशब्दैर्वा तुल्यम्' (भा० १ भा० पृ० ६२ प० २१) इति वार्त्तिकभाष्यादिसमालोचनयाऽर्थापत्तिरपि प्रमाणम्, सा च परस्परविरुद्धत्वेन प्रतिसन्धीयमानधर्मद्वयघटितसाध्यानुमित्यात्मिका।

२. निरुक्तम्—१३।१२।

'ऋषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवः तद् यद् एनान् तपस्यमानान् दृष्ट्वा ब्रह्म स्वयम्भ्वनार्षत् । ते ऋषयोऽभवंस्तदृषीणामृषित्वमिति विज्ञायते[१]' इति । तद्भाष्ये च ऋषिर्दर्शनात् पश्यति ह्यसौ सूक्ष्मानप्यर्थान् 'स्तोमान् ददर्शेत्यौपमन्यवः' मन्त्रास्तोमास्तानसौ तारकेण ज्ञानेन पश्यत्येवं औपमन्यव आचार्यो मन्यते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति 'तद् यद् एनान्' इत्यादि तदेतद् उच्यते—यत्कृतमृषीणामृषित्वम् । यत् यस्मात् एनान् तपस्यमानान् तप्यमानान् ब्रह्म ऋग्यजुःसामाख्यं स्वयम्भु अकृतकम् अभ्यागच्छत् आविर्भूतमित्यर्थः । अनधीतमेव तत्त्वतो ददृशुस्तपोविशेषेण । तदृषीणामृषित्वम्' इत्युक्तम् ।

एतादृश एव ऋषिः **'पृषोदरादीनि यथोपदिष्टम्[२]'** इति सूत्रे महाभाष्ये शिष्टपदेन निर्दिष्टः । भर्तृहरिणापि—

> **अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।**
> **ये भावान् वचनं तेषां नानुमानेन बाध्यते[३] ॥**

इत्यनेनापि स एव शिष्टो लक्षितः । अस्यां स्थितौ तादृशानाम् ऋषीणामभावात् किं कर्त्तव्यमिति समालोच्यैव निरुक्ते **'तर्कमृषिं प्रायच्छन्'** इत्युक्तं तथा च **'यत्किञ्चन अनूचानोऽभ्यूहति आर्षं तद्भवति[४]'** इति च निष्कृष्टोऽर्थस्तत्र प्रदर्शितः । तद्भाष्ये च 'अपि श्रुतितः अपि तर्कतः श्रुतिभ्यो ब्राह्मणेभ्यो निगमशेषेभ्यश्चोन्नीतार्थाभिधानसामर्थ्येभ्यो वाक्यार्थसामर्थ्यात् तस्योपरि पर्यायस्तर्कोऽभ्यूहो लक्षणा न्याय' इत्युक्तम् ।

यद्यपि निरुक्ते वेदार्थविषय एवायं मार्गः प्रदर्शितः, तथापि लोकेऽपि तदनुसरणं ज्यायः । अन्यथा स्वप्रत्यक्षबलेन व्यवहरणे व्यवहारोन्मूलनमेव भविष्यति । अद्यत्वेऽपि सर्वे पाश्चात्त्या यान् तर्कानवलम्बन्ते, तान् विहाय एतद्देशीयैरपि पदार्थसाक्षात्कारे व्यवहर्तुं न शक्यते । अतस्तस्मिन्नंशे तेषां शिष्टत्वं नापह्नोतुं पार्यते ।

तथा च शब्दस्य मुख्यं प्रामाण्यं लोके जागर्ति । प्रायो हि शब्दस्यैव प्रामाण्यमधिकमधुनाऽपि अनुभूयतेऽस्माभिः ।

प्रत्यक्षप्रमाणविषये महाभाष्ये

'मनसा युक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति'[५] भगवता पतञ्जलिना मनःसंयुक्तेन्द्रियार्थसंनिकर्षोत्पन्नज्ञानस्य प्रत्यक्षत्वं प्रदर्शितम् । तत्रैव उद्द्योते मनसेति प्रतीकमादाय **'यद्यपि पातञ्जलानामन्तःकरणं व्यापकम्, तथापि तत्परिणामविशेषो**

---

१. निरुक्तम्–२।११ । २. अष्टा० ६।३।१०१ । ३. वा० प० १।३८ ।
४. निरुक्तम्–१३।१२ । ५. महा० भा० ३।२।११५ ।

मनश्चिरस्थायि मध्यमपरिमाणं संकोचविकासशालि ज्ञानकरणमिति भावः। अत एव सदा न ज्ञानयौगपद्यं कदाचिद् यौगपद्यमपि'[1] इत्यनेन वैयाकरणानां नये एकस्मिन्नपि काले ज्ञानयौगपद्यं भवतीति सूच्यते।

किञ्च लघुमञ्जूषायां तिङर्थनिरूपणे—'वस्तुतोऽण्वेव मनः। तथा च—

लक्षणं मनसो ज्ञानस्याभावो भाव एव च।
वैधृत्यान्मनसोऽज्ञानं सान्निध्यात्तच्च वर्तते॥
अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ[1]।

इति चरके पतञ्जल्युक्तेः'[2]।

परमेतद् द्वयमपि न युक्तम्। वस्तुतो मनोऽपि व्यापकमेव। अत एव योगिनां दूरस्थविप्रकृष्टानां बहूनां वस्तूनां समकालमपि ज्ञानं भवति। अस्माकं मनस्तु तमसा आवृतत्वाद् विषयानवबोधयितुं नालमिति प्रतिमायां विस्तरः।

अनुपलब्धिरपि प्रमाणम्

किञ्च **'तस्य भावस्त्वतलौ'**[3] इति सूत्रे **'न ह्यन्यदुपलभ्यते'** इति भाष्यात् **'एवञ्चानुपलब्धिप्रमाणेनान्यत्वाभावनिश्चय इत्यर्थः'** इति कैयटाच्च उपलब्धिलक्षणं प्रमाणमेव सत्त्वनिश्चायकम्। उपलब्धिलक्षणात्प्रमाणात्प्राप्तसत्त्वनिश्चययोग्यस्यानुपलम्भादसत्त्वनिश्चय इत्यर्थः। एवञ्च वैयाकरणानां मतेऽनुपलब्धिरपि प्रमाणान्तरम्।

प्रत्यक्षं द्विविधम्

तत्रेन्द्रियजन्यं प्रत्यक्षम् अतीन्द्रियप्रत्यक्षमिति भेदद्वयभिन्नं द्विविधं प्रत्यक्षम्। तयोः सेन्द्रियप्रत्यक्षमवलम्ब्य तत्स्वरूपं प्रदर्श्यते। तानि चेन्द्रियाणि ज्ञानेन्द्रियकर्मेन्द्रियभेदेन द्विविधानि सन्ति। एषामिन्द्रियाणां पञ्चानां तन्मात्राणाञ्चोत्पत्तिः अहङ्कारादेव सञ्जायते। तत्रापि मतद्वैविध्यम्। सहभावेन[4] क्रमिकतया चेति। तत्र सहभावेनोत्पत्तिर्न हि व्याकरणदर्शनानुमोदिता, नापि वेदपद्धत्यनुकूला, कण्ठादीनां पञ्चानां स्थानानां स्थितिक्रमानुसारेण तत्तत्स्थानाभिव्यक्तानां वर्णानां तन्मात्रादिभिस्तैस्तैरिन्द्रियैस्तैस्तैर्भूतैश्च सम्बन्धस्य बहुधा प्रतिपादितत्वात् तेषामुत्पत्तिः क्रमिकैवानुसन्धेया। एवं सति पञ्चभिर्ज्ञानेन्द्रियैः प्रत्यक्षीकृतेषु विषयेषु तारतम्यमप्यवश्यमभ्युपगन्तव्यम्।

तथा च प्रत्यक्षानुमानागमानां प्रमाणानामन्तःपाति आगमरूपं प्रमाणमेव शाब्दत्वेन स्वीकार्यम्। तेषां पञ्चानां प्रत्यक्षाणां शाब्दं प्रत्यक्षं नाम तादृशानुपूर्वीकस्य

---

१. चरके मनसोऽणुत्वं योगे तु व्यापकत्वं स्थिरीकृतम्। व्याकरणेऽपि व्यापकत्वमेवाभ्युपगम्यते तस्य। अत एव 'अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा' (वाक्य० का० १ श्लो० ५१) इति हरेरुक्तिः संगच्छते। तथा च पतञ्जलिर्भाष्यकारः चरकश्च परस्परं भिन्नावेव।

२. ल० म० पृ० ८७१।

३. अष्टा० ५।१।११९। ४. सहभावेनैवोत्पत्तिः सांख्यादिदर्शनेषु प्रतिपादिताऽस्ति।

शब्दस्य प्रत्यक्षमित्यर्थः। अनया रीत्या श्रुत्या शब्दस्य त्वचा स्पर्शस्य, चक्षुषा रूपस्य, रसनया रसस्य, नासया गन्धस्येत्येवं बाह्यं शाब्दादिप्रत्यक्षं भवति। अस्यां स्थितौ **'शब्दप्रमाणका वयमिति'** भाष्यस्य कोऽर्थः ? किं प्रत्यक्षादपि शब्दप्रमाणं बलीयः ? ओमित्येव ब्रूमः। अलातचक्रादौ प्रत्यक्षप्रमाणस्य व्यभिचरात्। एवञ्च यो हि विषयः प्रत्यक्षेण ग्रहीतुं न शक्यते, तत्र शिष्टोपदेशत एव विषयो ग्राह्यः। तथा च शिष्टैरुपदिष्टे शब्दे या हि वर्णानामानुपूर्वी श्रूयते, सा च श्रावणप्रत्यक्षविषयीभूता। यो हि शब्दः श्रुतस्तदर्थे एव शिष्टोपदिष्टशब्दप्रमाणगम्यः।

प्रत्यक्षेऽपि तारतम्यम्

अत्र हि पञ्चस्विन्द्रियेषु श्रवणेन्द्रियं चक्षुरिन्द्रियञ्च। ईदृशं बलवद् यत्तत्र शब्दो रूपञ्च दूरस्थमप्यागच्छति। अन्यौ च स्पर्शगन्धौ दूरस्थावपि वायुना नीयेते इन्द्रियाणां सन्निधाने। यद्यपि रसं वायुरानेतुं न शक्नोति, तथापि सूक्ष्मं रसमानयत्येव। अत एव समुद्रतटे स्थितस्य पुरुषस्य लवणरसप्रतीतिर्भवति। तथा चाकाशेन्द्रियमपि श्रवणं नहि रूपादीन् ग्रहीतुं समर्थम्। तेषां सामर्थ्यस्य स्वस्वविषयग्रहण एव परिसीमितत्वात्।

परमेतदत्र रहस्यमस्ति यच्छब्दतन्मात्रा अन्यासु स्पर्शादितन्मात्रासु अनुस्यूता कर्णपथमन्या अपि मात्रा आनयति। एवं सत्यपि अस्माकं श्रवणेन्द्रियं नहि तादृशशक्ति-विशिष्टं यत्तास्तन्मात्रा ग्रहीतुं शक्नुयात्। ऋषीणां तु सर्वाणीन्द्रियाणि सर्वानपि विष-यानवबोद्धुं शक्नुवन्ति। अत एवोक्तं वाक्यपदीयटीकायां हेलाराजेन—**'सर्वज्ञा हीन्द्रि-यान्तरेणेन्द्रियान्तरव्यापारं कुर्वन्ति। तथा चागमः 'नेदानीमिन्द्रियैरेव पश्यति। घ्राणतः शब्दं शृणोति, पृष्ठतोऽपि रूपाणि पश्यति, अङ्गुल्यग्रेण सर्वार्थानुप-लभते**[1]' इति।

एतत्तु निर्विवादं यच्चक्षुरिन्द्रियं श्रवणेन्द्रियञ्च दूरस्थमपि स्वविषयं ग्रहीतुं शक्नुतः। नहि तथा त्वग्रसनाघ्राणादीनीन्द्रियाणि तथा कर्तुं प्रभवन्ति। अत्र को हेतुरिति विचारणीयम् ? तत्र श्रवणेन्द्रियविषये विचार्यते। श्रवणेन्द्रियं हि नाभसम्। तच्च नभो व्यापकम्। एवञ्च व्यापकाकाशदेशस्थः शब्दः श्रोत्रपथमागच्छतीति शब्दस्य प्रत्यक्षं भवति। अनया रीत्या दूरस्थमपि रूपं चक्षुरिन्द्रिये पतति। तच्चेन्द्रियं विषय-मन्तर्भाव्यं रूपं गृह्णाति। नहि स्पर्शः सम्बन्धमन्तरा स्वप्रत्यक्षं प्रति कारणं भवति। अनया गन्धो रसश्च वायुसम्बन्धं विना नहीन्द्रियसान्निध्यं भजतः। तथा च वायुना नीता एव परमाणवः स्वीयप्रत्यक्षं प्रति कारणभावं भजन्ति।

---

१. वा० प० ३।१।४६।

भाष्ये प्रत्यक्षस्यानुमानस्य चोपन्यासः

ननु च **'प्रत्यक्षमुपलभ्यते[१]'**, **'प्रत्यक्षमाख्यानमुपदेशो गुणैश्च प्रापणमुद्देशः[२]'**, **'अन्यथाजातीयकः खल्वपि प्रत्यक्षेणार्थसंप्रत्ययोऽन्यथाजातीयकः सम्बन्धात्। राज्ञः सखा राजसखः। सम्बन्धादेतद् गन्तव्यं नूनं राजाप्यस्य सखेति[3]'**, **'एते प्रत्यक्षं कंसं घातयन्तीति[४]'** एषु स्थलेषु प्रत्यक्षं प्रमाणं भाष्ये समुपलभ्यते। किञ्च अनुमानमपि **'सम्बन्धादेतद् गन्तव्यम्[५]'** इत्यनेन प्रतीयते। किञ्च **'कोऽसावनुमानः[६]'**, **'क्रियापृथक्त्वे च द्रव्यपृथग्दर्शनमनुमानमुत्तरत्रानेकशेषभावस्य[७]'** इत्यादौ च भाष्ये अनुमानप्रमाणमप्युपलभ्यते। **'धूमं दृष्ट्वा अग्निरत्रेति गम्यते, त्रिविष्टब्धकं दृष्ट्वा परिव्राजक इति[८]'**। एतेनापि अनुमानप्रमाणं सूच्यते। किञ्च **'प्रत्यक्षादप्यनुमानबलीयस्त्वम्। तद्यथा— अलातचक्रं प्रत्यक्षं दृश्यते अनुमानाच्च गम्यते नैतदस्तीति[९]'** इत्यादौ भाष्ये अनुमानस्यापि प्रामाण्यमभ्युपगतम्। किमुत प्रत्यक्षादपि तस्य बलीयस्त्वं प्रदर्शितम्[१०]।

साम्प्रतं वैयाकरणमतेन मोक्षो निरूप्यते

तत्र मया सृष्टिर्लयश्च निरुक्तमवलम्ब्यात्यन्तं संक्षिप्ततया प्रतिपादितौ। परमनया रीत्या संसृतिचक्रं भ्राम्यत्येव न कदापि तदुपरमो भवेत्। **'इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः[११]'** इत्युक्त्या तु तदुपरतिर्न सम्भावनीया। तथा सति व्याकरणमेव मोक्षस्य सरलो मार्ग इति निश्चीयते। कया रीत्या व्याकरणेन मोक्षप्राप्तिर्भवतीति विचारणीयम्। यद्यपि भगवता पतञ्जलिना **'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति[१२]'** इत्यादिना साधुशब्दप्रयोगेण कामपूर्त्तिः प्रतिपादिता। किञ्च—

नाकमिष्टसुखं यान्ति चतुर्भिर्वाडवैं रथैः।
अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः[13]॥

इत्यनया चोक्त्या स्वर्गप्राप्तिरपि साधुशब्दप्रयोगेण परिदर्शिता, तथापि मोक्षावाप्तिः कया रीत्या भवतीति भाष्याक्षरसमालोचनया नावगम्यते।

---

१. महा० भा० १।२।३०। २. तदेव–१।३।२।
३. तदेव–२।१।२४। ४. तदेव–३।१।२६।
५. महा० भा० १।१।९। ६. तदेव–१।३।१। ७. तदेव १।४।१०८।
८. तदेव–३।२।१३। ९. तदेव।
१०. तथा च नैकान्ततः कस्यचिद् बलीयस्त्वमेव न वाऽन्यापेक्षयाऽन्यस्य दुर्बलत्वमेव, किन्तु स्थानभेदेन बलीयस्त्वं दुर्बलत्वं चावधार्यम्। वस्तुतस्तु आर्षं प्रत्यक्षमेव सर्वेषां मूलम्। व्यवहारपथे तु परस्परं प्रमाणानि समुपस्थाप्य यथार्थपदार्थनिर्णयो विधेयः।
११. वा० प० १।२६। १२. महाभा० ६।१।८४। १३. महाभाष्ये–३।१।२८–उद्धृतम्।

अस्यां स्थितौ किञ्चिदुच्यते, पश्यन्तु भवन्तो व्याकरणस्य प्रयोजनानि। तत्र **'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'**[1] इति प्रयोजनप्रतिपादके भाष्ये न हि मोक्षो निर्दिष्टः। अत उपरिष्टाद् द्रष्टव्यम्। तत्र त्रयोदश प्रयोजनानि भाष्ये समुट्टङ्कितानि सन्ति। परमत्र कश्चन प्रत्यवतिष्ठेत किं भो वैयाकरणनिकायेऽप्यस्ति बन्धमोक्ष व्यवस्था, यत्तेषां मतेन मोक्षनिरूपणं प्राप्तावसरं भवेत् ? अत्र ब्रूमः !

आधुनिकानि दर्शनानि संग्रहमूलकानि

महाशयाः कालचक्रस्यैवायं महिमा यद् भवादृशा वैयाकरणानप्यधिक्षिपन्ति। विदितमस्ति भवतां यत् पुरा लक्षश्लोकात्मकं सकलन्यायबीजगर्भितं दाक्षायणेन व्याडिनोपरचितं संग्रहाभिधानं नाम निबन्धनमासीत्। तत्र हि प्राचीनैर्दार्शनिकैर्दृष्टाः पदार्थाः स्वयं दृष्टा वा निरूपिता आसन्। कियता कालेन संग्रहमूलभूतेषु पाराशर्यकर्मन्दादिदार्शनिकैः प्रणीतेषु ग्रन्थेषु क्षयं नीतेषु अर्वाग्भाविनो दार्शनिकाः संग्रहादेवापेक्षितांशानुपादाय स्वकीयं स्वकीयं दर्शनं निरमासिषुः। तस्मिंश्च संग्रहे कालवशात् क्षयं गमिते वर्षासु मण्डूका इवेतस्ततो रटन्तो मनुजा आत्मानं दार्शनिकं मन्यमाना दृश्यन्ते। अहं च तमेव भ्रष्टं व्याकरणागममुद्दिधीर्षुस्तेषां मतेन मोक्षस्वरूपं परिदर्शयिष्ये।

तत्र वेदान्तकल्पलतिकायां मोक्षनिरूपणैकफलिकायाम्—**'औपनिषदास्तु भगवता नीलाचलनायकेन नारायणेनानुगृहीता निरतिशयानन्दबोधरूप आत्मैवानाद्यविद्यानिवृत्त्युपलक्षितो मोक्ष इत्याचक्षते'** इति मोक्षस्वरूपं लक्षितम्। तथा च **'शब्दप्रमाणका वयं यच्छब्द आह तदस्माकं प्रमाणम्'**[2]।

अस्माकं वैयाकरणानां श्रुतेः प्रामाण्येन मोक्षक्रमः

भाष्यसूचितानां श्रुतिप्रमाणकानामस्माकं मते श्रुतिरेव भगवती यदाह तत् प्रमाणम्। एवं च महाभाष्ये **'चत्वारि'**, **'उत त्वः'**, **'सक्तुमिव'** इत्यादिश्रुतिभिर्निर्दिष्टं मोक्षस्वरूपं दर्शयामि। तत्रासु अन्यतमामेव श्रुतिमवलम्ब्य हरिवृषभेण—

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।
प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते[3] ॥ इति।

एतेन सर्वेश्वरः सर्वशक्तिसम्पन्नो वृषभः, तस्मिन् खलु वाग्योगवित् शास्त्रजशब्दज्ञानपूर्वकप्रयोगेण क्षीणपापः पुरुषो विच्छिद्याहङ्कारग्रन्थीन् अत्यन्तं संसृज्यते।

यद्वा त्रिषु स्थानेषु नाभावुरसि कण्ठे बद्धः पुरुषो यदा ज्ञातया त्रिविधया वाचा विशिष्टो भवति, तदा त्रिविधबन्धापगमे शुद्धो बन्धरहितोऽवतिष्ठते, स एव मोक्षपदेन व्यवह्रियते।

---

१. पस्पशा० १, पृ० १४। २. महाभा० १; पृ० ३६६। ३. वा० प० १।१३१।

यद्वा **'शुङ्गेन सन् मूलमन्विच्छ सौम्य'**[1] इति श्रुत्युक्तपद्धत्या साधको वैखरी-मध्यमापश्यन्तीरूपान् ग्रन्थीन् भिनत्ति, तदा सा चिच्छक्तिः परा प्रकाशते इति सैव मोक्षावस्था ।

किञ्चेह द्वौ शब्दात्मानौ नित्यः, कार्यश्च । तत्र कार्यो विवृत्तोऽनित्यो यो हि लोकव्यवहारोपयोगी स हि पुरुषस्य वागात्मनः प्रतिबिम्बमुपगृह्णाति । नित्यस्तु अविवृत्तः साध्यसाधनव्यवहारस्य प्रतिसिद्धान्तं पदपदार्थव्यवहारस्य च योनिः कारणम् क्रमरहितः सर्वेषामन्तः सन्निवेशी विकाराणां प्रसवः कर्मणामाश्रयः सुखदुःखयोरधिष्ठानम् (तस्यैवानुग्रहोपघाताभ्यां सुखदुःखे उत्पद्येते) सर्वत्राऽप्रतिहतकार्यशक्तिः शब्दवृषभः तस्मिन् वाग्योगविदः अहंकारग्रन्थीन् विच्छिद्य अत्यन्तनिर्विभागेण संसृज्यन्ते । तथा चोक्तं वाक्यपदीये—

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते ॥
तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते[2] ॥

ब्रह्मामृतप्राप्तिः केषाम्

अयं भावः—उपदर्शितमाहात्म्यस्य शब्दस्य योऽयमपभ्रंशेभ्यो विवेकेनावस्थानम्, स एव नित्यस्य ब्रह्मणः सिद्ध्युपायः । तस्य शब्दब्रह्मणः प्रवृत्तेः क्रियायास्तत्त्वं सत्तां प्रतिभाख्यां यो जानाति, स एव ब्रह्मामृतमश्नुते । अर्थात् तदनन्तरं प्रतिभोत्पद्यते । सा च प्रतिभा का ? इत्यत्र यस्याः षड्भावविकाराः, सैव प्रतिभेत्युच्यते । सैव प्रतिभा षण्णां भावविकाराणां प्रकृतिः, सैव च प्रतिभा ।

स्वभावाचरणाभ्यासयोगाद्दृष्टोपपादिताम् ।
विशिष्टोपगतां चेति प्रतिभां षड्विधां विदुः[3] ॥

इत्युक्तरीत्या षड्विधा । अस्याः स्वरूपमन्यत्र प्रतिमायां वा निरूपयिष्यते ।

अपि च—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि[4] ॥

इति ऋगर्थानुसन्धानपूर्वकम्—'ये शास्त्रतः प्रकृतिप्रत्ययविभागपुरस्सरं साधून् ज्ञात्वा शास्त्रार्थध्यानवन्तो मानसज्ञानेन वाचमसाधुभ्यः पृथक् कृतवन्तः, ते तज्ज्ञान-

---

१. छा० उ० ६।७।६ । २. वा० प० १।१३१–३२ ।
३. वा० प० २।१५४ । ४. ऋ० सं० १०।७१।२ ।

पूर्वकसाधुशब्दैर्लब्धान्तःकरणशुद्धयोऽत्र य एष दुर्गो मार्गो ब्रह्मरूपस्तत्रात्मना सह समानख्यातयस्त्यक्तभेदभावनाः सख्यानि सायुज्यानि जानते प्राप्नुवन्ति। यत एषां वाचि वेदाख्ये ब्रह्मणि या भद्रा लक्ष्मीः सर्वभासकब्रह्मरूपा सा अधि अधिकं निहिता भवति। एतच्छास्त्रसाध्यप्रयोगव्यङ्ग्यस्य ध्वनिरूपवैखरीरूपरूषितस्यैव तैर्वाचकत्व-स्वीकारेण तस्य चात्यन्तविचारे ब्रह्मातिरेके मानानुपलम्भेन तत्तदुपाधिभिन्नचित्त एव बोधकतया तैर्ग्रहात्। एवं सर्वबोधकेषु ब्रह्मबुद्धौ जातायां तेनैव दृष्टान्तेन सर्वपदार्थेषु ब्रह्मबुद्धिर्वैयाकरणानाम्'[1] इतीत्यादिनोद्द्योते नागेशभट्टेन मोक्षप्राप्तिर्वैयाकरणाना-मुपपादिता।

बन्धमोक्षस्वरूपम्

वस्तुतस्तु जडचैतन्ययोरपृथग्भावेन अहंकारग्रन्थिग्रथितस्य वार्त्तज्ञानमेव बन्धः। यद्वा तस्याश्चिच्छक्तेः पश्यन्त्यादिरूपेण परिणामे नाभौ उरसि कण्ठे च शब्द-ब्रह्मणो वृषभस्य बन्धः, तथासति मोक्षो दुर्लभः। ततस्तत्त्रितयग्रन्थिविमोके हि सर्वथा प्रयतितव्यम्।

एवं च सर्वतः प्राथम्येन शब्दब्रह्मणो रूपं प्रदर्शनीयम्। तेन कल्पितेन रूपेण ज्ञातेन सता वक्ष्यमाणपद्धत्या विशुद्धयर्थं वैदिकी पद्धतिरलम्बनीया। तथा चोक्तं तत्स्वरूपं वेदे—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यानाविवेश[2]॥ इति।

अस्या अयमर्थः—अस्य देवस्य द्वे शीर्षे आन्तरो बाह्यश्च स्फोटः। चत्वारि शृङ्गाणि दिक्-साधन-क्रिया-कालाः, इतीमानि। त्रयो जाति-व्यक्ति-सम्बन्धाः पादाः। द्रव्यगुणपुरुषसंख्योपग्रहलिङ्गवृत्तयो हस्ताः। एवं षोडशभिरङ्गैर्विशिष्टः पुरुषो हि त्रिषु स्थानेषु नाभौ उरसि कण्ठे च बद्धः। एतत्स्वरूपं परिज्ञाय बन्धच्छेदनार्थं प्रयतनीयम्। तत्रायं क्रमः—**'चित्रं देवानाम्'**[3], **'उद्वयम्'**[4], **'उदु त्यम्'**[5] इति मन्त्रैः प्रतिपाद्यते।

तथाहि देवानां देवशीलानां पश्यन्ती-मध्यमा-वैखरीरूपाणां त्रिधावस्थितानां रश्मीनाम् चित्रा परया वाचा त्रायत इति चित्रम्, अनीकम् परया वाचाऽऽप्यायितः समूहः उदगात् उद्भूतमित्यर्थः। अर्थादिकैव परा वाणी दिवि नाभौ सूर्यरूपेण पश्य-न्त्यात्मनाविर्भवति। तदेवोच्यते मित्रस्य चक्षुः प्रख्यापकमिति यावत्। सैवान्तरिक्षे उरसि मध्यमात्मना विद्युद्रूपेण विद्योतते। वरुणस्य ख्यापकमित्यर्थः। सा हि विद्युद् इरम्मदोऽप्युच्यते। सैव जलीयांशो वरुण इत्यर्थः। सैव पृथिव्यां कण्ठे वैखर्यात्मना अग्निरूपेण ज्वलति। सैव सूर्यो ज्योतीरूप इत्यर्थः।

---

१. महाभा० पस्पशा० पृ० ४४। २. ऋ० सं० ४।५८।३।
३. शु० य० ७।४२। ४. तदेव–२०।२१। ५. तदेव–७।४८।

जगतः चरस्य, तस्थुषः, अचरस्य च आत्मा व्यापक इत्यर्थः। द्यावापृथिवी अन्तरिक्षं च स आप्रा व्याप्नोदिति यावत्।

यदाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य संततो भावस्तेनात्मेति स उच्यते[१]॥

मोक्षप्राप्तौ रीतिः

एवं च सैव चिच्छक्तिः परब्रह्मरूपा त्रिविधबन्धभेदनेन प्रकाशते। अनया पद्धत्या यदा तेषां ग्रन्थीनां साक्षात्कारो भवति, समाधौ तदा त्रिविधवाक्प्रलये ब्रह्मरूपा परावशिष्यते, सैव मोक्षः, बन्धस्य च्छेदे तत्स्वरूपं विद्योतते। तत्र साधनक्रमश्च **'उद्वयम्'** इति मन्त्रेणोच्यते।

तथा हि साधको गुरूपदिष्टमार्गेण प्रथमं तमः पश्यति। तदनन्तरं तमसि विलीने स्वः शब्दं तेजश्च पश्यति (स्वृ शब्दोपतापयोरिति निष्पन्नः स्वःशब्दः)। तदनन्तरं तस्मिन् शब्दे तेजसि च लयं गते उत्कृष्टतरो देवः प्रकाशते। पूर्वोक्ते शब्दतेजसी तस्मिन् देवे विलीने भवतः। तस्मिन्नप्युत्तरे देवे लयं गते दिव्यः सूर्यो, नायं दृश्यमानः सूर्यः, प्रकाशते, यतो हि प्रतिक्षणमेतादृशा असंख्येयाः सूर्या अनन्तब्रह्माण्डकोटिनायकस्य नाटके उत्पद्यन्ते विलीयन्ते च। अस्मिन्नेव दिव्ये सूर्ये उत्तरदेवस्य लयः। ततः पश्चाद् उत्तमं ज्योतिरुद्गतं भवति। इदमेव ज्योतिः **'आख्यातोपयोगे[२]'**। इति सूत्रे भाष्ये **'ज्योतिर्वज्ज्ञानानि भवन्ति'** इत्यादिना समुट्टङ्कितम्। तेन ज्यौतिषा ज्ञानरश्मिद्वारा समाधिप्राप्तौ विश्वदर्शनसामर्थ्यमुदेति साधकानाम्। तथा चोक्तम्—**'उदु त्यं जातवेदसं देवं वहन्ति केतवो दृशे विश्वाय सूर्यम्'**[3] इति श्रुतौ त्यं वितर्क्यं जातं वेदो ज्ञानं यस्मात् तं जातवेदसं ज्ञानागारं सूर्यं केतवो रश्मय उद्वहन्ति समाधापयन्ति। किमर्थम्? विश्वाय दृशे विश्वं द्रष्टुम् इत्यर्थिकायाम्। अयमेव मोक्षः।

तथा च मोक्षविषयिण्यः श्रुतयः काश्चन प्रदर्श्यन्ते—**'चत्वारि'[४], 'उत त्वः'[५], 'सक्तुमिव'[६], 'चित्रं देवानाम्'[७], 'उद्वयम्'[८] 'उदु त्यम्'[९]** इतीमाः श्रुतयः सततमनुसन्धेया वैयाकरणैः। एतावदुक्तावपि किञ्चिदवशिष्यते तत् सर्वं विस्तरेण प्रतिमायां प्रतिपादयिष्यमाणमपि संक्षेपेणाशङ्क्य ब्रवीमि।

किं तदेव मोक्षस्वरूपं भवतां वैयाकरणानामप्यभिमतं यद्धि वेदान्तकल्पलतिकायां मधूसूदनसरस्वतीमहोदयैः प्रदर्शितम्? अत्रोच्यते—न हि तदेवास्माकं मोक्षस्वरूपमभिप्रेतम्। यतो ह्यस्माकं परमवैदिकानां मते—

---

१. वा० ५।३४। २. महाभा० १।४।१२८।
३. शु० य० ७।४१। ४. ऋ० सं० १०।१३४।४५। ५. तदेव–१०।७१।४।
६. तदेव–१०।७१।२। ७. शु० य० ७।४२। ८. तदेव–२०।२१।
९. तदेव–७।१।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति[1] ॥

इति श्रुत्या सायुज्येऽपि नहि मुक्तस्य पुरुषस्य परमात्मनि चिति वा विलयः; किन्तु बन्धनिर्मोकात् साम्येनावस्थितिः।

परमत्रापि किञ्चिद् विचार्यते। भगवन् यदि चित्स्वरूपैव परा, तर्हि एकेनाखण्डेन अभ्युपगतेन ज्ञानेन सर्वेष्टसिद्धौ ज्ञानस्य व्यक्तिः किमिति स्वीकार्या।

अत्रोच्यते—**'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'[2]** इति श्रुत्या यद्यपि शक्तिमत्पदार्थः कश्चनान्यः शक्तेरित्यायाति, तथापि **'राहोः शिरः'** इतिवत्तत्र षष्ठी उपपादनीया। न हि अस्माकं मते परायां शक्तौ स्वीकृतायाम् अन्तर्गडुना शक्त्याश्रयेणास्ति किंचित् प्रयोजनम्। सैव शक्तिरसंख्येयाः शक्तीः प्रसूते। एवं स्थितौ अंशांशिभावोऽपि पराया अस्या विविधायाः शक्तेरुद्भवे एव चकास्ति। मोक्षावस्थायामपि न हि विविधानां शक्तीनां विलयः स्वीक्रियते; किन्तु तासां शक्तीनां यथावज्ज्ञानावस्थैव मोक्षः। त्रिधा बन्धराहित्यस्य मोक्षशब्दार्थत्वात्।

अथ संक्षेपेण विभिन्नप्रकारैः पदार्थो निरूप्यते, तत्र संक्षेपेण स्फोटमुपस्थाप्य तत्संगत्या पदार्थानामुपन्यासः क्रियते।

स्फोटायनः स्फोटस्य स्मर्ता

तत्र भगवान् स्फोटायनः स्मर्ता, स हि स्फोटं प्रत्यक्षमपश्यत्। शाकटायनस्तु वैयाकरणः सर्वदा ध्यानमास्थितो व्याकरणतत्त्वमधिजगाम। यथोक्तम्—**'परोक्षे लिट्'[3]** इति सूत्रे भाष्ये **'अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानकालं नोपलभते। तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं नोपलभते। किं पुनः कारणं जाग्रदपि वर्तमानकालं नोपलभते। मनसा संयुक्तानीन्द्रियाणि उपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात्'[4]** इति। एतादृशा एव वैयाकरणा ऋषिकल्पा अखण्डस्फोटं विभज्य शब्दसाधुत्वज्ञानौपयिकान् ग्रन्थान् निर्ममुः। परं सम्पूर्णस्याखण्डस्य स्फोटस्य ज्ञानं समाधिमन्तरा दुर्लभम्। तथापि व्याकरणागमानुसारं स्फोटो द्विविधो नित्यः, कार्यश्च। तत्रापि पिण्डब्रह्माण्डयोरैक्याद् नित्योऽपि स्फोटो द्विधा विभज्यते आन्तरो बाह्यश्चेति। तत्रान्तरस्य पिण्डस्थस्य ज्ञानेन ब्रह्माण्डव्यापकस्य बाह्यस्य ज्ञानं सञ्जायते। एकस्य बाह्यस्य स्फोटस्य प्रतिपादनेन आन्तरोऽपि तथा प्रतिपन्नो भवति। खट्वाया एकपार्श्ववानेनापरपार्श्ववानमिव। आन्तर एव बाह्यरूपेण स्वात्मानं प्रकाशयति।

---

१. ऋ० सं० १।१६४।२०।
२. श्वे० उ० ६।८।
३. अष्टा० ३।२।११५;
४. महाभा०—तदेव।

अधुना नित्यस्य तस्य स्वरूपपरामर्शः

तत्र शब्दोच्चारणे द्वावर्थौ ज्ञानविषयौ भवतः। एकः स्फोटः, अपरश्च नादो ध्वनिर्वा। तत्र ध्वनिर्द्विविधः, प्राकृतो वैकृतश्च। तत्रापि स्फोटो व्यङ्ग्य इति हि नियमः। तत्र द्रुतादिवृत्तिकालस्य भेदो वैकृतध्वनिप्रयुक्तः। प्राकृतध्वनिकृतश्च ह्रस्वादिकालः। तथा चोक्तं भर्तृहरिणा स्वोपज्ञटीकायाम्—**'नादो हि प्राकृतः शब्दात्मनि प्रत्यस्यमानस्थितिरूपो भेदस्याग्रहणार्थं ह्रस्वदीर्घप्लुतकालभेदव्यवहारहेतुः। वैकृतस्तु नादो बाह्यद्रुतादिवृत्तिकालव्यवस्थां कल्पयति'**[1] इत्युक्तम्। एवं च नित्यानां स्थितौ सहकारिण्याः कालशक्तेर्व्यापारो न विद्यते। तथा चानित्या एव पदार्थाः कालशक्त्यानुगृहीताश्चिरमवतिष्ठन्ते। यदा च कालशक्तिः प्रतिकूला भवति, तदा ते शीघ्रं विनश्यन्ति। नित्येषु तु कालशक्तेर्व्यापारो नास्ति। स्वातन्त्र्यापरपर्याया कालशक्तिर्नहि नित्यस्य स्फोटस्य भेदं कर्तुं शक्नुयात्।

स्फोटतत्त्वं जानतामेव सर्वे सर्वार्थवाचका इति ज्ञानम्

अत्रेदं रहस्यम्—लोके यस्य कस्यचिद् वस्तुनो यदा प्रत्यक्षेणोपलब्धिर्भवति, तदा प्रत्यक्षविषयीभूतस्य पदार्थस्य यो ह्यपलब्धेः पूर्वकालो यश्चोपलब्धेः पश्चाद्भावी कालस्तयोर्द्वयोरवस्थयोर्ये वर्णपदवाक्यस्फोटाः सन्ति, तेषां प्रचिताप्रचितरूपाणां बुद्ध्यानुगम्यमानतत्त्वानां नास्ति कश्चन भेदः, स्वीयायां स्थितौ सदैकरूपेणावस्थानात्। तथा च लोकव्यवहारेणैव तत्र ह्रस्वत्वादिव्यवहारः, न तु स्फोटे कश्चन भेदलेशोऽस्ति, आकाशस्येव तस्य नित्यत्वात्। अयं हि स्फोटोऽखण्डो नित्यश्च। यथा एकस्याप्याकाशस्य घटादिभिरुपाधिभिस्तद्रूपेण प्रतीतिर्भिद्यते, तद्वदेकस्याप्यखण्डस्य नित्यस्य स्फोटस्य वर्णपदवाक्यादिपरिच्छेदकवशाद् भेदेन प्रत्ययो जायते। तथा च यस्य कस्यचिद् योगिनस्तादृशस्य स्फोटस्य प्रत्यक्षं भवति, तत्कृते एव **'सर्वे सर्वार्थवाचकाः'** इति ज्ञानमाविर्भवति।

वीचितरङ्गन्यायकदम्बगोलकन्यायविमर्शः

अनित्यत्वपक्षे तु स्थानकरणयोः संयोगविभागाभ्यां प्रथमं यः शब्दो ज्ञानगोचरीभवति, स स्फोट इत्युच्यते। तस्माद् जातास्तु सर्वासु दिक्षु ये वर्णश्रुतिं जनयन्ति, ते ध्वनय इत्युच्यन्ते। तत्र हि वीचितरङ्गन्यायेन शब्द उत्पद्यते, इत्येकः पक्षः। अस्मिन् पक्षे वातेनेरिता एका वीचिरुत्पद्यते, तदनन्तरं तयैव तरङ्गान्तरमिति तरङ्गपरम्परा कूलदेशमायाति। एवमेव भेरीदण्डसंयोगाद् वेणुदलविभागाद्वा जायमानः शब्दः असमवायिकारणतया शब्दान्तरं जनयतीति कृत्वा जायमाना शब्दपरम्परा श्रोत्रपथमवतरति। अस्मिन् पक्षे शब्दोत्पत्तिपक्षं केचन समर्थयन्ति।

---

१. वा० प० १।१०२—स्वोपज्ञटीकायाम्।

वस्तुतस्तु वीचितरङ्गन्यायस्य स्वरूपं न हि तैरवबुध्यते। यथा कदम्बगोलके ग्रन्थिदेशः सर्वासु दिक्षु केसराम् प्रसूते, तथैवाद्यः शब्दो दशसु दिक्षु बहून् शब्दानुत्पादयति तेऽप्यपरान् तेऽप्यपरान् इत्यनया रीत्या शब्दजशब्दपरम्परा व्यवतिष्ठते। परमियं पद्धतिर्न हि समीचीना। न हि कदम्बगोलके एकस्मात् केसरादन्यः केसर उत्पद्यते, ततश्चान्यस्ततश्चान्य इति केसरपरम्परोद्भवति, किन्तु एकस्मादेव ग्रन्थेर्बहवः केसरा उत्पद्यन्ते, ते च प्रत्येकं दशसु दिक्षु प्रसरन्ति, अनेकं श्रोत्रपथं च गच्छन्ति। नेयं रीतिः शब्दविषये संघटते। तत्र हि यदा प्रथमो नादः सञ्जातस्ततो वैकृतध्वनिरभूत्, ततश्चापरस्ततश्चान्य इति द्वयोर्नहि साम्यं परिदृश्यते। प्रत्युत वीचितरङ्गन्यायेनैव शब्दजशब्दन्यायस्य साम्यं विद्यते। यतो हि वीचितरङ्गन्यायेन सर्वदिक्कास्तरङ्गाः प्रत्येकस्मादुत्पद्यन्ते। यथा कस्मिंश्चित् सरसि निर्वातावसरे यदि एको लोष्टः प्रक्षिप्यते, तदा सर्वदिग्भागतस्तरङ्गा उत्पद्यन्ते, इत्ययमेव न्यायो युक्तो मे प्रतिभाति।

तथाचोक्तं वाक्यपदीये—

यः संयोगविभागाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजाः शब्दा ध्वनयोऽन्यैरुदाहृताः[1] ॥ इति।

विस्तरस्तु पीठिकायां प्रतिमायां वा द्रष्टव्यः।

अत्रायं निर्गलितोऽर्थः—शब्दविषये वीचितरङ्गन्याय एव दृष्टान्तत्वे साधुः। यतो हि सरसि प्रक्षिप्तो लोष्टो जले परितः सर्वासु दिक्षु मण्डलं रचयन् तटे वर्तुलमेव तरङ्गात् तरङ्गान्तरं जनयति। कदम्बमुकुले तु ग्रन्थेरुद्भवन्तः केसरा न हि केसरान्तरमुत्पादयन्ति। अनया रीत्या केसरा इव यदि बहवः शब्दा एकदैवोत्पद्येरंस्तदा शब्दानां क्षणद्वयस्थायित्वात् तृतीयक्षणे शब्दान्तरानुत्पत्त्या तच्छब्दज्ञानं सर्वथाऽसम्भवि। एतदर्थमिमं दृष्टान्तं विहाय वीचितरङ्गन्याय एव दृष्टान्ततया ग्रहीतव्यः। शब्दो हि अणुपरिमाणत्वेनाभ्युपगतोऽपि वर्तुलमेव शब्दं जनयति, स च ततो महापरिमाणम्। पुनरपि स शब्दः शब्दान्तरमित्यनया रीत्या सर्वदिक्स्थितिकाः शब्दाः कर्णपथं गन्तुं प्रभविष्यन्ति।

स्फोटस्य विभागः काल्पनिकः

अनया रीत्या साधारण्येन शब्दस्वरूपेऽवगते व्यवहारमार्गे समासीनैरस्माभिः साधुशब्दज्ञानार्थं तु कश्चन यत्नो विधेय एवेति विचार्य स्वीयस्वीयपद्धत्या अपोद्धारपदार्थरीत्या स्फोटविभागं ते चक्रुस्तैर्थिकाः। तेषु कश्चन चतुष्टयी शब्दानां प्रवृत्तिः जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाश्चेत्येवमभिमत्य चतुर्भिः प्रकारैः शब्दानां प्रविभागमकार्षीत्।

---

१. वा० प० १।१०३।

अपरश्च न सन्ति यदृच्छाशब्दा इति सिद्धान्तं स्थिरीकृत्य सर्वाणि नामानि धातुजानीति मनुते । एतन्मते त्रयी शब्दानां प्रवृत्तिः । तथा च वाक्यपदीये—

द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्[1] ॥

इत्यनेन नामाख्यातभेदेन पदद्वैविध्यमप्युपपादितम् ।

उपसर्गनिपातौ पृथक्कृत्य सङ्कलनया पदानां चातुर्विध्यं च स्वीकृतम् । कर्मप्रवचनीयं च ततो विभज्य पाञ्चविध्यमपि तेषां व्यवस्थापितम् । अनया रीत्या पदार्थोपक्षेपोऽपि वाक्यपदीये—

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः[2] ॥

इत्यादिभिः कारिकाभिः कृतः ।

तत्र प्रथमं नामाख्यातभेदेन वाक्ये द्वैविध्यमेव पदानां स्वीकृत्य व्याकरणप्रक्रियां प्रदर्शयामि । एवं द्विधाऽखण्डस्फोटस्य विभागे नामविषये समस्तानि पदानि बृहन्ति विभक्तानि विधायार्थभेदं च समालोच्य तत्तत्समासाख्याभेदभिन्नानव्ययीभावादिसमासानुपस्थापयामासुस्ते शाब्दिकाः । तदनन्तरं तदवान्तरभूतेषु शब्देषु तद्धितस्त्रीप्रत्ययान्तान् शब्दान् राशीकृत्य तत्र प्रकृतिप्रत्ययाद्यवान्तरभेदैर्लाघवेन साधुत्वज्ञानार्थं पदानि व्यभजंस्ते । तत्रापि कांश्चन शब्दान् व्युत्पन्नान्, कांश्चन चाव्युत्पन्नान् कल्पयित्वा केचनाचार्या राशिद्वयं विधाय व्युत्पन्नान् शब्दान् कृदन्तराशौ प्राक्षिपन्, अव्युत्पन्नांस्तु प्रकृतिप्रत्ययशून्यत्वाद् यदृच्छाशब्दकोटौ स्थापयामासुः ।

अपरे त्वाचार्या यदृच्छाशब्देष्वपि धातुरूपं प्रकल्प्य सर्वाणि नामानि धातुजानीति नीत्या उणादीन् प्रत्ययान् तत्प्रकृतिभूतान् धातूंश्चानुमायैकामेव कोटिं प्राचीक्लृपन् ।

एवमेवाख्यातभिन्नस्थले सुबन्तानि पदानि, आख्यातस्थले तु तिङन्तानि पदानि ते कल्पयामासुः । सुपां प्रकृतिभूतानि नामानि तिङां प्रकृतिभूतान् धातूंश्च पृथक् पृथक् ते साधयामासुः ।

अष्टानां पदार्थानां स्वरूपम्

साम्प्रतं वाक्यपदीयानुसारं पूर्वमुपक्षिप्तान् पदार्थान् स्पष्टीकरोमि ।

अपोद्धारपदार्था[3] ये ये चार्थाः स्थितलक्षणाः ।
अन्वाख्येयाश्च ये शब्दा ये चापि प्रतिपादकाः[4] ॥

---

१. वा० प० ३।१।१ । २. तदेव–१।२४ ।

३. अपोद्ध्रियन्ते इति अपोद्धाराः पदार्थाश्चेति अपोद्धृतानां पृथक् कृतानां वा पदानामर्थाः । अपोद्धारेण कल्पिता वा अर्थाः, इति शाकपार्थिवादिः । अपोद्धारसम्बन्धिनो वा इति षष्ठीसमासः । अपोद्धारो विभागः । ४. वा० प० १।२४ ।

कार्यकारणभावेन योग्यभावेन च स्थिताः।
धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु॥
ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्ननुपवर्णिताः।
स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम्[1] ॥ इति।

एतैरधस्तादुक्तैः श्लोकैरष्टौ पदार्थाः क्रोडीकृताः सन्ति। तत्र अपोद्धारपदार्थो वृक्षादिः। स्थितलक्षणपदार्थो वाक्यार्थः, नमस्यति मुण्डयत्यादिरिति द्विविधोऽर्थः। शब्दोऽपि द्विविधः, अन्वाख्येयः शब्दः पदरूपो वाक्यरूपो वा। प्रतिपादकः शब्दः प्रकृतिप्रत्ययादिरूपः, भू ति, भू अ ति इत्येवंरूपः। सम्बन्धोऽपि द्विविधः—कार्यकारणभावरूपो योग्यतारूपोऽपि। तथा चोक्तम्—'**कार्यकारणभावेन अर्थाकारनिर्भासमात्रानुगतस्य प्रत्यस्य अर्थे प्रत्यस्तद्रूपस्य अर्थत्वेन अध्यवसाये तस्यार्थात्मनः शब्दो निमित्तम्। तथार्थावग्रहदर्शनं सोऽयम् इति शब्दार्थयोः सम्बन्धप्रसिद्धेर्नादाभिव्यक्तस्यान्तःकरणसन्निवेशिनः शब्दस्य प्रवृत्तौ कारणम्**[2]' इति टीकायां भर्तृहरिणा।

एवं च—

शब्दः कारणमर्थस्य स हि तेनोपजन्यते।
तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते[3] ॥

इति कारिकासङ्गतोऽयमर्थः। तस्यां कारिकायां श्रोतृबुद्ध्युपारूढस्यार्थस्य शब्दः कारणं जनकत्वात्।

तथा चान्यस्माद् वक्तृबुद्धिनिवेशिनोऽर्थात् कारणभूतात् शब्दः श्रुतिविषयमनुप्राप्तः प्रतीयत इत्यर्थोऽपि शब्दकारणम्। एवं चोभयथा कार्यकारणभाववर्णनाद् वैलक्षण्येन शब्दार्थयोरभेदेन सम्बन्धोऽध्यासलक्षोऽपि प्रतिपादितो भवति, इत्यर्थिकया कारिकया शब्दो निमित्तम् इत्यन्तेन ग्रन्थेन शब्दस्य कारणत्वम् इत्येवं कार्यकारणभाव-

---

१. वा० प० १।२५–२६। २. तदेव–१।२६–स्वोपज्ञटीकायाम्।

३. अत्र स्थितलक्षणाः पदार्थाः वाक्यार्था वा मतभेदेन। स्थितं लक्षणमेषां स्वरूपस्य अप्रच्युतेः। अर्थात् यत्र पदार्थज्ञाने प्रकृतिप्रत्ययार्थज्ञानमुपायस्तत्र प्रकृतिप्रत्ययार्थानां तिरोधानं पदार्थस्यैव प्राधान्यात्।

यत्र च वाक्यार्थज्ञाने प्रत्ययार्थज्ञानमुपायस्तत्र पदार्थानां वाक्यार्थज्ञाने तिरोधानमिति स्थितलक्षणा इत्यस्य मतभेदेन पदार्था वाक्यार्था वा इत्यर्थद्वयम्। मया पूर्वमखण्डस्य स्फोटस्य विभागः प्रदर्शितः। वाक्यपदीयटीकायां तु—'तानि चैकपदसरूपाणि आक्षिप्तक्रियापदानि वाक्यानीति व्याख्यायन्ते। तथा पूर्वपदार्थः, उत्तरपदार्थः, अन्यपदार्थः, प्रातिपदिकार्थः, धात्वर्थः, प्रत्ययार्थ इत्येकपदवाच्योऽपि अनियतावधिर्बहुधा प्रविभज्य कैश्चित् कथञ्चिदपोद्ध्रियते।' (वाक्य० का० १ श्लो० २४) इत्युक्तम्।

लक्षणं सम्बन्धमभिधाय अत्रैवाभेदलक्षणमन्तर्भावयिष्यन्नाह तथेति। अर्थावग्रहः= अर्थपरिच्छेदः, तदात्मकं दर्शनम् अर्थाकारः प्रत्ययः। तत्रार्थः कारणं शब्दः कार्यम् इति कार्यकारणभावः। यतोऽर्थाकारया बुद्धेः शब्दाकारा बुद्धिरुत्पद्यन्ते, इत्यर्थकेन तथार्थावग्रहदर्शनमित्यादिसन्दर्भः सङ्गतो भवति। अनया रीत्या कार्यकारणभावलक्षणः अध्यासलक्षणश्चेति सम्बन्धद्वयं सङ्घटते। एवं च षट् पदार्था अधस्तनेन ग्रन्थेन समुट्टङ्किताः। एषां साधूनामर्थसम्बद्धानां शब्दानां प्रयोगेण धर्माभिव्यक्तिः, ज्ञानं च भवति। तथा चास्मिन् शास्त्रे अष्टौ पदार्थाः शास्त्रशरीरं सम्पद्यन्ते।

ते च पूर्वमुक्ता अप्यत्र संक्षेपेण प्रदर्श्यन्ते—१. अपोद्धारपदार्थो वृक्षादिः, २. स्थितलक्षणपदार्थो वाक्यार्थरूपो मुण्डयत्यादिरिति, इति द्विविधोऽर्थः। शब्दोऽपि द्विविधः, ३. अन्वाख्येयः शब्दः पदरूपो वाक्यरूपो वा, ४. प्रतिपादकः शब्दः प्रकृति-प्रत्यादिरूपः, भू ति, भू अ ति इत्येवंरूपः। सम्बन्धोऽपि द्विविधः, ५. कार्यकारणभाव-रूपः, ६. योग्यतारूपो वा, ७. एषां शब्दानां प्रयोगेण धर्माभिव्यक्तिः, ८. ज्ञानं चेति।

अपोद्धृतार्थस्वरूपम्

अस्मिन् प्रकरणेऽधस्तादपोद्धारपदार्थो मया प्रदर्शितः। तत्र पदापोद्धारे प्रदर्शिते तदर्थस्यापोद्धृतस्य स्वरूपं प्रदर्श्यते।

तथा हि सर्वेषामपि शब्दानां पदरूपाणां जातिवादिमते जातिरेव पदार्थो न द्रव्यम्। द्रव्यवादिमते तु द्रव्यमेव न जातिः। यद्वा जातिविशिष्टं द्रव्यम्, द्रव्यविशिष्टा जातिर्वा पदार्थः। यद्वा प्राधान्येनैव भिन्नविषयतया पाणिनिदर्शने जातिद्रव्ये शब्देना-भिधीयेते। अत एव मूले कारिकायां पदार्थौ इत्युक्तम्।

उक्तं च महाभाष्ये पस्पशाह्निके—'**किं पुनराकृतिः पदार्थ आहोस्विद् द्रव्यम्। उभयमित्याह। कथं ज्ञायते? उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्**[1]' इत्युच्यते। द्रव्यं पदार्थं मत्वा '**सरूपाणाम्**[2]' इत्येकशेष आरभ्यते इत्युक्तम्।

एते पक्षा वाक्यपदीये—

पदार्थानामपोद्धारे जातिर्वा द्रव्यमेव वा।
पदार्थौ सर्वशब्दानां नित्यावेवोपवर्णितौ[3] ॥

इत्यनया कारिकया समुट्टङ्किताः सन्ति।

वाजप्यायनदर्शने जातिः

तत्र वाजप्यायनदर्शने गौरित्यत्र जातिरेव वाच्यतयोपतिष्ठते, सामर्थ्यात्तु द्रव्यस्य प्रतीतिर्भवति। आख्यातस्थलेऽपि क्रियाजातिरेवाभिधीयते। गुणशब्दानामपि

---

१. महाभाष्यम्–१।२।५८। २. अष्टा० १।२।६४। ३. वा० प० ३।१।२।

शुक्लादीनां गुणजातिर्वाच्या। संज्ञाशब्दानामपि जातिवाचित्वम् इति सर्वत्रैव जाति-पदार्थव्याप्तिः सिध्यति। एवमेव जातिपदार्थवादिनये परमार्थसत्ये जातिर्महासत्ताख्या परब्रह्मस्वभावा, तस्या एव गोत्वादिजातिभेदेन व्यवहारः। सर्वभावेषु सद्रूपं सामान्य-मनुगतम्, अभावस्यापि बुद्धयाकारेण निरूपणात्। महासत्तयाऽनया अवियोगात् प्रादि-पदिकमात्रवाच्या सत्ता। तदुक्तं **'प्रातिपदिकार्थः सत्तेति'**[1]।

धातुभिरपि सत्तैवाभिधीयते। साधनपरिस्पन्दवशात् क्रियाणां व्यक्तिस्थानीयानां विशेषशब्दवाच्यानां पौर्वापर्ये तद्गतापि जातिस्तथात्वेन प्रदिभासते। साधनसम्पर्कात्तु सत्तैव सत्त्वं द्रव्यमित्युच्यत इति प्रातिपदिकस्थले सिद्धविवर्तः, क्रियास्थले तु साध्य-विवर्त इति द्विधा विवर्तः पूर्वमपि प्रदर्शितः।

यद्यपि द्रव्यपदार्थेऽपि ब्रह्मद्रव्यस्याभिधानमुपाधिभेदभिन्नस्यास्त्येव, तथापि तात्पर्यभेदादवस्थाभेदः। जातिपदार्थे सर्वत्रान्वयिरूपं जात्यात्मना ब्रह्म विवक्षितम्। द्रव्यपदार्थनये तु परिनिष्ठितरूपं परमार्थतयेति दर्शनविकल्पाश्रयम्। एवं च पक्षद्वयेऽ-प्येकपक्षीभावरूपः सिद्धान्तः। परमार्थदृष्ट्याऽत्र सर्वपार्षदत्वात् पुनरस्य शास्त्रस्य दर्शनान्तरोपन्यासः।

अत्रायं भावः—महाभाष्ये हि **'सर्ववेदपारिषदं हीदं शास्त्रं तत्र नैकः पन्थाः शक्य आस्थातुम्'**[2] इत्युक्त्या प्रातिशाख्यानि यथा तत्तद्वेदानां कृते तत्तन्महर्षिभिः प्रणीतानि, तयैव रीत्याऽस्मिन् व्याकरणे पदार्थविषयेऽपि तत्तद्दर्शनप्रणेतॄणामभिमताः पदार्था अपि तैस्तै रूपैः प्रतिपादिताः सन्ति। वस्तुतस्तु संग्रहे व्याडिपूर्वभाविभिर्महर्षि-भिर्दृष्टाः पदार्थाः प्राञ्जलं प्रतिपादिता आसन्। संग्रहमूलभूतेषु दर्शनग्रन्थेषु क्षयं नीतेषु साम्प्रतमुपलभ्यमानानि दर्शनानि व्याडेरर्वाग्भाविनो महात्मानः प्राणैषुः।

तथा च वाक्यपदीये—

सैव भावविकारेषु षडवस्थाः प्रपद्यते।
क्रमेण शक्तिभिस्ताभिरेवं प्रत्यवभासते[3] ॥

इत्यादिना निरुक्तकाररीत्या जन्मादिरूपतया तस्याः परिणामो विवर्तो वा। वाक्य-पदीयकारमते विवर्तः परिणामो वेत्यत्र वर्तते महान् विवादः।

वस्तुतस्तु परिणाम एव विवर्तपदेनाभिधीयते। हेलाराजादिमते तु विवर्तवाद एव वेदान्तिभिरभिमतः प्रसिध्यति।

ननु महाप्रलयेऽनित्यानां सर्वेषां विनाशादाश्रयाभावे कथं जातयोऽवतिष्ठेरन् इति चेत् न, महाप्रलयेऽपि आत्यन्तिकलयस्यास्वीकारात्। यद्वा ब्रह्माण्डानामनन्तत्वाद्

---

१. काशिका–२।३।४६। २. महाभा० २।१।५८। ३. वा० प० ३।१।३६।

एकस्मिन् ब्रह्माण्डे विनष्टेऽपि ब्रह्माण्डान्तरसद्भावस्य युक्तिसिद्धत्वाद् युगपत्प्रलयो नास्ति। तथा चाहुः—'**अण्डानामीदृशानां तु परिसंख्या न विद्यते**[१]।'

यद्वा प्रलयेऽपि निराश्रया एव जातयस्तिष्ठन्ति।

किञ्च बौद्धपदार्थवादिनामस्माकं बौद्धघटस्य सत्त्वात् तदाश्रयत्वं जातीनामविरुद्धम्।

'**सरूपसूत्र**'[२] भाष्ये जातिं पदार्थं वार्त्तिककारो बहुभिर्हेतुभिरस्थापयत्। तत्र प्रथमं '**प्रख्याविशेषाद्**' इत्यनेन जातिरेव बोधविषयो भवतीति प्रत्यक्षं प्रमाणं समुपन्यस्तम्। न हि गौरित्युक्ते विशिष्टा शुक्ला कपिला वा गौः प्रतीयते। तथा च विशेषानवधारणात् सामान्यस्यावसायः। एवं चात्रैव सामान्यस्योपस्थितौ '**ज्ञायते चैकोपदिष्टम्**'[3] इत्यनेनानुमानमपि तदुपोद्बलकमुक्तम्। तथा चोक्तं कैयटे 'प्रख्याविशेषादित्यनेन प्रत्यक्षं जात्यालम्बनं प्रमाणमुपन्यस्तम्। ततो विप्रतिपन्नप्रतिपादनायानुमानमिह जातिसद्भावे '**ज्ञायते चैकोपदिष्टम्**'[४] इत्यनेनोक्तम्। देशकालावस्थापिण्डान्तरेषु अबाधितप्रत्यभिज्ञाप्रत्ययोदयान्यथानुपपत्त्या सामान्यसद्भावोऽनुमीयत इत्यर्थ इति।

अनुमानप्रयोगस्त्वित्थम्

विमतप्रत्ययो जातिविषयको देशादिभेदेऽपि अबाधितैकाकारप्रत्ययत्वात् सम्मतवदिति। गौरित्युक्ते अव्यपवर्गस्य अविशेषस्य प्रतीतेर्मन्यामहे जातिरेव प्रतीयत इति। तथा च ब्राह्मणो न हन्तव्य इति स्मृतिकारवचनमपि तत्र चरितार्थं भवति। तथा अव्यपवर्गगतिरभ्रान्ता स्मृतिकाराणामपि तथैव व्यवहारात्। अनया रीत्या आकृतिः पदार्थः संक्षेपेण सिद्धान्तितः।

किञ्च '**द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः**'[५] तथा च '**तत्रासर्वद्रव्यावगतिः**' '**चोदनायां चैकस्योपाधिवृत्तेः**' इत्यनेन च जातिवादो वार्त्तिककृतैतावता सिद्धान्तितः। भाष्यकारस्तु '**एकशेषस्त्वया वक्तव्यः। त्वयापि तर्हि द्विवचनबहुवचनानि साध्यानि**' इत्यनेन पक्षद्वयमभ्यमन्यत।

निःसामान्यानि सामान्यानीति तार्किकदर्शनं वैयाकरणैर्न नियोगत आस्थेयम्। कार्यैर्न्नीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्ति। अभावाश्चत्वार इत्यत्रापि निरुपाख्यत्वं सामान्यं कल्पनीयम्।

द्रव्यं पदार्थ इति पक्षो व्याडेः

सरूपसूत्रे भाष्ये '**द्रव्याभिधानं व्याडिः**' इत्यनेन व्याडिमते द्रव्यं पदार्थः। तथा च तन्मते अर्थक्रियायां द्रव्यमेवोपयुज्यते इति तदेव प्रवर्तकमर्थिनाम्। अतः शब्देन

---

१. वा० प०—३।१।४३। २. अष्टा० १।२।४६।
३. अष्टा० १।२।४६—वा० ३६। ४. तदेव—वा० ३८। ५. तदेव—वा० ४२।

तदेवोच्यते। अनभिधीयमाना जातिरवच्छेदिका गुडशब्दे माधुर्यादय इवेति द्रव्यवादिनां दर्शनम्। द्रव्यं च द्विविधं पारमार्थिकं सांव्यावहारिकं च। सांव्यावहारिकेण च द्रव्येण व्याडिदर्शने सर्वे शब्दा द्रव्याभिधायिनो भवन्ति। अतः सांव्यावहारिकमेव द्रव्यमत्र निरूपणीयम्। **'सिद्धे शब्दार्थसंबन्धे[1]'** इत्यत्र **'द्रव्यं नित्यम्, आकृतिरन्या च अन्या च भवतीति[2]'** वदता महाभाष्यकारेण द्रव्यस्य नित्यत्वं सूचितम्। भाष्यानुसारेण विकारभेदेऽपि नित्यत्वं विवक्षितमेवेति सर्वत्र द्रव्यव्याप्तिः।

तथा चोक्तं वाक्यपदीयेऽपि—

सत्यं वस्तु तदाकारैरसत्यैरवधार्यते।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते[3] ॥ इति।

एतन्मते जातिर्न तावद् द्रव्येषु व्यासज्यवृत्तिः एकाश्रयनाशेऽप्रतीत्यापत्तेः, किञ्च गामालभेतेत्यादिनोदनासु सर्वद्रव्यालम्भापत्तिः। प्रत्येकसमाप्तौ तु द्रव्यान्तरे तदनापत्तिस्तत्रापि सत्त्वे एका जातिरिति प्रतिज्ञाहानिः। तस्मात् तत्तत्स्थानाद्युपलक्षितमधिष्ठानचैतन्यमेव द्रव्यमिति नानन्त्यव्यभिचाराविति तत्तात्पर्यम्। उपरिष्टाच्च द्रव्यपदार्थसाधकानि वार्त्तिकानि भगवता पतञ्जलिना समुपन्यस्तानि[4]। तानि यथा*— १. **'तथा च लिङ्गवचनसिद्धिः'**। २. **'चोदनासु तस्यारम्भात्'** (वा० ४७)। ३. **'न चैकमनेकाधिकरणस्थं युगपत्'** (वा० ४८)। ४. **'विनाशे प्रादुर्भावे च सर्वं तथा स्यात्'** (वा० ४९)। ५. **'अस्ति च वैरूप्यम्'** (वा० ५०)। ६. **'तथा च विग्रहः'** (वा० ५१)। ७. **'व्यर्थेषु मुक्तसंशयम्'** (वा० ५२)।

१. महाभा० पस्पशाह्निकम्। २. तदेव।
३. वा० प० ३।२।२। ४. महाभा० १।२।४६।

* १—आकृतौ पदार्थे न हि तत्र लिङ्गानि वचनानि च भासन्ते। व्यक्तावेव तेषां सत्त्वात्। तथा च ब्राह्मणी, ब्राह्मणः, ब्राह्मणौ, ब्राह्मणा इत्यत्र लिङ्गवचनसिद्धिः।

२—आकृतिवादिपक्षे शब्देनाकृतिश्चोद्यते, द्रव्ये तु कार्यं प्रवर्तते। अयुक्तं चैतत्। न ह्यन्यचोदनेऽन्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति। तस्माद् द्रव्यमेव शब्देनोच्यते इति न्याय्यम्। आकृतौ पदार्थे तु कर्मसंबन्धित्वेन आकृतौ बुद्धायां न हि तत्र क्रयो बन्धनम्, आलम्भनं वा भवेत्। अतो हि द्रव्यमेव पदार्थः।

३—न ह्येका जातिः अनेकद्रव्यगता भवितुमर्हति। न ह्येको देवदत्तो युगपत् स्रुघ्ने भवति, मथुरायां च। तथा च सत्प्रतिपक्षसंभवादत्रादित्यदृष्टान्तो न युज्यते।

४—श्वा मृत इति अभिव्यञ्जकविनाशे जाते जातेस्तिरोभावात् पिण्डान्तरे श्वा इति प्रत्ययो न स्यात्। यथा शतप्रत्यये एकापाये शतज्ञानं न भवति। यद्वा आश्रयापाये आश्रितस्याप्यपायः। अवयवापाये अवयविन इवेति जातेर्विनाशप्रसङ्गः।

५—गौश्च खण्डो गौश्च मुण्ड इत्येकस्मिन् तत्तच्छब्दप्रतिपाद्ये विरुद्धधर्मोपपत्तेरभावाद् द्रव्यमेव पदार्थः।

६—गौश्च गौश्च गौश्च गाव इत्यत्र एकार्थत्वे पर्यायाणामिव सहप्रयोगो न स्यात्।
७—विजातीयानेकार्थसरूपशब्देषु मुक्तसंशयम् एकशेषकरणम्।

एताभिर्वार्त्तिकोक्तिभिर्जात्यभावो व्याडिमतेनोक्तः। ततश्च **'लिङ्गवचनसिद्धिर्गुणविवक्षानित्यत्वात्[1]'** इत्यादिभिर्वार्त्तिकैर्जातिवादो व्यवस्थापितः।

द्वयोर्मतयोर्न विरोधः

किञ्च **'न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः, द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः। उभयोरुभयं पदार्थः कस्यचित् किञ्चित् प्रधानभूतम्, किञ्चिद् गुणभूतम्। आकृतिपदार्थकस्य आकृतिः प्रधानभूता, द्रव्यं गुणभूतम्, द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतम्, आकृतिर्गुणभूता[2]'** इति भाष्यबलेन उभे अपि मते युक्ते एव। अनयोरुभयोर्मतयोर्जातिवादः पूर्वं समुपस्थापितः। एतत्प्रघट्टके तु पारमार्थिकं द्रव्यं निरूपितम्। **'आत्मा वस्तु स्वभावश्च[3]'** इति कारिकया आत्मशब्देन तदेव द्रव्यं तत्तच्छब्दैरुच्यते। आत्मैव हि उपाधिभेदभिन्नं प्रतिभासमानं द्रव्यं पदानामर्थ इति अद्वैतवादिभिरभ्युपगम्यते इति तट्टीकायां हेलाराजः।

● ● ●

---

१. महाभा० १।२।४६। २. तदेव–पृ० २४५। ३. वा० प० ३।२।१।

शब्दार्थसम्बन्धनिरूपणाध्यायः

सम्बन्धविमर्शः, वाच्यवाचकभावः, कार्यकारणभावश्च

एतावता **जातिव्यक्तिदर्शनभेदेन** शब्दार्थं व्यवस्थाप्य शब्देनार्थस्याभिधाने सम्बन्धो हेतुरिति साधयिष्यते। सम्बन्धमन्तरा सर्वं सर्वेण प्रत्याय्येत, एतदर्थं स स्वीकार्यः। तथा हि प्रयोगेणाभिज्वलितैः शब्दैस्त्रितयमवगम्यते। स्वीयं रूपमर्थश्च फलसाधनः प्रयोक्तुरभिप्रायश्च। न चैतत् सम्बन्धाभावे संघटते, एतदर्थं शब्दार्थयोः स्वाभाविकः संबन्धो न तु सामयिकः।

अत एव—

ज्ञानं प्रयोक्तुरर्थश्च स्वरूपं च प्रतीयते।
शब्दैरुच्चारितैस्तेषां संबन्धः समवस्थितः[1]॥

इति कारिकायां **'समवस्थितः'** इत्युक्तम्।

तत्र अर्थस्वरूपाभ्यां शब्दस्य वाच्यवाचकभावः संबन्धः, प्रयोक्त्रभिप्रायेण तु कार्यकारणभावः। ननु वाच्यवाचकभावः संबन्धः प्रस्तुतस्तत्र कः प्रसङ्गो ज्ञानस्वरूपयोरिति चेत्, न, सर्वपार्षदं पुनरिदं शास्त्रम् इति ये बाह्यस्यार्थस्य वाच्यत्वं नेच्छन्ति, तन्मतोपस्कारार्थं वक्त्रभिप्रायारूढस्यैव शब्दार्थत्वे कार्यकारणभावमाह। तथा च **'शब्दः कारणम्[2]'** इत्युक्त्या शब्दार्थयोः कार्यकारणभावः संबन्धः **'गामुच्चारय', 'गां बधान'** इत्युक्त्या च परस्परमध्यासश्च संबन्ध इति। अत एव **'द्विविधः सम्बन्धः पदार्थे व्यवतिष्ठते[3]'** इति हेलाराजेनोक्तम्।

अध्यासश्च सम्बन्धः तादात्म्यम्

किञ्च **'ज्योतिर्वज् ज्ञानानि भवन्ति'** इति **'आख्यातोपयोगे[4]'** इति सूत्रस्थभाष्यप्रामाण्याद् ज्ञानशब्दप्रदीपरूपास्त्रयः प्रकाशाः सिध्यन्ति। तथा च प्रकाशा येनैव प्रकारेण परं प्रकाशयन्ति, तेनैव प्रकारेणात्मानमपि प्रकाशयन्ति। तथा सति ज्ञानमर्थं प्रकाशयदात्मानमपि प्रकाशयति। एवं प्रदीपोऽन्यरूपं प्रकाशयन् आत्मरूपमपि प्रकाशयति। तथा शब्दोऽपि वाचकोऽर्थमभिधीयमानतया प्रकाशयन् सर्वस्यापि प्रत्ययस्य शब्दानुविद्धत्वादात्मानमभिधेयतयैव प्रकाशयति। तथा च अयं गौरयमर्थ इति शब्दार्थयोरभेदेनावभासनाद् गोशब्दः स्वरूपमभिदधदेव अर्थमप्यभिधत्ते।

---

१. वा० प० ३।३।१।
२. वा० प० ३।३।३२।
३. तदेव—३।३।१—हेलाराजव्याख्या।
४. अष्टा० १।४।२९।

ननु वर्णानामानुपूर्व्येणावस्थितिर्नहि प्रतीयमानेऽर्थे समुपलभ्यते इति चेत्, सत्यम्, नास्माभिर्वैखरीरूपः शब्दो वाचकतयाऽभ्युपगम्यते; किन्तु योऽयं चिच्छक्तेर्वागात्मा व्यापार; शब्दापरपर्यायोऽश्रूयमाणोऽपि उपांशुप्रयोगे शब्द इति व्यवह्रियते। तथा च नास्माभिः साम्प्रतं पराया वाचः स्वरूपेणावस्थितायाः किञ्चित् प्रयोजनं साध्यते, नापि उद्भिद्यमानावस्थायां पश्यन्तीरूपायामपि शब्दार्थयोर्विभागेनावस्थानम्; किन्तु प्राणवृत्त्यनुप्राणितमनोभूमिसमवलम्बितनिजस्वभावस्य वाच्यवाचकरूपभिन्नशाखाद्वयावलम्बिनः समुपस्थितौ मध्यमावस्थायां परामर्शनात्मा वाचकः शब्दो भिन्नचैतन्योद्रेकात्मिकां परावस्थामभजन्नेव स्वरूपवाच्यमुखेन तत्संभिन्नमर्थं परामृशति, सामानाधिकरण्येन गौरयमर्थ इति। तथा च स वाच्योऽर्थो वाचकाध्यासवानुच्यते।

अयं च सम्बन्धः **'सिद्धे शब्दार्थसम्बन्धे[1]'** इति वार्तिकेनैव सूचितः। तत्र हि कैयटः—**'नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा। कार्यशब्दिकानामपि मते प्रवाहनित्यतयाऽर्थस्यापि जातिलक्षणस्य नित्यत्वम्'** इति।

द्रव्यपक्षेऽपि सर्वशब्दानामसत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यता, प्रवाहनित्यतया वा सम्बन्धस्यापि व्यवहारपरम्परयाऽनादित्वान्नित्यता। शब्दार्थयोः सम्बन्धश्च शक्तिरूपं तादात्म्यमेवेति च उद्द्योते।

लघुमञ्जूषायां तु तादात्म्यमूलकस्य सम्बन्धत्वेऽर्थभेदात्तत्तादात्म्यापन्नेषु शब्देषु भेदौचित्येन अर्थभेदाच्छब्दभेद इत्युपपद्यते। समानाकारत्वमात्रेण तु एकोऽयं शब्दो नानार्थ इति व्यवहारः। तस्य (तादात्म्यस्य) निरूपकाश्रयभेदाभ्यां भेद इत्येके।

अन्ये तु एकत्रैवाम्रफले रूपरसगन्धादीनां भिन्नानां तादात्म्यवत्, एकत्रैव शब्देऽनेकार्थनिरूपितानि भिन्नानि तादात्म्यानि इत्याहुः। परे तु निरूपकभेदेऽपि तादात्म्यमेकमेवेति शक्त्यैक्यमेवेत्याहुः[2]' इति।

तादात्म्यविषये पक्षत्रयम्

तथा च **'हलोऽनन्तराः संयोगः[3]', 'सरूपाणामेकशेष एकविभक्तौ[4]'** इति सूत्रस्थभाष्याभ्यां सूचितं पक्षत्रयम्। तदार्थभेदात्तादात्म्यभेदः शब्दभेदश्चेत्येकः। अर्थभेदेऽपि शब्दैक्यं तादात्म्यभेदश्चेति द्वितीयः। अर्थभेदेऽपि तादात्म्यैक्यं शब्दैक्यं चेति तृतीयः। अत्र शब्दैक्यपक्षे शक्यतावच्छेदकभेदेऽपि शक्तिरेकैवेत्येकः पक्षः। तत्रैव भाष्ये 'अस्त्येव शालासमुदाये वर्तते। अस्ति वाटपरिक्षेपे वर्तते[5]' इत्यत्रास्तिक्रियाया वृत्तिरूपार्थबोधिका वर्तत इति र्वतिक्रिया कर्त्री इति भाष्ये सर्वार्थनिरूपितवृत्तीनाम् अस्तिकर्त्रर्थको वर्तते इत्येकशब्दबोधकत्वेनाभेदबोधनादेकशक्तित्वपक्षस्य भाष्यसम्म-

१. महाभा० पस्पशाह्निकम्। २. ल० म० पृ० ५४–५६।
३. अष्टा० १।१।७। ४. तदेव–१।२।६४। ५. महाभा० १, पृ० ५९।

तत्वात् शक्तिभेदकल्पने गौरवाच्चायमेव पक्षः सिद्धान्तिसम्मत इति लघुमञ्जूषा-टीकायां प्रभायां सभापत्युपाध्यायाः ।

वाक्यपदीये तु—

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा[1] ॥

इति कारिकायां योग्यतैव सम्बन्धः, सैव शक्तिरिति निर्णीतम् । तथा च समवायादि-निमित्तानपेक्षयैव उच्चरितमात्राच्छब्दादर्थोत्पत्तेरकृत्रिमा शक्तिरवसीयते ।

किञ्च, मञ्जूषायाम् इच्छाया जनकत्वस्य वोभयवृत्तित्वाभावः । इच्छाविषय-बोधीयविषयतायामिच्छाश्रयतानियामकत्वाभावात् **'सम्बन्धो हि सम्बन्धिभ्यां भिन्नः, उभयाश्रितः, इति द्विष्ठः सम्बन्ध इति च विशिष्टबुद्धिनियामकः'** इति चाभियुक्त-व्यवहारात् । न हि तत्र विषय इच्छावान् इत्यादिव्यवहारोऽस्ति । **'जनकता शक्तिः'** इति पक्षे बोधजनकतायाः पदेऽर्थे च सत्त्वेऽपि तयोः परस्परं सम्बन्धस्य दुरुपपादत्वात् । तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिर्वाच्यवाचकभावापरपर्याया । तद्ग्राहकं चेतरेतराध्यासमूलं तादात्म्यम् ।

सम्बन्धा असङ्ख्येयाः

अस्यां स्थितौ सम्बन्धो द्विविधः—एकः स नित्यः **'सिद्धे शब्दार्थसम्बन्धे'** इति भाष्येणोक्तः, यो हि शब्दार्थयोर्वाक्यपदीयादौ विस्तरेण प्रतिपादितः । अपरस्तु असंख्यः स्वस्वामिभावादिर्नित्योऽनित्यश्च । विस्तरेणैतत् प्रतिमायां प्रपञ्चयिष्यते ।

किञ्च **'निमित्तात् कर्मयोगे'** इति वार्त्तिके संयोगसमवायात्मकः सम्बन्धः, **'चर्मणि दन्तयोः'** इत्यादौ सप्तमीविधानार्थं स्वीकृत इति वाक्यपदीये संयोगसमवायौ वैशेषिकैः स्वीकृतावित्युक्तिः कथं सङ्गच्छते इति चेत्, न, तत्र वैशेषिकमतेनैव तयोरुपा-दानात् स्वमतेन तु योग्यतारूपायाः शक्तेरेव सम्बन्धत्वेन स्वीकारात् । भाष्ये समवाय-शब्दस्तु भिन्ने भिन्नेऽर्थे प्रयुज्यते । यथा **'वृत्तिसमवायार्थ उपदेशः'** इति वार्त्तिके समवायशब्दो वर्णक्रमविशेषार्थकः ।

समवायविमर्शः

'स्थानेऽन्तरतमः' इति सूत्रे 'समाजेषु समाशेषु समवायेषु' इत्यत्र समाजेषु-उत्सव-सङ्घातेषु, समाशेषु-सहभोजनेषु, समवायेषु-धर्मनिर्णयादिक्रियायां सम्मेलनेषु इत्यर्थः । **'कारके'** इति सूत्रे **'एवं तर्हि प्रधानेन समवाये', 'अमात्यानां राज्ञा सह समवाये'** इत्यत्र समवायशब्दस्य मेलनार्थकत्वम् । **'सार्वधातुके यक्**[2]**'** इति सूत्रे भाष्ये **'द्रव्यं क्रियया समवायं गच्छति**[3]**'** इत्यत्र क्रियानिरूपितकर्मादिसंज्ञासमानाधिकरणशक्तिभिः

१. तादात्म्यव्यङ्ग्यः कारणतावच्छेदकधर्मरूपः सम्बन्धः शक्तिरित्यर्थः ।

२. अष्टा० ३।१।६७ । ३. महाभाष्यम्—तदेव ।

सम्बन्धं गच्छतीत्यर्थकत्वेन क्रियाभिनिर्वृत्तौ साधनत्वमुपैतीत्यर्थकत्वेन वा नहि समवायशब्दो वैशेषिकाभिमतनित्यसम्बन्धपरः।

यद्यपि **'कुत्सिते'** इति सूत्रे—

स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्।
समवेतस्य च वचने लिङ्गं वचनं विभक्तिं च[1]॥

भाष्ये यद्यपि समवेतमित्यस्य समवायेन सम्बद्धमित्यर्थसत्त्वेन समवायशब्दो वैशेषिकाभिमतसमवायसम्बन्धपरकः प्रतीयते; तथापि **'तस्य भावस्त्वतलौ[2]', 'स्त्रियाम्[3]'** इत्यादिसूत्रस्थ **'गुणसमुदायो द्रव्यम्'** इत्यादिभाष्यसमालोचनया अयुतसिद्धरूपादिपरमाणुरूपावयवानुगतः समूहो द्रव्यमिति स्वीकाराद् अवयवावयविभाव एव सम्बन्धो न तु समवायः स्वीकार्यः।

कैयटस्तु वैशेषिकपद्धत्या समवायं तत्रोदटङ्कयत्। अत एव **'एवं च कृत्वा संयोगसमवायाविव नेह सम्बन्धो यथाऽन्येषां च दर्शनानाम्[4]'** इति **'पदार्थीकृत[5]'** इत्यस्य श्लोकस्योपोद्घाते हेलाराजो निरदिक्षत्।

अधस्तनेन ग्रन्थेन पारमार्थिकं द्रव्यं निरूपितम्। सम्बन्धश्चानेकभेदभिन्नः संक्षेपेण परीक्षितः।

साम्प्रतं व्यावहारिकं द्रव्यं निरूप्यते। तच्च—

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः[6]॥

इत्यनया कारिकया वाक्यपदीये समुपस्थापितम्।

सर्वद्रव्यसामान्यं लक्षणम्

तथाहि इदं तदिति सर्वनामपरामर्शयोग्यं द्रव्यम्। इदमिति प्रत्यक्षार्थवाचकम्, तदिति प्रमाणान्तरावगतपरोक्षार्थाभिधानम् तेन प्रत्यक्षपरोक्षार्थाकारपरामर्शेन वस्तुमात्रवाचित्वं सर्वनाम्नामुक्तं भवति, तथा च सर्वद्रव्यसाधारणमिदं लक्षणम्। निरुक्तकारसम्मतं चेदं द्रव्यलक्षणम्।

द्वितीयं लक्षणमाह **'भेद्यत्वेन विवक्षितः'** इति। तथा च सामान्यादिभिरुपाधिभिरवच्छेद्यत्वेन अभिप्रेतं यत् तद् द्रव्यम्। एवं सति जात्यादिरपि यदि विशेष्यत्वेन

---

१. महाभा० ५।३।७४। २. अष्टा० ५।१।११९। ३. तदेव–४।१।३।
४. महाभा० ४।१।३—कैयटकृतटीका। ५. वा० प० ३।३।१२।
६. तदेव–३।२।३।

विवक्षितः, तदा द्रव्यमित्युच्यते। शास्त्रान्तरीयद्रव्यलक्षणानादराद् व्याप्तिदर्शनेन सार्वत्रिकी द्रव्यपदार्थव्यवस्था सिध्यति। यथा वाजप्यायनदर्शने जातेर्व्याप्तिमतीत्वम्, तथैव व्याडिदर्शने द्रव्यस्यापि व्याप्तिमत्त्वम्।

अत्रेदं रहस्यम्—पाणिनेर्निकाये द्रव्यपर्यायोऽधिकरणशब्दोऽप्यस्ति। **'अधिकरणैतावत्त्वे च[1]'**, **'विप्रतिषिद्धं चानधिकरणवाचि[2]'** इत्यादौ।

अधिकरणशब्दो द्रव्यवाचकोऽपि

तथा च अधिकरणशब्दोऽपि द्व्यर्थकः प्रयुज्यते। एकस्तु **'आधारोऽधिकरणम्[3]'** इत्यादिभिः संज्ञात्वेन प्रसाधितः **'सप्तम्यधिकरणे च[4]'** इत्यादौ प्रयुज्यते।

अपरस्तु द्रव्यार्थकः पूर्वत्र प्रयुक्तः। द्रव्यशब्दोऽपि **'द्रव्यं च भव्ये[5]'** इति सूत्रेण भव्यार्थे प्रसाध्यते। **'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे[6]'** इति सूत्रेऽपि प्रयुज्यते। अत्र द्रव्यशब्दो लौकिकद्रव्यपरो व्याड्यभिमतद्रव्यपरो वेति शङ्कायां वाक्यपदीये **'वस्तूपलक्षणं यत्र[7]'** इति कारिकायाष्टीकाया अन्ते 'तथा ह्यस्मिन् द्रव्यलक्षणे रूपादीनामपि द्रव्यत्वाद् अद्रव्यप्रकर्षे इत्यामुप्रत्ययाभावः, 'समयातरं शीतम्, उपांशुतरः शब्दः उच्चैस्तरो ध्वनिरिति' इति हेलाराजोक्त्या नहि लौकिकं द्रव्यं **'किमेत्तिङ्[8]'** इत्यत्र गृह्यते। तथा सति व्याड्यभिमतद्रव्यग्रहणेन पूर्वोक्तान्युदाहरणानि संगच्छन्ते।

व्याड्यभिमतं द्रव्यं गृह्यते

वस्तुतस्तु **'किमेत्तिङ्'** इति सूत्रे व्याड्युपदर्शितमेव द्रव्यं गृह्यत इत्यत्र नास्ति किञ्चिन्मानम्। तथा च लौकिकमेव द्रव्यं गृह्यताम्। अस्मिन् पक्षे पूर्वोक्तानि तरबन्तानि रूपाणि आमुप्रत्ययं विना नैव प्रयोज्यानि।

अपरेषां मते अधिकरणमेव लौकिकद्रव्यपदेन ग्राह्यम्

अपरे तु अधिकरणमेव लौकिकद्रव्यपदेन ग्राह्यम्। अन्यथा **'विप्रतिषिद्धं चानधिकरणवाचि[9]'** इति पर्युदासस्य निर्विषयत्वापत्तिः। अत एव तत्र अद्रव्यवाचीति नोक्तमित्याहुः। अस्यां स्थितौ को नाम पुरुषो न विस्मयेत, यदेतादृशे वैयाकरणनिकाये शब्ददारिद्र्यं यदेक एव शब्दः संशयपङ्के प्रक्षेप्तुम् अनेकार्थे प्रयुज्यते। एतेनानुमीयते

---

१. अष्टा० २।४।१५। २. तदेव–२।४।१३। ३. तदेव–१।४।४५।
४. तदेव–२।३।३६। ५. तदेव–५।३।१०४। ६. तदेव–५।४।११।
७. वा० प० ३।२।३—हेलाराजटीका। ८. अष्टा० ५।४।११।
९. अष्टा० २।४।१३।

यदियं पाणिनिसूत्राष्टाध्यायी न हि केवलपाणिनिनिर्मितसूत्रसमूहैरेव ग्रथिता; किन्तु बहूनि सूत्राणि पूर्वाचार्यैः कृतानि पाणिनिना स्वीयायामष्टाध्याय्यामविकलानि सन्निवेशितानि । अत एवाधिकरणशब्दः क्वचिद् गुणवदर्थकः, क्वचिच्च स्वसंकेतितार्थमभिधत्ते । **'उभयगतिः पुनरिह भवति'**[1], **'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'**[2] इत्यादीनि वचनानीत्येतदर्थपरिपोषकाणि जाग्रति । अस्यामष्टाध्याय्यां कैश्चिदेतादृशविषयगवेषणाय प्रयतितव्यम् । द्रव्यविषये भाष्यपद्धत्या विचारः प्रतिमायामेव करिष्यते ।

• • •

१. परिभाषेन्दुशेखरः–१० । २. तदेव–१ ।

गुणनिरूपणाध्यायः

सम्बन्धनिरूपणानन्तरं गुणो निरूप्यते। तत्र को नाम गुण इति जिज्ञासायां **'वोतो गुणवचनात्**[1]' इति सूत्रे।

सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते।

आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः[2]॥ इति।

प्रथमं गुणलक्षणं कृतम्। अस्यायमर्थः—द्रव्यमाश्रयते तत एव द्रव्यान्निवर्तते भिन्नजातीयेषु घटपटादिषु दृश्यते। आधेयः—उत्पाद्यः, अक्रियाजः—अनुत्पाद्यः। असत्त्वप्रकृतिः—अद्रव्यस्वभावः, द्रव्यभिन्न इत्यर्थः। अस्मिल्लक्षणे द्रव्ये निविशते तस्माच्च द्रव्यान्निवर्तते, भिन्नजातीयेषु द्रव्येषु दृश्यते इत्युक्त्या जातेः संज्ञायाश्च गुणत्वं निरस्तम्, सा हि जातिः संज्ञा वा द्रव्ये निविशमाना द्रव्यं न कदाचिज्जहाति, न च भिन्नजातीयानि द्रव्याणि अभिनिविशते जातेर्नित्यत्वात् संज्ञायाश्च यावद्द्रव्यभाविनीत्वात्, यद्यपि गवाश्वादिषु प्राणित्वमस्ति, तथापि प्राणित्वेन तेषामेकजातित्वमेव।

यद्यपि प्राणित्वं प्राणसम्बन्धिरूपं न जातिर्नाप्यखण्डोपाधिस्तथापि तस्य जातित्वाङ्गीकारेणेदम्। क्रियायास्तु पूर्वोक्तलक्षणाक्रान्तत्वाद् गुणत्वं प्राप्नोति। साऽपि हि द्रव्ये निविशते कदाचिद् द्रव्यान्निवर्तते, निष्क्रियं हि द्रव्यं कदाचिद् भवति, कदाचित् सक्रियं भिन्नजातीयानि च द्रव्याण्याश्रयति। अत आह आधेय इति उत्पाद्य इत्यर्थः। यथा घटादेः पाकजो रूपादिः। एतेन नित्यानित्यवृत्तिजातिमत्त्वं लब्धम्। अनुत्पाद्यो यथा आकाशादेर्महत्त्वादिः, क्रिया तूत्पाद्यैव न नित्येति, तस्या द्वैविध्याभावाद् गुणत्वाभावः।

एवं तु द्रव्यस्यापि गुणत्वं प्राप्नोति, अवयविद्रव्यमवयवद्रव्येषु निविशते, असमवायिकारणसंयोगनिवृत्तौ च विनाशात् ततोऽपैति, भिन्नजातीयेषु हस्तपादादिषु दृश्यते। द्विविधञ्च तत्—नित्यानित्यभेदेन निरवयवस्य द्रव्यस्यात्मपरमाण्वादेर्नित्यत्वाद् अवयविद्रव्यस्यानित्यत्वात्। अत आह **'असत्त्वप्रकृतिः'** अद्रव्यस्वभावो द्रव्यभिन्न इत्यर्थः। द्रव्यादन्य इति उत्तरलक्षणे तथोक्तेः। द्रव्यपदेनात्र गुणाश्रय उच्यते। अत्रैवं व्याख्याने पृथग्जातिषु दृश्यते इत्यनेन सत्त्वे निविशते इत्यादिना वा जातेर्वारणे सिद्धे अन्यतरवैयर्थ्यापत्तिः। किञ्च वारकेणैव जातिवारणे सिद्धे उभयोरपि वैयर्थ्यम्। किञ्च पृथग्जातिषु दृश्यते इत्यनेन जातिवारणमशक्यम्। भिन्नजातीयेषु घटपटादिषु

---

१. अष्टा० ४।१।४४।

२. तत्रैव—महाभाष्यम्।

द्रव्यत्वादिदर्शनात् । तथा च **'सत्त्वे निविशते'**[1] इति नेदं लक्षणम् । अतो भाष्ये अपर आह इत्यादिना लक्षणं कृतम् । तथा हि—

उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि ।
वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः[2] ॥ इति ।

अस्यार्थः प्रदीपोद्द्योतोक्तः 'द्रव्यं शुक्लादिगुण आगच्छति, अन्यत्तु परित्यजति, यथा वस्त्ररञ्जकः कुसुम्भेन वस्त्रं रञ्जयति, तत्र कुसुम्भपुष्पगतं रूपं वस्त्रमायाति, कुसुम्भपुष्पं तद्रक्तरूपरहितं भवति । पटुत्वादिगुणः क्वचिदायाति, क्वचिच्च नश्यति, क्वचित् पटोरपटुत्वस्य अपटोश्च पटुत्वस्य दर्शनात् पूर्वलक्षणे एवमेव व्याख्यातुमुचितम्, भिन्नजातीयेषु द्रव्येषु दृष्टः ।' पूर्वार्द्धेन संज्ञाया जातेश्च गुणत्वनिरासः । वाचकः सर्वलिङ्गानामिति गुणस्य वाचकत्वमनुपपन्नम् । अतः शब्दधर्मस्य वाचकत्वस्यार्थे आरोपाद् गुणानां वाचकत्वं लक्ष्यते । अनेन लिङ्गरहितायाः क्रियाया गुणत्वनिरासः । द्रव्यभिन्नश्च द्रव्यसदृश इति भावत्वेन सादृश्याद् अभावस्यगुणत्वनिरासः ।

उद्द्योते 'अत्र वदन्तीत्यनेन यो हि निष्कृष्टोऽर्थः प्रतिपादितः'तं दर्शयामि । गुणो नामेति प्रश्ने गुणशब्दो गुणवचनपरो **'नामैकदेशे नाममात्रग्रहणमिति'**[3] न्यायात् । एवं सति **'वाचकः सर्वलिङ्गानाम्'** इति यथाश्रुतमेव सङ्गच्छते । येषाञ्च शब्दानाम् **'आकडारादि'**[4] सूत्रे गुणवचनसंज्ञा उक्ता, तेषामत्रापि ग्रहणम् । एवं सति द्वयोर्भाष्ययोरेकवाक्यता भवति । तत्र हि समस्त-कृदन्त-तद्धितान्त-सर्वनाम-जाति-संख्या-संज्ञाशब्दातिरिक्तशब्दस्य गुणवचनसंज्ञा कृता, तस्मादत्रापि विशेषणैस्तद्व्यावृत्तिरेव युक्ता । तथा हि तत्र **'सत्त्वे निविशतेऽपैति'**[5] इत्यनेन संज्ञानिरासः ।

न हि संज्ञाजातिशब्दा द्रव्ये विद्यमाने एव रक्तादिशब्दवत् कदाचिद् वाचकत्वेन प्रवर्तन्ते, कदाचिन्न प्रवर्तन्ते । जातिषु पृथग् दृश्यते इत्यनेन सर्वनामनिरासः । यथा शुक्लादयः शब्दाः समाने शुक्ले गवि शुक्लशब्दः अश्वे कर्कशब्दः नैवं सर्वनामशब्दा नियतविषयाः । चार्वादयोऽपि शब्दाः क्वचिच्चारुरिति क्वचिच्चारुतर इत्येवंरूपेण प्रयुज्यमाना दृश्यन्ते, नैवं क्वचिदपि सर्वतर इति भवति । आधेय इत्यनेन संख्याशब्दनिरासः । न हि संख्यावाचकशब्दो रक्तादिगुणवाचकशब्दवद् द्रव्ये विद्यमाने यत्नाधेयार्थको भवति । अर्थात् तस्य संख्यावाचकशब्दस्य आधेयरूपा या संख्या, सा विद्यमाने तस्मिन् संख्यावाचके शब्दे नहि आधातुं शक्यते । अनयैव रीत्या जातिरपि नाधातुं शक्यते तद्वाचके शब्दे ।

---

१. अष्टा० ४।१।४४—महाभाष्यम् ।	२. तदेव ।
३. अष्टा० ४।१।४४—महाभाष्यम् ।	४. तदेव—१।४।१ ।
५. तदेव—४।१।४४—महाभाष्यम् ।

अक्रियाज इत्यस्य क्रियाप्रतिपादकधात्वजन्य इत्यर्थः, तेन कृदन्तनिरासः। समासतद्धितान्तयोः प्रायेण सत्त्ववाचकं सुबन्तमेव प्रकृतिर्भवति, इति सत्त्वभिन्नप्रकृतिकत्वं न तयोरिति असत्त्वप्रकृतिरित्यनेन तयोर्निरासः।

गुणलक्षणम्

'उपैत्यन्यद्'[1] इत्यादिश्लोके तु उपैत्यन्यज्जहात्यन्यदित्यनेन संज्ञाशब्दनिरासः। न हि संज्ञाशब्दस्तस्यामेव व्यक्तौ वाचकत्वेन च वर्तते, न च वर्तते। दृष्टो द्रव्यान्तरेष्वपि इत्यत्र पृथगिति शेषः। तथा च सर्वनामशब्दा द्रव्यान्तरेषु पृथग् नहि दृश्यन्ते; किन्तु सर्वेऽपि सर्वनामशब्दाः सर्वत्र समानभावेन प्रयुज्यन्ते, नहि कर्कशुक्लशब्दवन्नियतविषया भवन्ति, तेन च सर्वनामनिरासः। वाचकः सर्वलिङ्गानामित्यनेन जातिनिरासः, न हि जातिवाचकाः सर्वेषु लिङ्गेषु जातिप्रवृत्तिनिमित्ततया प्रयुज्यन्ते।

न च **'उपैत्यन्यज्जहात्यन्यदित्यनेन'**[2] जातेर्व्यावृत्तिः कर्त्तुं शक्यते। तथा हि याज्ञवल्क्यस्मृतौ—

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्[3] ॥

इत्युक्तम्।

अस्यार्थः—जात्युत्कर्षः—उत्कृष्टजातिप्राप्तिः, सप्तमे अपिशब्दात् षष्ठे पञ्चमे वा ज्ञेयः, अर्थाद् विप्रोढा शूद्रा कन्यां सूते, सापि तदूढामन्यामिति सप्तमं विप्रं सूते, एवं विप्रोढवैश्याजन्या षष्ठं विप्रं सूते। विप्रोढक्षत्रियाजन्या पञ्चमं विप्रं प्रसूते, क्षत्रियाच्छूद्रोत्पन्ना षष्ठं क्षत्रियम्, वैश्यजा पञ्चमं वैश्यं सूते इति पूर्वार्धार्थः। एवं विप्रस्य क्षात्रवृत्त्याऽपत्यपरम्परयाऽनापदि जीवने पञ्चमः क्षत्रियः। वैश्यवृत्तौ जीवने षष्ठो वैश्यः। शूद्रवृत्तौ षष्ठः शूद्रः, वैश्यस्य शूद्रवृत्तौ पञ्चमः शूद्र इति। एतत्सर्वमनापदि स्मृत्यन्तरप्रामाण्यात्। तथा च तद्वर्णवृत्त्या सप्तमादौ ब्राह्मणत्वादिजातेर्निरासाद् विश्वामित्रादौ तत्सम्बन्धाच्च। आविष्टलिङ्गा जातिर्यल्लिङ्गमुपादाय प्रवर्तते, उत्पत्तिप्रभृत्याविनाशात् तल्लिङ्गं न जहाति, इति **'विशेषणानां चाजातेः'**[4] इति सूत्रे भाष्योक्ते तद्वाचकानां न सर्वलिङ्गवाचकत्वम्। अनेन संख्यानिरासोऽपि विंशत्यादीनां सर्वलिङ्गत्वाभावात्।

द्रव्यादन्य इत्यस्य द्रव्यवाचकप्रातिपदिकप्रकृतिकादन्य इत्यर्थः, द्रव्यवाचकान्यप्रकृतिक इत्यर्थो वा। तेन समस्ततद्धितान्तयोर्निरासो द्वितीयपादस्थेन अपिना अधातुजत्वस्य ग्रहणम्, तेन कृदन्तनिरासः। अत एव उत्तरसूत्रे बहुग्रहणं चरितार्थम्। कृदन्तनिरासो यदि न स्यात् तर्हि बहुशब्दस्यापि गुणवचनत्वे स्त्रीप्रत्ययसिद्धौ

---

१. अष्टा० ४।१।४४—महाभाष्यम्।
२. अष्टा० ४।१।४४—महाभाष्यम्।
३. या० स्मृ० ९७।
४. अष्टा० १।२।५२।

'बह्वादिभ्यश्च'[1] इति सूत्रे बहुग्रहणवैयर्थ्यमापतेत्, संख्याशब्दस्य गुणवचनत्वादिति। कैयटव्याख्यानेऽपि आधेयश्चेत्यादिना संख्यावारणसम्भवः।

वस्तुतो **'वोतो गुणवचनात्'**[2] इति सूत्रस्थं भाष्यमेकदेश्युक्तिः व्याख्यालेशस्याप्यभावात्। **'आकडार०'**[3] इति सूत्रे स्वयमुक्तत्वाच्च भगवताऽत्र गुणवचनलक्षणं नोट्टङ्कितम्। तथा च **'वोतो गुणवचनाद्'**[4] इति सूत्रे आकडारसूत्रोक्तमेव गुणवचनत्वं ग्राह्यम्। एवमेव **'गुणवचनब्राह्मणादिभ्यः कर्मणि च'**[5] इत्यत्राऽपि तदेव गुणवचनत्वं मन्तव्यम्।

नवीनमतस्यैकदेश्युक्तिः

नवीनास्तु **'वोतो गुणवचनाद्'**[6] इति सूत्रे तत्सूत्रस्थभाष्योक्तमेव लक्षणं ग्राह्यम्। न च तद्भाष्यमेकदेश्युक्तिः, तद्घटकानां सर्वेषां पदानां सार्थक्यात्। तथा च भाष्यकृता यस्मिन् सूत्रे वार्तिके वा गुणस्वरूपं वाच्यवृत्या व्यञ्जनया वा न प्रदर्शितम्, तत्र आकडारसूत्रोक्तं गुणवचनत्वमभ्युपगन्तव्यमिति वदन्ति। **'पूरणगुण'** इति सूत्रे तु गुणार्थशब्देन गुणवाची सन् गुणोपसर्जनद्रव्यवाची गुणिबोधकप्रकृतिकभावप्रत्ययान्तश्च गृह्यते व्याख्यानात्, आकडारसूत्रोक्तगुणवचनानां तु नेह ग्रहणम्, वचनपदानुपादानात्। एवं सति **'ब्राह्मणस्य शुक्लाः'**, **'काकस्य कार्ष्ण्यम्'** इति तदुदाहरणे दत्ते।

परे तु ब्राह्मणस्य शुक्ला इति न तदुदाहरणम्। षष्ठ्यन्तं समर्थप्रकृतिकेन सुबन्तेन समस्यत इत्यर्थसत्त्वेन सामर्थ्याभावादत्र समासप्राप्तेरभावात्। तथा हि सुबन्तेन शुक्ला इति पदेन वाक्यैकदेशन्यायेन **'शुक्लाः दन्ताः'** इत्यर्थबोधः। एवञ्च सुबुत्पत्तिः शुक्लशब्दात् स्वार्थे एवेति न समर्थप्रकृतिकता सुपः, अत एव **'ब्राह्मणस्य ग्रामं गतः'** इत्यर्थके **'ब्राह्मणस्य गतः'** इति वाक्ये प्रकरणादिना ग्राममित्यर्थस्योक्तन्यायेन गत इत्यनेनोक्तौ समासो न, नेष्यते च तत्र समास इति **'कर्मणि च'**[7] इति सूत्रे भाष्यकैयटयोः स्पष्टम्। तस्मात् कार्ष्ण्यादय एवात्रोदाहरणम्, गुणिपरतापि शुक्लादीनां विशेषद्रव्योपादाने प्रकरणादिना तदवगतौ वा नान्यत्राभिधानस्वाभाव्यादित्याहुः।

अस्य समासस्य च नानित्यत्वम्। अत एव **'सर्वश्वेतः'** इत्यादौ **'गुणेन न'**[8] इति निषेधात् कथं समासः इत्याशङ्क्य **'गुणात्तरेण समासस्तरलोपश्चेति'**[9] वचनमारब्धम्। **'सर्वं गुणकात्स्न्यर्म्'**[10] इति सूत्रे भाष्ये।

---

१. अष्टा०—४।१।४५। २. तदेव—४।१।४४। ३. तदेव—१।४।१।
४. तदेव। ५. अष्टा० ५।१।१२४। ६ तदेव—४।१।४४।
७. अष्टा० २।२।४। ८. तदेव—६।२।९३—महाभाष्यम्।
९. तदेव—६।२।९२—महाभाष्यम्। १०. तदेव—६।२।९३।

संख्याशब्दा भावशब्दा इति 'योजनशतं गोविंशतिः' इत्यादौ च नायं निषेधः। तथा च 'पङ्क्तिविंशति[१]' इति सूत्रे भाष्यम् 'त एते विंशत्यादयः समुदाये सन्तो भाववचना भवन्ति' इति 'विंशत्यादिषु भाववचनेषु' इति च।

यस्तु तत्रैषां गुणवचनव्यवहारोऽपि, स तु तत्सादृश्यात्। अन्यथा धनमित्युपक्रम्य 'धनमेको गुणः, अपत्यमेको गुणः[२]' इत्यपि भाष्योक्तेः। चैत्रधनं चैत्रापत्यमित्यादि न स्यादिति लघुशब्देन्दुशेखरे उक्तम्। 'षष्ठी[३]' इति सूत्रे भाष्ये तत्स्थैश्च गुणैरिति वार्त्तिकोपरि—

तत्स्थैश्च गुणैः षष्ठी समस्यते इति वक्तव्यम्।
ब्राह्मणवर्णः चन्दनगन्धः पटहशब्दो नदीघोषः॥

अत्र कैयटः—इह केचिद् गुणाः शब्देन द्रव्यान्निष्कृष्टा एव प्रत्याय्यन्ते, न तु द्रव्यस्योपरञ्जकत्वेन। यथा चन्दनस्य गन्ध इति सर्वत्र वैयधिकरण्यमेव गुणगुणिनोः, न कदाचित् चन्दनं गन्धः इति सामानाधिकरण्यं भवति' शुक्लादयस्तु गुणाः कदाचिन्निष्कृष्टरूपाः शब्दैरुच्यन्ते पटस्य शुक्ल इति। तस्माद् द्विविधगुणसद्भावात् तत्स्थैरिति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तम् इति ब्राह्मणवर्णादय उदाहरणम्। अथ बलाकायाः शौक्ल्यमिति समासः कस्मान्न भवति। तत्स्थं हि शौक्ल्यं सर्वदा वैयधिकरण्येन सम्बन्धात्। नैष दोषः। शौक्ल्यशब्देन शुक्लो गुणोऽभिधीयते। शुक्लशब्दस्य द्रव्ये वर्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते भावप्रत्ययविधानात्, न चासौ तत्स्थः। अभेदाध्यवसायेन द्रव्यं प्रत्यनुरञ्जकत्वदर्शनाच्छुक्लः पट इति अर्थस्य च तत्स्थत्वमाश्रीयते इति शब्दभेदेऽप्यर्थस्याभेदान्नास्ति शुक्लस्य गुणस्य तत्स्थत्वम्। रूपवान् पट इत्यादौ तु नास्ति गुणगुणिनोरभेदाध्यवसायः, भेदाश्रयेणैव मत्वर्थीयप्रयोगादिति रूपस्य तत्स्थत्वमव्यावृत्तमिति पटरूपमिति समासो भवत्येव[४]' इति।

तस्मादत्र व्याख्यानात् केवलगुणवाची सन् यो गुणिबोधकः, तत्प्रकृतिकभावप्रत्ययान्तप्रतिपाद्यानां गुणपदेन ग्रहणम्, अर्थपदान्वयाच्च तद्बोधकशब्दमात्रग्रहणम्। एवं च प्राधान्यगौरवादौ निषेधाप्रसक्तिरेव नहि तत्र 'पटस्य शुक्लः', 'पटस्य शौक्ल्यम्' इतिवद् 'अर्थस्य गुरुः', 'बुद्धेर्मन्दः' इति प्रयोगो भवति। एवमेव तत्स्थैश्च गुणैरित्यत्रापि तेनैव गुणवाचकेन समासः, येनापरस्य पदस्य वैयधिकरण्यमेव।

तल्लक्षणस्यैकदेशयुक्तित्वाभावसमर्थनम्

अत्रायं निर्गलितोऽर्थः—**'वोतो गुणवचनात्[५]'** इति सूत्रस्थं गुणलक्षणं न ह्येकदेशयुक्तिः; किन्तु तादृशमेव गुणवचनत्वं तत्र गृह्यते। **'तत्स्थैश्च गुणैः[६]'** इति वार्त्तिके तु गुणपदेन तेषामेव गहणम्, यत्सन्निधाने वैयधिकरण्यमेव गुणगुणिनोः प्रतीयते।

---

१. अष्टा०–५।१।५९। २. अष्टा० ५।१।५९–महाभाष्यम्। ३. तदेव–२।२।८।
४. अष्टा० २।२।८–महाभाष्यम्। ५. तदेव–४।१।४४। ६. तदेव–महाभाष्यम्।

'पूरणगुण'[1] इत्यत्र तु केवलगुणवाची सन् यो गुणिबोधकः, तत्प्रकृतिकभाव-प्रत्ययान्तप्रतिपाद्यानां गुणपदेन ग्रहणम्। अस्यां स्थितौ गोविंशतिरित्यादौ समास-निषेधः प्राप्नोत्येव न हि। अत एव **'क्रोशशतयोजनशतयोरुपसंख्यानम्'**[2] इति वार्त्तिक-प्रयोगः सङ्गच्छते। 'ब्राह्मणस्य शुक्ला' इत्यस्य एकदेश्युक्तित्वाभावे तु संख्यावाचकानां भाववचनत्वमेव, न तु गुणवचनत्वं **'पङ्क्तिविंशति'**[3] इत्यादिसूत्रे संख्याशब्दानां गुण-वचनत्वेन व्यवहारस्तु गुणवचनसादृश्याद् बोध्यः। 'वोतो गुणवचनात्' इति सूत्रे तु तत्सूत्रोक्तमेव लक्षणं ग्राह्यम्। 'सर्वश्वेतः' इत्यादौ 'गुणेन न'[4] इति निषेधात् समासो न स्यात्, तदर्थं **'गुणात्तरेण तरलोपश्च'** इति वार्त्तिकोक्तौ तु यदा नहि पूरणगुणेति सूत्रस्थं भाष्यमेकदेश्युक्तिः, तदापि बुद्धिमान्द्यादौ ज्ञापकस्य नोपयोगः। पूरणगुणेत्यत्र गुणपदेन केवलगुणवाची सन् यो गुणिबोधकः तस्य तत्प्रकृतिकभावप्रत्यान्तप्रतिपाद्यस्य च ग्रहणात्।

अष्टाध्याय्यां दिक्पदप्रयोगः, वार्त्तिके च

तथा च कः पदार्थोऽङ्गीकर्तव्यः? कश्च नेत्याकाङ्क्षायां यान् पदार्थानुद्दिश्य सूत्राणि वार्त्तिकानि भाष्याणि च प्रवृत्तानि तेषां निरूपणं तु सामयिकमेव मन्तव्यम्। तत्र सूत्रेषु **'दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु'**[5] **'दिक्शब्देभ्यः सप्तमीपञ्चमी-प्रथमाभ्यो दिग्देशकालेष्वस्तातिः'**[6], **'दिक्पूर्वपदाट्ठञ् च'**[7], **'दिक्पूर्वपदादसंज्ञायाम्'**[8] **'दिक्पूर्वपदन् ङीप्'**[9], **'दिक्संख्ये संज्ञायाम्'**[10], **'दिगादिभ्यो यत्'**[11], **'दिङ्नामान्यन्तराले'**[12] इत्यादौ।

वार्त्तिके च **'दिक्शब्देभ्यस्तीरस्य तारभावो वा'**, **'दिक्समाससहयोगयोश्चा-न्तरालप्रधानाभिधानात्'**[13] इति। तथा एतद्वार्त्तिकोपरिभाष्येऽपि—**'अथ मतमेतद् दिशि दृष्टो दिग्दृष्टः, दिगदृष्टः शब्दो दिक्शब्दो दिशञ्च यो न व्यभिचरति'** इत्यादौ दिश उद्दिष्टाः सन्ति, तत्र दक्षिणा उत्तरा इति दिक्शब्दौ दक्षिण उत्तर इति व्यवस्था-शब्दौ **'पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्'**[14] इत्यादौ च व्यवस्था-वाचकाः शब्दाः समुद्दिष्टा विद्यन्ते।

---

१. अष्टा० २।२।११।
२. तदेव–५।१।७४।
३. तदेव।
४. तदेव–२।२।११।
५. अष्टा० ६।२।१०३।
६. तदेव–५।३।२७।
७. तदेव–४।३।६।
८. तदेव–४।२।१०७।
९. तदेव–४।१।६०।
१०. तदेव–२।१।५०।
११. तदेव–४।३।५४।
१२. तदेव–२।२।२६।
१३. तदेव–२।२।२८-महाभा०।
१४. अष्टा० १।१।३४।

अस्यां स्थितौ केयं दिगिति चिन्तायामुक्तं भर्तृहरिणा—

शक्तिरूपे पदार्थानामत्यन्तमनवस्थिताः ।

दिक् साधनं क्रिया काल इति वस्त्वभिधायिनः[1] ॥ इति ।

हरिमतेन दिशः स्वरूपम्

अत्र हि हेलाराजः—**'तथा हि परोपाधिरूपाः शक्तयो दिगाद्याः पारतन्त्र्यञ्च शक्तिलक्षणमिति क्रियाऽपि द्रव्यपरतन्त्रा शक्तिरिति व्यपदिश्यते। वैशेषिकनये च दिग् द्रव्यं नोपपद्यते। कार्यानुमेयत्वेन पदार्थोपकाररूपस्य शक्तित्वस्य न्याय्यत्वात्'** इति तथा चेयं दिगाख्या शक्तिः कालाख्या शक्तिरिव विराजते। इयञ्च व्यापिका अमूर्त्ता च। तथा चोक्तं वाक्यपदीये—

सर्वत्र तत्र कार्यस्य दर्शनाद्विभुरिष्यते ।

विभुत्वमेतदेवाहुरन्यः कार्यवतां विधिः[2] ॥ इति ।

किञ्च यथा कालो ब्रह्मणः शक्तिभावेषु प्रतिबन्धाभ्यनुज्ञाव्यापारोऽध्यस्तनानात्वात्, तथा दिगपि सोपाधिभिन्ना पूर्वापरादिभावभेदनिबन्धनीत्याह। तदुक्तं वाक्यपदीये—

तस्याश्च शक्तेः पूर्वादिर्भेदो भावान्तराश्रयः ।

भिन्ना दिक् तेन भेदेन भेदायैवोपकल्पते[3] ॥ इति ।

'दिक्कालावाकाशादिभ्यः[4]**'** इति सांख्यमार्गमवलम्ब्य नास्माभिर्गन्तुं शक्यते। तथा हि—'प्राङ्मुखोऽन्नानि भुञ्जीत अपराह्णे श्राद्धं कुर्यात्' इत्यादयो व्यवहारा दिक्कालयोः प्रत्याख्याने न प्रकल्पेरन्। तथा चोक्तं वाक्यपदीये—

सङ्करो व्यवहारणां प्रकृतेः स्याद्विपर्यये ।

तस्मात्त्यजन्निमान् भावान्पुनरेवावलम्बते[5] ॥ इति ।

अनया रीत्या (बाह्यार्थनिरूपणरीत्या) दिक् समर्थिता, इदानीमन्तःक्षेपनीत्या समर्थ्यते। तथा चाह भर्तृहरिः—

अन्तःकरणधर्मो वा बहिरेवं प्रकाशते ।

अस्यान्त्वन्तर्बहिर्भावः प्रक्रियायां न विद्यते[6] ॥ इति ।

---

१. वा० प० ३।१२।१।
२. तदेव—३।६।१७।
३. वा० प० ३।६।२०।
४. सां० सू० २।१२।
५. वा० प० ३।६।१९।
६. तदेव—३।६।२३।

अन्तःक्षेपनीत्या दिक्समर्थनम्

तथा चान्तःकरणधर्मश्चैतन्यमेव अनाद्यविद्यावशात् स्वरूपनिष्कर्षेण इदमिति बहिराकारावभासेऽपि परमार्थतो बाह्यस्यायोगात् स्वभावे च जगत् प्रत्यवभासते इत्यन्तरवस्थितस्यैव व्यापारः । तथा च वक्ष्यति—

द्यौः क्षमा वायुरादित्यः सागराः सरितो दिशः ।
अन्तःकरणधर्मस्य भागा बहिरवस्थिताः[1] ॥ इति ।

तस्यान्तःकरणतत्त्वस्यायं धर्मो बाह्यार्थापेक्षोऽविद्यावशात् स्वभावभूतोऽवभासः, एवं पूर्वाद्याकारेण बहिरध्यवसीयते । असति बाह्ये कथं बहिरध्यवसीयत इति चेदाह— अस्या अविद्यावशादवभासस्यैव बाह्यत्वावभासरूपायां कल्पनायामन्तारूपता बहीरूपता च न मुख्या । परानुरोध्यनुप्रतिभासवशेनैवमुच्यते । सति हि बाह्ये तदपेक्षमान्तरत्वमपि मुख्यमिति काल्पनिकोऽन्तर्बहिर्भावः । एवञ्च पूर्वापरत्वमविद्याध्यस्तं भावेष्वन्तारूपेषु अनादिमिथ्याभासे वासनालक्षणान्तःकरणधर्मरूपं चकास्ति, न बाह्या काचिद् दिगस्ति । इतो विशिष्टं प्रतिमायां प्रपञ्चयिष्ये ।

• • •

१. वा० प० ३।७।४१ ।

साधननिरूपणाध्यायः

साधनस्वरूपम्

तत्र साधनं निरूपयन्नाह भर्तृहरिः—

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः ॥

इति वाक्यपदीयकारिकातः **'किं पुनः साधनम्'** इति प्रश्ने गुण इत्याहेति प्रातिपदिकार्थसूत्रभाष्यात् आश्रितत्वाच्छक्तिरेवात्र गुणशब्देन विवक्षिता ।

अस्याः कारिकाया अयमर्थः—क्रियाया आश्रये आश्रयान्तरे वा समवेतानां क्रियाणां सिद्धौ यत् सामर्थ्यं तदेव साधनं ज्ञेयम् । तथा च शक्तिः कारकमिति पक्षो भाष्यसिद्धः । 'परोक्षे लिट्' इति सूत्रे भाष्ये द्रव्यं साधनमुपन्यस्तम् । तथा चोक्तं वाक्यपदीयटीकायाम्—**'शक्तं हि द्रव्यं साधनं न तु निराधारा शक्तिः सम्भवति'** इति तथा चोक्तं तत्रैव—**'यदि तावद् गुणसमुदायः साधनम्, साधनमप्यनुमानगम्यम् । अथान्यद् गुणेभ्यः साधनं भवति प्रत्यक्षपरोक्षाभ्यां सम्भव'** इति ।

'उपसर्गाच्छन्दसि धात्वर्थे' इति सूत्रे भाष्ये द्रव्यस्य साधनत्वमुक्तम् । तथा हि **'साधनेऽयं भवन् लिङ्गसंख्याभ्यां योक्ष्यते'** इति । **'साधनशब्देनात्र शक्त्याधारो द्रव्यं विवक्षितम्'** इति च तत्र कैयटः । अस्यां स्थितौ शक्तिः कारकं शक्तिमत् कारकम् इति पक्षद्वयं भाष्यसिद्धान्तसिद्धम् । स च साधनव्यवहारो बौद्धो बाह्यश्च । तत्र बौद्धमेव साधनव्यवहारं परिकल्प्य बहूनां 'भीत्रार्थानां भयहेतुः' इत्यादीनां सूत्राणां प्रत्याख्यानं भाष्योक्तं सङ्गच्छते ।

एवं सति बुद्ध्या साधनव्यवहारोपपत्तौ एकस्यापि वस्तुनः शक्तिनानात्वं बौद्धं समुपपद्यते । तत्र द्रव्यव्यतिरिक्ता शक्तिः साधनमित्येकं दर्शनम् । द्रव्याव्यतिरिक्ता शक्तिरित्यपि दर्शनं केषाञ्चित् । तथा च मीमांसकवैशेषिकदर्शनेन शक्तिः साधनमिति सिद्धम् । तथा च केषाञ्चिन्मतेन पदार्थव्यतिरिक्ताः शक्तयः । केषाञ्चित्तु सहकारिसाधनोपकृतो भावः स्वरूपेणैव कार्यजनकः, अदृष्टशक्तिकल्पनं व्यर्थमिति आत्मैव भावानां शक्तिरिति ।

किञ्च यद् यदाऽनुगृहीतम्, तदा तत्र तत् साधनम् इति क्रियाया अपि साधनत्वं भाष्याभिमतम् । अत एव सम्प्रदानसंज्ञायां **'क्रियाग्रहणं कर्तव्यमित्युक्त्वा इह कश्चित् कञ्चिदर्थं सम्पश्यति, स दृष्ट्वा प्रार्थयमानो व्यवसायं करोति अध्यवसाये प्रारम्भः, प्रारम्भे फलप्राप्तिरिति सन्दर्शनाभिराध्यमानत्वात् क्रियापि कृत्रिमं कर्मेति'** भाष्य उक्तम् ।

अपि च 'सामग्रीसाध्यत्वात् सर्वे एव कारकत्वं क्रियानिष्पत्तिविषयभेदेन प्रतिपद्यन्ते इति। यदा तु कः कथं पचतीति विवक्षा, तदा प्रधानक्रियानिष्पादनाद् विचित्रव्यापाराणि शब्दरूपाणि यथास्वं व्यापारातिशयवशेन करणादिसंज्ञाः प्रतिलभन्ते' इति। अग्रे तत्रैव सर्वेषां कारकाणां स्वरूपं यथा वाक्यपदीये समुट्टङ्कितं, तथा दर्शयामि—'यत्र हि अन्येषां साधनानां व्यापारो न भवति, स कर्ता। निर्वृत्तिविकारप्राप्तिभिर्यस्य संस्कार आहितः, स कर्तुः क्रियया ईप्सितः कर्म। हेतुतामनुभवन् कारकान्तरव्यापारैरव्यवहितं व्यापारं यस्य तत् करणम्। प्रेरणानुमनननिराकरणव्यापारकर्मणा सम्बध्यमानं सम्प्रदानम् अपायमवधिभावोपगमनेन साधयदपादानम्। कर्तृकर्मव्यवहितक्रियाधारः अधिकरणम्। स्वतन्त्रः प्रेषयन् हेतुरिति सामान्यपूर्वकत्वाच्च विशेषस्य अवान्तरव्यापारोऽपि कारकत्वमनुवृत्तिकरणं कारकमिति करणं कारकमिति सामानाधिकरण्योपपत्तिः। अकारकस्य च विशेषसंज्ञाभावो वृक्षस्य पर्णं पतति[1]' इत्यत्र यथा।

कारकस्थले व्यापारद्वयं भवति। एको व्यापारो धातुवाच्यः, अपरश्च तदवाच्यः। यत्र च देवदत्तः स्थाल्यामोदनं पचतीत्यादौ देवदत्तादीनां कर्तॄणां व्यापारो नापेक्ष्यते, तदा स्थाली पचति, एधाः पचन्ति, ओदनः पच्यते, असिश्छिनत्ति इत्यादौ प्रधानक्रियानिरूपितं कर्तृत्वं स्थाल्यादीनाम्। 'संप्रदानापादानयोः स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति, द्वितीयस्य आदातुरपगन्तुश्चापेक्षणात्'।

वस्तुतः सम्प्रदानापादानयोर्न कारकत्वम्

वस्तुतस्तु पाणिनेः पूर्वं सम्प्रदानापादानयोः कारकत्वमेव नासीत्। यतो हि यत् कारकं भवति, तदवश्यमेव कर्ता भवेत्। यथा कर्मकरणाधिकरणानि अविवक्षया 'ओदनः स्वयमेव पच्यते', 'असिश्छिनत्ति', 'स्थाली पचति' इत्यादौ कर्तृत्वं भजन्ते, नैवं सम्प्रदानापादाने क्वचिदपि अविवक्षया रामो ददाति पर्वतः पततीत्यादिरूपेण कर्तृत्वमासादयतः। न च 'शृङ्गात् शरो जायते', 'अजाविलोमभ्यो दूर्वा जायन्ते' इत्यत्रापादानत्वस्याविवक्षयाऽपादानमपि कर्तृत्वं भजते, इति, तस्यापि कारकत्वे न काचिद् बाधाऽऽपतति, प्रत्युत पूर्ववदत्राप्येतस्य कारकत्वासादनादिति वाच्यम्, द्वयोरपि स्थलयोरधिकरणस्यैव युक्तियुक्तत्वात् 'शृङ्गे शरो जायते', 'अजाविलोमसु दूर्वा जायन्ते' इत्यर्थस्यैव तत्र प्रतीतेः। केवलं पञ्चमीविधानार्थमेवापादानत्वं तयोर्विधीयते। यदि हि अधिकरणे पञ्चमीविधानार्थं तादृशं किञ्चित् सूत्रं निरमास्यत्, तदा तत्रापादानत्वस्य न हि कश्चनोपयोगोऽभविष्यत्।

अपि च यथा कर्तृकर्मकरणाधिकरणेषु कृधातुरनुस्यूतोऽस्ति, न हि तथा सम्प्रदानापादानशब्दयोः। एतेनापि न तयोः कारकत्वं युक्तियुक्तम्, वक्ष्यमाणवाक्य-

---

१. वा० प० ३।७।१८–टीकायाम्।

पदीयटीकासन्दर्भोऽपि अस्मिन्नंशे साहाय्यं भजते। किञ्च भगवान् भाष्यकारो '**बहुगण-वतुडति संख्या**' इति सूत्रे '**एवमिहाप्यसंख्यां संख्येत्याह संख्यावदिति गम्यते**' इत्याह। एतेनापि स्पष्टं प्रतीयते यद् भगवान् पाणिनिः बहुषु स्थलेषु अतथाभूतेष्वपि तथात्व-भूतत्वेन व्यवाहरत्। तथैवात्रापि भगवान् पाणिनिः अकारकं कारकमित्याह।

निष्कृष्टार्थः

अत्रेदं रहस्यम्। आख्यातस्थले द्विविधा क्रिया प्रतीयते, एका धातुवाच्या, अपरा च कारकाश्रया। तत्र धातुवाच्या क्रिया कर्तृकर्मकरणाधिकरणेष्वपि वर्तते, न हि सम्प्रदानापादानयोः। अत एव न हि तत्र कर्तृत्वेन विवक्षा भवति। तथा चोक्तं वाक्यपदीये टीकायाम् 'अनपेक्षिते कर्तृव्यापारे स्थाली पचति, एधाः पचन्ति, असिश्छि-नत्तीति, प्रधानक्रियायामेवैषां कर्तृत्वम्, सम्प्रदानापादानयोः स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति द्वितीयस्या दातुरपगन्तुश्चापेक्षणात्[1]'। अत एव '**सिद्धं तु प्रतिकारकं क्रियाभेदात् पचादीनां करणाधिकरणयोः कर्तृभावः[2]**' इति कारके सूत्रे वार्त्तिककृतोक्तम्। प्रधान-क्रियार्थेषु यथास्वं कारकव्यापारेषु पचादीनामेव निर्वृत्तिर्वर्णिता, तदेतद् भाष्ये उक्तम्—'**सामान्यभूता या क्रिया वर्तते, तस्या निर्वर्तकं कारकम्[3]**' इति। एतस्य विषयस्य स्फोरणार्थं भाष्यादिसन्दर्भः प्रदर्श्यते। तत्रत्यं भाष्यं चेत्थम्—

'**अपादानादीनां त्वप्रसिद्धिः[4]**' अपादानादीनां तु कर्तृत्वस्याप्रसिद्धिः। यथा हि भवता करणादीनां कर्तृत्वं निर्दर्शितम्, न तथाऽपादानादीनां निदर्श्यते। प्रदीपः—'न तथेति। न ह्यपादाने ग्रामे ग्राम आगच्छतीति प्रयोगोऽस्ति'। उद्द्योतः—'भाष्ये अपादानादीनामिति। आदिना सम्प्रदानं बहुवचनं तु प्रयोगबाहुल्याभिप्रायेण। एवं च तयोः कारकसंज्ञाऽप्राप्तिरिति भावः'। 'न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा' इति।

भाष्यम्—'**न वा एष दोषः, किं कारणम्? स्वतन्त्रपरतन्त्रत्वात् सर्वत्रैव स्वातन्त्र्यं पारतन्त्र्यं च विवक्षितम्, तयोः पर्यायेण वचनम्। तयोः स्वातन्त्र्यपार-तन्त्र्ययोः पर्यायेण वचनं भविष्यति। वचनाश्रया च संज्ञा भविष्यति। तद् यथा बलाहकाद् विद्योतते विद्युत्, बलाहके विद्योतते। बलाहको विद्योतते**' इति।

प्रदीपः—बलाहकादिति। निःसरणाङ्गे विद्योतने द्युतिर्वर्तते। बलाहके स्थित्वा ज्योतीरूपा विद्युद् विद्योतत इत्यर्थः। बलाहक इति विद्युतो बलाहकस्य चाभेद-विवक्षायामयं प्रयोगः' इति।

---

१. वा० प० ३।७।४६। २. म० भा० १।४।२३।

३. तदेव। ४. तदेव।

तत्रत्यभाष्यप्रदीपोद्द्योतानामयमाशयः

यद्यप्यपादानस्थले तस्मिन्नेवार्थे कर्तृत्वमविवक्षया अपादानादीनां न भवति, यथा हि करणादीनाम्। एवं ब्राह्मणाय ददातीत्यर्थे ब्राह्मणो ददातीति प्रयोगाभावः। **शब्दशक्तिस्वाभाव्याच्चापादानसम्प्रदानव्यापारे धातुर्न वर्तते**[1]' इति। इति कैयटोक्ता धात्वर्थभूता क्रिया तयोर्न वर्तते इति कारकत्वं कथम्? तथापि तत्र कारकत्वोपपत्त्यर्थं 'वस्तुतस्तु अपादानस्यावधिभावेनावस्थानं व्यापारोऽस्ति' सम्प्रदानस्याप्यनुमननादिलक्षणः प्रतीयमानोऽपि व्यापारः कारकव्यपदेशनिबन्धनम्। यथा 'प्रविश पिण्डीम्' इति कैयटोक्त्या 'धात्वर्थाभावेऽपि ग्रामादिपदैरेव तस्य प्रतीत्या तन्निरूपितं कारकत्वं कारकशब्दघटककृधात्वर्थत्वात् तस्य व्यापारस्येति भावः' इति। उद्द्योतोक्त्या च कारकत्वव्यपदेशार्थं तत्र कारकपदघटककृधात्वर्थक्रियाश्रयत्वाच्च कारकत्वं संप्रदानापादानयोर्व्यवस्थापनीयम्।

वस्तुतस्तु नेयं वस्तुस्थितिः; किन्तु कारकत्वप्रयुक्तकार्यसम्पत्त्यर्थमेव तयोः कारकत्वं व्यवस्थाप्यते। 'संबन्धः क्रियाकारकपूर्वकः[2]' इत्यनेन शेषेऽपि क्रियायाः सत्त्वात् कारकत्वापत्तिः। तथा चोक्तं वाक्यपदीये—

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियया सोऽभिधीयते[3]॥

अत्रैव टीकायां 'कारकेभ्योऽन्यः कर्मादिविशेषलक्षणेभ्यः षड्भ्योऽन्योयं संबन्धः, स शेष इति उपयुक्तेतरवचनशेषशब्दाश्रयेण 'कारकाणामविवक्षा शेष' इति भाष्यं व्याख्यातम्। क्रियाकारकपूर्वक इत्यनेन कारकत्वं व्याचष्टे शेषस्य। तथाहि—'राज्ञः पुरुषः', 'वृक्षस्य शाखा', 'पशोः पादः', 'पितुः पुत्रः' इत्यादावश्रूयमाणक्रियाविषये स्वस्वामिभावावयवावयविभावजन्यजनकभावादौ सम्बन्धे ददाति-स्थिति-जन्यादिक्रिया-प्रभाविते पूर्वभाविकारकत्वमुत्तरावस्थायामप्यनुगतमिति भवत्येव शेषः कारकम्। राजा हि पुरुषाय ददाति, यतस्ततो राज्ञः पुरुष इति स्वस्वामिभावोऽवतिष्ठते। तत्र क्रियाकारकभावः सम्बन्धः कारणभूतः। शेषसम्बन्धस्तु फलभूतः। क्रियाकारकसंबन्धो हि वृत्तः स्वाश्रये शेषसम्बन्धफलं निवेश्योपरमते। तत्र पूर्वं कर्तृसम्प्रदानरूपौ राजपुरुषावभूताम्। शेषसम्बन्धकाले तु कर्त्रादिविशेषरूपतानवगम इति तच्छेषभूतं सामान्यं कारकत्वमवतिष्ठत एव। अस्यां स्थितौ यथा संबन्धस्य न कारकत्वं तथैव सम्प्रदानापादनयोर्ज्ञेयम्[4]' इति।

वस्तुतस्तु पूर्वोक्तयुक्त्या चत्वार्येव कारकाणि अभ्युपगन्तव्यानि, तत्रैव धात्वर्थव्यापारस्य सत्त्वात्। सम्प्रदानापादानयोर्धात्वर्थो व्यापारो नास्तीत्यत्र भाष्यकैयटा-

---

१. महाभा० १।४।२२–प्रदीपः। २. वा० प० ३।३।१७।
३. वा० प० ३।३।१। ४. वा० प० ३।३।१–टीकायाम्।

दीनामपि सम्मतिः। तस्माद् असंख्यायाः संख्या संज्ञेव कारकसंज्ञापि अकारकस्येति सर्वं सुस्थम्।

हेतुसाधनयोर्भेदः

अत्र प्रत्येकसाधनविषयेऽनुक्त्वा साधारण्येन मया यत् किञ्चिदुक्तम्। अधुना हेतुसाधनयोः प्रयोजकत्वसाम्येऽपि विषयभेदाद् भेदं दर्शयामि। तथा चोक्तं वाक्यपदीये–

द्रव्यादिविषयो हेतुः कारकं नियतक्रियम्।
कर्ता कर्त्रन्तरापेक्षः क्रियायां हेतुरिष्यते[1]॥

एवं च हेतुर्द्विविधः, तत्र द्रव्यगुणक्रियान्यतमनिरूपितत्वे सति अव्यापारसव्यापारान्यतरवृत्तिरेकः, यद्यपि सव्यापारस्थले करणत्वस्यैव न्याय्यत्वादत्र हेतुत्वस्वीकारो न युक्तियुक्तः, तथापि तत्र सतोऽपि व्यापारस्याविवक्षया हेतुत्वमेव स्वीकार्यम्, न तु करणत्वम्। अपरो हेतुः, प्रयोज्यकर्तृशक्तिव्यवधाने क्रियायामप्रयुज्यमानः प्रयोज्यकर्तारं प्रेषयंस्तत्प्रयोजकः कारकविशेषो न त्वयं रूढो हेतुः। अयं कर्तृसंज्ञश्च **'तत्प्रयोजको हेतुश्च[2]'** इत्यनेन सूत्रेण तस्य सेतुसंज्ञा, कर्तृसंज्ञा च विधीयेते। इत्थं द्विप्रकारको हेतुः।

अस्मिन् पाणिनीये व्याकरणे एतादृशी पद्धतिः परिदृश्यते, यद् भगवान् पाणिनिरसन्दिग्धां पद्धतिं नेच्छति। अत एव शाब्दिकमूर्धन्योऽपि बहुषु स्थलेषु सन्देहोत्पादकानेव शब्दानुपन्यस्यति। यथा प्रकृत एव कर्तुः प्रयोजकस्य हेतुसंज्ञैव कृता। तस्याः प्रयोजनं **'हेतुमति च[3]'** इति सूत्रेण णिज्विधिः। **'हेतौ[4]'** इति सूत्रेणापि तृतीया विधीयते, तत्र च लौकिको हेतुर्गृह्यते। ईदृश्यामवस्थायां तादृश एव संज्ञाशब्दः प्रयोक्तव्यो यत्र संशयो मा भूत्। **'उभयगतिः पुनरिह भवति[5]'** इत्येतादृशस्य वचनस्योपयोगश्च नापेक्ष्येत।

वाक्यपदीयकारमतेन तादर्थ्येऽपि हेतुहेतुमद्भावोऽभ्युपेयते। तथाहि हेतुर्द्विविधः, एकः प्रातिलोम्योपलक्षितः, यथा काष्ठैः पचतितरामित्यादौ। तत्र हि काष्ठरूपहेतोरवस्थाऽपचीयमाना इति प्रातिलोम्योपलक्षितो हेतुः। यत्र ह्युपचिततरमेव कार्यं जनयत् कारणं तत्रानुकूल्योपलक्षितो हेतुः। बीजादङ्कुरो जायते इत्यादौ यथा बीजमुदकातपसंयोगेन आहितविशेषम् उच्छूनतरोच्छूनतमावस्थम् अङ्कुरप्रसवसमर्थम् इति द्वितीयः। तद्विशेषस्तु तादर्थ्यम्, अनुकूल्येनोपलक्षितो हिरण्यरूपो हेतुः कुण्डलरूपं कार्यं जनयतीति तादर्थ्यं हेतुहेतुमद्भावस्याद्भुतं रूपम्। अत्र हि कारणवाचकात् तृतीया न भवति चतुर्थ्यैव कारणगतधर्मस्य बोधनादुक्तार्थानामप्रयोग इति न्यायात्। तादर्थ्यस्याविवक्षणात् तु षष्ठी एव भवति यथा गुरोरिदं गुर्वर्थमित्यादौ।

---

१. तदेव–३।७।२५। २. अष्टा० १।४।५४। ३. तदेव–३।१।२६।
४. तदेव–२।३।२३। ५. तदेव–१।१।२३–प० ९।

साधनविषये मतान्तराणि

साधनविषये वाक्यपदीयकारो मतान्तराणि निर्दिशति। तत्र प्रथमं तावद् अनित्यानां पदार्थानां स्वशरीरादेव शक्तीनामुद्भवः। नित्यानां तु स्वाभाविकी शक्तिः। यदा सहकारिसन्निधाने कार्योद्युक्ता भावाः, तदा ते साधनमित्युच्यन्ते इत्येके।

केचित्तु क्रियायाः पूर्वं निमित्तान्तराच्छक्तयो जायन्ते। एवं सत्यपि शक्ताशक्तयोर्वस्तुनोः प्रत्यभिज्ञायमानत्वान्न वस्तुभेद इति वदन्ति।

कैश्चित्तु येनैव कारणेन क्रिया जन्यते, तेनैव शक्तय इति सहजत्वं मन्यते।

केचित्तु येनैव कारणेन क्रिया जन्यते, न तेनैव साधनमपि त्वन्येनैवेत्याहुः।

(१) अपूर्वं धर्माधर्माख्यमदृष्टसंज्ञकं भावं केचिदाहुः। अदृष्टवशादेव सर्वं भवति, न च भवति। इति अदृष्टमेव सर्वकार्याणां निमित्तम्।

(२) केचित्तु कालशक्तिमेव भगवतो ब्रह्मणः सम्बन्धिनः साधनमाहुः। कालशक्त्या अनुप्राणितं हि सर्वं क्रियायै प्रभवति।

(३) क्रियां वा राजसीमनन्तरोपवर्णितस्वरूपां साधनमाहुः। न तूत्तरकालभावि किञ्चन साधनं नाम शक्यं निरूपयितुम्। सर्वं क्रियामूलं साधनं व्याख्यातम्। तथा च पूर्वं साधनं क्रियामूलत्वेनोपन्यस्तम्। अधुना क्रियैव साधनमिति विशेषः।

(४) कालमेव वा नित्यमेकम् इत्यादिलक्षणलक्षितं द्रव्यं कालवादिनः साधनमाहुः। कालवशाद्धि सर्वे भावाः प्रभवन्ति, कार्यसम्पत्तये इति काल एव साधनम्।

शक्तिः साधनमिति मते तासां भेदः

पूर्वं शक्तिः साधनमित्युक्तम्। तत्रैकेषां मतेन तासां भेदमाह। अन्येषां मते च अर्थेषु नित्याः षट् शक्तयः पृथग्लक्षणलक्षिताः कर्माद्या व्यवस्थिताः। ताश्च यदि भेदेन समन्वितास्तर्हि अर्थस्य शक्तिरहितत्वान्नीरूपता स्यात्। अर्थाभिन्नाः कथ्यन्ते तर्हि विभिन्नकार्योदया नावतिष्ठन्ते। तस्माद् भेदाभेदसमन्विताः शक्तयोऽर्थजातिवदवस्थिताः। तासां च द्रव्यभेदादानन्त्येऽपि तत्त्वं षट् शक्तीर्नातिवर्तते। द्रव्यभेदेन भिन्ना शक्तिः, यथा दात्रमन्यथार्थं छिनत्ति खण्डोऽन्यथेति। आकारभेदेन खण्डोऽन्यथावयवी, दात्रं ह्यन्यथेति।

द्रव्याकारादिभेदेन ताश्चापरिमिता इव दृश्यन्ते। तत्त्वमासां तु षट् शक्तीर्नातिवर्तते। तथा चोक्तं वाक्यपदीये—

द्रव्याकारादिभेदेन ताश्चापरिमिता इव।
दृश्यन्ते तत्त्वमासां तु षट् शक्तीर्नातिवर्तते[1]॥

---

१. वा० प० ३।७।३६।

अत्रादिग्रहणाद्देशकालभेदेन सैव दहनशक्तिरग्निवैचित्र्यमुपपादयन्ती वस्तुनः स्वरूपं नातिक्रामति ।

अथवा एकैव शक्तिर्निमित्तभेदाद् विशिष्टरूपतया षोढात्वमापन्ना साधनम् । तथा चोक्तं तत्रैव—

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।
षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निबन्धनम्[1] ॥ इति ।

यस्मात् कर्तृत्वमेव इष्टतमत्वादिना षोढावस्थितं सत् शक्तिभेदस्य प्रवृत्तेः कारकव्यवहारस्य निमित्तभूतम् । यथोक्तं पच्यन्तां विक्लित्त्यै, एधाः ज्वलिष्यन्तीति क्रिया करणस्य पाक इत्यादिन्यायेन कर्तृत्वमेवावान्तरव्यापारविवक्षया करणादिव्यपदेशं भजते ।

शक्तिः भिन्ना

तथा च शक्तिविषये मतान्तराण्युपन्यस्य सा शक्तिर्व्यतिरिक्ता, अव्यतिरिक्ता वेति विचार्यते । सर्वथा शक्तिशक्तिमतोर्भेदाभेदयोर्भेद एवेत्युच्यते । एवं च वैयाकरणानुसारिभिस्तत् सामर्थ्यं व्यतिरिक्तमेवोच्यते । लोकप्रतीत्यनुसारेण हि शब्दस्यार्थो वितन्यते । अव्यतिरेके हि सततं क्रियानिष्पत्तिप्रसङ्ग इति ।

इदानीं वैयाकरणमताद् भिन्नं मतमुपपादयति वैयाकरणनयेन तत् सामर्थ्यं व्यतिरिक्तमेवोच्यते । तथा हि—

परमार्थे तु नैकत्वं पृथक्त्वाद् भिन्नलक्षणम् ।
पृथक्त्वैकत्वरूपेण तत्त्वमेव प्रकाशते[2] ॥

इत्युक्तं वाक्यपदीये ।

परमार्थे तु पृथक्त्वव्यतिरिक्तमेकत्वं नास्ति, इति पृथक्त्वैकत्वरूपेण तत्त्वमेव प्रकाशते । अविद्यादशायां पृथक्त्वेन प्रकाशते । अविद्याविलये त्वेकत्वेन प्रतीयते ।

असन्दिग्धं यत् पृथक्त्वं तद् एकत्वान्न भिद्यते । एतच्चैकत्वम्, तत् पृथक्त्वान्न भिद्यते । तथा चैकमेव सच्चिन्मयं शब्दब्रह्म आकाशः, पृथिवी, वायुः, सूर्यः, समुद्रः, सरितः, दिश इत्यादिसर्वमप्यन्तःकरणतत्त्वस्य भागा बहिरवस्थिता इत्येवंरूपेण प्रत्यवभासते ।

इदानीं वैयाकरणमतमेव सिद्धान्तयति । तन्मतेन अव्यतिरेके सत्यपि प्रकृत्यर्थस्य वृक्षे, वृक्षाय इत्यादौ विभक्त्यर्थस्य साधनलक्षणस्य भेदः ।

द्वयोः स्थलयोर्वृक्षरूपाया एकस्याः प्रकृतेः सत्त्वेऽपि विभक्तिभेदादर्थभेदप्रतीतिरिति मन्यामहे **'अस्ति कश्चिद् व्यतिरिक्तः साधनलक्षणशक्तिशब्दवाच्योऽर्थ इति साधनसिद्धिः**[3]**'** इति ।

---

१. वा० प०–३।७।३७ । २. वा० प० ३।७।३९ । ३. वा० प० ३।७।४३–टीकायाम् ।

अद्यावधि साधनस्वरूपमभिधाय तद्विशेषस्य व्याख्येयस्य स्वरूपमाह वाक्यपदीये—

सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः ।
षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी[1] ॥

तथा च कर्मादिभेदेन षट् कारकाणि सन्ति, शेषभेदेन सप्तमी शक्तिरिति सप्त शक्तयो लक्ष्यन्तेऽधुनेति विशेषतो विवरणं प्रतिमायां भविष्यति ।

अस्मिन् साधनविचारे वाक्यपदीयानुसारं क्वचिच्च महाभाष्यानुसारमपि साधनं प्रस्तुतम् । वाक्यपदीये हि न हि विशुद्धं वैयाकरणमतमेव समुपन्यस्तम्, किन्तु **'सर्ववेदपारिषदम्'** इदं शास्त्रमिति शब्दसाधुत्वविषयकं वाक्यपदार्थविषयेऽपि सञ्चारितम् । भूमिकाया विस्तरभिया न हि मया विशकलिततया पदार्थाः स्फोरिताः, नाप्यस्मिन् साधनस्वरूपप्रदर्शने साधनविशेषाः समुट्टङ्किताः, किन्तु अत्यन्तं संक्षिप्ततया केवलं दिग्दर्शनमेव कृतम् । प्रतिमायां भगवद्दयया पूरयिष्यमाणायां वैयाकरणमतं पार्थक्येनोपन्यसिष्यत इति साम्प्रतमेतावतैव सन्तोष्टव्यम् ।

• • •

१. वा० प०–३।७।४४ ।

क्रियानिरूपणाध्यायः

तत्रात्यन्तमपरिदृष्टायाः क्रियाया निरूपणमन्यनिरूपणापेक्षया दुष्करमिति तत्स्वरूपं प्रदर्श्यते। भूवादिसूत्रे **'पाठेन वा धातुसंज्ञायां समानशब्दप्रतिषेधः', 'परिमाणग्रहणं च वा'** इत्याभ्यां वार्तिकाभ्यां क्रमशः टाबन्तयाशब्दस्य भ्वेध इति समुदायस्य च धातुत्वं वारितम्। ततः **'क्रियावचनो धातुः'** इति वार्त्तिकमुपन्यस्य तद्वार्त्तिकद्वयं निष्फलीकृतम्। तथा च भ्वेध् इति समुदायस्य उक्तयाशब्दस्य च क्रियावाचित्वाभावाद् धातुत्वं न भवति[1]। तत्र का पुनः क्रिया? ईहा[2]। का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः। तदनन्तरं सर्वथा भवान् शब्दैरेव शब्दानाचष्टे, न किञ्चिदर्थजातं निर्दिशति एवंजातीयका क्रियेति उपहस्य **'क्रिया नामेयमत्यन्तापरिदृष्टाऽशक्या पिण्डीभूता निदर्शयितुम्, यथा गर्भो निर्लुठितः। सासावनुमानगम्या'** इति।

द्रव्यस्थले अवयवप्रत्यक्षत्वम्, क्रियाया अवयवस्यापि न प्रत्यक्षत्वम्

तथा चावयवरूपक्रियाया अप्यप्रत्यक्षत्वमेव, अन्यथा घटावयवदर्शनेन लोके घटस्य यथा प्रत्यक्षत्वव्यवहारो भवति, तथैवात्रापि क्रियाया अवयवप्रत्यक्षत्वे क्रियाया अपि प्रत्यक्षत्वं स्यात्, भवति तु न हि। अत एव उद्द्योते—**'इदं च योगिप्रत्यक्षविषयं तेषामेवावयवक्रियाप्रत्यक्षात्। अस्माकं तद्व्यवहारपरम्परया सर्वथा विकल्पात्मक एव प्रयोगः क्रियापदानामिति बोध्यम्'**। एतच्च **'वर्त्तमाने लट्[3]'** इति सूत्रे ध्वनितम्।

---

१. 'भ्वेध' इति समुदायस्य धातुत्वापादनेन अर्थनिर्देशस्याधुनिकत्वं समायाति। परं **'चुटू'** (१–३–७) इति सूत्रे भाष्ये 'उबुन्दिर् निशामने', 'स्कन्दिर् गतिशोषणयोः' इति कथनेन न हि सर्वोऽप्यर्थनिर्देश आधुनिकः; किन्तु क्वचिदेवेति भ्वेध इत्यत्रावयवानां वाचकत्वेऽपि दशदाडिमादिवत् समुदायोऽनर्थक इति भाव इति कैयटः।

२. मानसव्यापार इच्छारूप ईहा। **'इच्छाकाङ्क्षा स्पृहेहातृट्'** इति कोशात् **'समानमीहमानानाम्'** इति भाष्यप्रयोगाद् **'ईहं चेष्टायाम्'** इत्यर्थनिर्देशाच्चेति भावः।

कैयटः—यावद् द्रव्यव्यतिरेकेण क्रियासद्भावे प्रमाणं न प्रोक्तम्, तावत् पर्यायोपादानमात्रेण तस्याः स्वरूपं न निश्चीयत इत्यर्थः। उद्द्योतः—स्वरूपम्–द्रव्यव्यतिरेकः। **अर्थेति**। अत्रेदं तत्त्वम्—कारकं न क्रिया, तस्यां कारकानन्वयापत्तेः कारकाणां मिथः सम्बन्धायोग्यत्वात्। तस्माद् द्रव्यातिरिक्तक्रियासिद्धेः सर्वथेत्युपहासः कारकातिरिक्तक्रिया **प्रत्यक्षेण** नोपलभ्यत इत्येवंपरो वाच्यः। स चेष्ट एवेति गूढाभिसन्धिप्रत्युपहासपरं **क्रिया नामेत्यादि** भाष्यम्।

३. अष्टा० ३।२।१२३।

यद्यपि कैयटे एकैकस्य क्षणस्य प्रत्यक्षत्वं दर्शितम्, तथापि तत्र क्षणशब्दस्य अधिश्रयणाद्यर्थत्वं मन्तव्यम् । अयोगिनां क्षणस्याप्रत्यक्षत्वात् ।

अधिश्रयणादिरपि समूहरूप एव

परे तु अधिश्रयणादिरपि नैकक्षणात्मकस्तस्यापि हस्तप्रसारणपात्रादानचुल्लीसंयोजनादयोऽवयवाः सन्त्येवेति सोऽपि समूहरूप एव । यस्तु तेषामप्यवयवः परमाणुप्रख्यः, स तु शब्दशक्तिस्वाभाव्यान्नैव वाच्यो नापि प्रत्यक्षः । अनुमानं त्वेवम्—उत्तरदेशसंयोगादिफलं कारणजन्यं कार्यत्वादिति । तच्च कारणं प्रसिद्धातिरेकि इतरबाधबलात् क्रियारूपमेव सिध्यतीति भाष्यतात्पर्यमित्याहुः । एवं स्थितौ भाष्ये **'कारकाणां प्रवृत्तिविशेषः क्रिया**[1]**'** इति लक्षणं कृतम् । अत्र हेलाराजः 'सर्वेषां वा कारकाणामेकः प्रवृत्तिविशेषः प्रतिकारकं भिन्ना वा प्रवृत्तिरिति आद्ये पक्षे फलभूता भूति—पक्त्यादिका अन्या वेति द्वैतम् । तत्र न तावत् सर्वेषामेकः प्रवृत्तिविशेषः, असम्भवात् । तस्मात् प्रतिकारकं भिन्ना वा प्रवृत्तिः क्रिया । इत्थं च क्रियावाची धातुरिति सकलकारकाभिधायी धातुः प्राप्तः । परन्तु कर्तृकर्मणोर्लकारोत्पत्तेस्तद्व्यापार एव लान्तात् प्रतीयते[2]' इत्येकीयमतम् ।

करणादिव्यापारे एव धातोर्वृत्तिर्न सम्प्रदानादिव्यापारे

अन्ये मन्यन्ते सम्प्रदानादिव्यापारे धातोर्न वृत्तिः, करणादिव्यापारे एव तु वृत्तिः । तथा च करणादावेव स्वातन्त्र्यविवक्षा नापादानादौ । इत्थं चाधिश्रयणोदकसेचनादिना कर्त्रादीनामेव व्यापारः क्रियेति क्रियायाः स्वरूपमात्रं कथितं न तु धातुवाच्यत्वम् ।

अन्ये तु विशेषपदे भरं कृत्वा प्रवृत्तीनां विशेषः प्रवृत्तिविशेष इति सकलकारकजन्या विक्लित्यादिरूपा भूतिः फलभूता कारकप्रवृत्तेः क्रियेति व्याचक्षते ।

कर्तृव्यापार एव सर्वत्र धात्वर्थः

अपरेषां पुनः कारकमत्र प्रधानं विवक्षितं कर्तृरूपम्, न पुनरप्रधानं करणादि । बहुवचनं त्वनेकक्रियाभेदेन कर्तृभेदात् । कर्तृग्रहणमेव न कृतं कर्मणि लकारदर्शनात्, तस्य व्युदासो मा भूदिति । तेन यत्र सम्भवति कर्म, तत्र तद्व्यापारोऽपि क्रिया अग्रे कर्मणोऽसर्वविषयत्वात् कर्तैव प्रधानं कारकमत्र विवक्षितमित्युक्त्वापि कर्तृव्यापार एव सर्वत्र धात्वर्थ इतीदं दर्शनम् ।

सकलकारकानुयायिक्रिया

अन्ये तु **'सामान्यभूता क्रिया वर्तते'** इत्येतद्भाष्यानुसारेण प्रवृत्तिमात्रमगृहीतविशेषं सकलकारकानुयायि क्रियेति मन्यते ।

---

१. महाभा० ३।२।१२३ । २. तत्रैव टीकायाम् ।

व्यक्तिवादेन क्रियालक्षणोऽपोद्धारपदार्थः

'षड् भावविकारा भवन्ति' इति निरुक्तकारवचनाद् भावशब्दाभिधेयायाः सत्तायाः समस्तक्रियायोनित्वे मूलभूताया क्रियात्वं प्रत्यस्या न विवादः। तदेवं साधनेभ्यो भिन्ना क्रिया, साधनेभ्यश्चान्यद् भवद् वस्तु किमन्यत् साध्यात् स्यादिति साधनस्वभावा क्रिया धातुवाच्या।

एवं तावद् व्यक्तिवादेन क्रियालक्षणोऽपोद्धारपदार्थो निर्णीतः। इदानीं जातिवादेनाह वाक्यपदीये—

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।
असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यते[1] ॥ इति।

क्रियासमवेता जातिर्धातुवाच्या

सर्वत्र प्रत्ययानुवृत्तिप्रमाणसाधिता जातिरिति पचतीतिप्रत्ययस्य कर्तृकर्मादिभेदेऽप्यनुवृत्तेः क्रियाव्यक्तिसमवेता जातिरवश्याभ्युपगन्तव्या। सैव धातुवाच्या स्फोटवच्चास्याः क्षणैरभिव्यक्तिः।

यस्याः क्रियाव्यक्तेरनन्तरं फलं निर्वर्तते, तत्र समवेता या जातिः, सैव क्रिया, पूर्वास्तु तादर्थ्यात् क्रियाः। स्वाश्रयनिष्पादनद्वारेण चास्या अपि साधनयोगः साध्यत्वं च। इयं च अपरा जातिः। परा सत्ता नाम **'सम्बन्धिभेदात् सत्तैव'** इत्यादिकारिकया प्रतिपादिता **'भाव एव हि धात्वर्थं इति षड् भावविकारा भवन्ति'** इति वार्ष्यायण्युक्त्या समुपोद्बल्यते।

बुद्धिः शब्दार्थ इति मते क्रियाव्यवस्थामाह—

बुद्धिं तज्जातिमन्ये तु बुद्धिसत्तामथापरे।
प्रत्यस्तरूपां भावेषु क्रियेति प्रतिजानते[2] ॥ इति।

अत्र बुद्धिपदेन बुद्धिकल्पिताकारो विवक्षितः। तस्यैव भावेष्वध्यारोपो दृश्यविकल्पयोरभेदाध्यवसायात्। पूर्वोक्तरीत्या मतभेदेनात्र जातिव्यक्ती क्रिये। महासामान्यं वा सत्ता, बुद्ध्याकारसमवायिनी सत्ता क्रियाभावेष्वध्यारोपिता च। तदाश्रयेण साधनाकाङ्क्षा साध्यत्वं च सर्वमुपपद्यते। सत्तायाः क्रियात्वे **'सैव भावविकारेषु षडवस्थाः प्रपद्यते'** इत्युक्तम्। तथा चोक्तं वाक्यपदीये—

आविर्भावतिरोभावौ जन्मनाशौ तथा परैः।
षट्सु भावविकारेषु कल्पितौ व्यावहारिकौ[3] ॥ इति।

---

१. वा० प० ३।८।१०। २. तदेव–३।८।२४।
३. वा० प० ३।८।२५।

द्वयोर्भावविकारयोः षट्स्वन्तर्भावः

सत्कार्यनये पदार्थानामाविर्भावः, अभिव्यक्तिरेवोत्पत्तिः। तिरोभावश्च ध्वंसः। असत्कार्यनये तु जन्म अपूर्वोत्पत्तिः, विनाशश्च लय इत्येतौ दर्शनभेदेन भिन्नौ द्वौ भावविकारौ षट्सु मध्ये परिकल्पितौ =व्यवहारप्रसिद्धयारोपितौ।

इदानीं षड् भावविकारा भवन्तीति निरुक्तसन्दर्भं वाक्यपदीये समुपक्षिप्तं दर्शयामि—

ताभ्यां सर्वप्रवृत्तीनामभेदेनोपसंग्रहः।
जन्मैवाश्रितसारूप्यं स्थितिरित्यभिधीयते[1] ॥ इति।

अस्याः कारिकायाः स्वारसिकोऽर्थस्तु प्रतिमायां प्रकटयिष्यते। हेलाराजेन तु कारिकार्थं क्रोडीकृत्यातिविस्तृता व्याख्या प्रदर्शिता। हेलाराजस्येयं रीतिः सर्वत्रैव कारिकाव्याख्यानेऽवलोक्यते। सर्वः क्रियाकलापो जन्मनाशाभ्यामभिन्नः। उपचयापचयौ हि धर्मान्तरस्याविर्भावतिरोभावरूपौ मन्यव्यौ। तथा हि पूर्वावस्थायाः परावस्थयाश्च मध्ये वर्तमानं वस्तु जायत इति पदेनोच्यते। अर्थात् सैव सत्ता यदा पूर्वावस्थां जहाति, उत्तरावस्थां चाङ्गीकुर्वती आस्ते, तदा द्वयोरवस्थयोर्मध्ये जायते पदेनाभिधीयते। आत्मलाभोन्मुखं वस्तु समासादितरूपं सव्यापारमिव अस्तीतिपदेनाख्यायते। तथा च अस्तित्वमात्मलाभपर्यायमाविर्भावरूपस्य जन्मन एवोत्तरावस्थाविशेषः। यावच्च सदृशसन्तानप्रवाहस्तावदलक्षितविवेको भावोऽस्तीत्येवमभिधीयते। अस्त्यात्मानं बिभर्त्येव न ध्वंसत इत्यर्थः।

विसदृशसन्तानोपजनेऽर्थभेदेन विपरिणमत इति व्यपदिश्यते, तत्त्वादप्रच्युतं वस्तु। यदाह निरुक्तकारः—**'विपरिणमत इति अप्रच्यवमानस्य तत्त्वाद् विकारमाचष्टे**[2]**'** इति। अत्रैवोपचयविवक्षायां वर्धत इति यदाह निरुक्तकृत्—वर्धत इति स्वाङ्गाभ्युच्चयं संयोगिनां पदार्थानामाचष्टे' इति। वर्धते शरीरेण वर्धते विजयेन इति। अपचयविवक्षायां तु पूर्वमपक्षीयत इति तदनन्तरं विनश्यतीति तिरोभावाभिधानमवस्थाद्वयेन यदाह, स एव अपक्षीयत इति स्वाङ्गापचयं संयोगिनामर्थानामाचष्टे, विनश्यतीति पूर्वभावस्यान्तमाचष्टे इति। पूर्वभावोऽस्तित्वमुच्यते। ताभ्यां द्वाभ्यामाविर्भावतिरोभावाभ्यां षड् व्याप्ताः। तत्राव्याप्तिर्भाष्यिकृतोद्भाविता। सर्वथा स्थित इत्यत्र धातुसंज्ञा न प्राप्नोति। बाह्यो हि एतेभ्यस्तिष्ठतिः इत्याशङ्क्य तिष्ठतेरपि क्रियात्वं **'जन्मैवाश्रितसारूप्यं स्थितिरित्यभिधीयते**[3]**'** इति जायत इतिवत् तिष्ठति इत्यपि सिद्धम्।

किं बहुना जन्मनाशावपि नार्थान्तरभूतौ, अपि तु सत्तैव धात्वर्थः सर्वत्रेत्याह—

---

१. वा०प०–३।८।२६। २. निरुक्तम्–१।२, पृ० २३–२४। ३. वा० पा० ३।८।२६।

जायमानान्न जन्मान्यद् विनाशेऽप्यपदार्थता ।
अतो भावविकारेषु सत्तैका व्यवतिष्ठते[1] ॥

सत्ताया एव साध्यत्वं साधनत्वं च

धर्मातिरिक्तो धर्मी नास्ति, एवं सतो निरन्वयध्वंसविरोधाच्च विनाशोऽपि न व्यतिरिक्तः पदार्थः कश्चित् । एवं च षट्सु भावविकारेषु सत्यभूता सत्तैव महासामान्यस्वभावा । तस्याश्च नित्याया अपि आख्यातवाच्यत्वेन साध्यत्वम् । नामपदवाच्यत्वेन तु साधनत्वम् । जातस्य वस्तुनः पूर्वावस्थाविशेषो जन्म कथ्यते । यद्वशादसौ पदार्थो जात इति व्यपदिश्यते । तच्च जन्म निमित्तत्वेन साधनानां सव्यापारत्वे विवक्षिते पूर्वापरीभूतं जायतेशब्दगोचरः क्रिया भवति । अनया रीत्या असौ साध्यरूपोऽर्थ आख्यातशब्दैर्जायत इत्यादिभिरभिधीयते । नामशब्दैस्तु सिद्धरूपार्थाभिधानमनुसरणीयम् । यथा च जन्म पूर्वभागस्वभावम्, तथा विनाशोऽपि उत्तरभागस्वभाव इति केषाञ्चिन्मतम् । तद्यथा—

फलं फलापदेशो वा वस्तु वा तद्विरोधि यत् ।
तदन्य एव पूर्वेषां नाश इत्यभिधीयत[2] ॥ इति ।

फलं कार्यरूपं कारणविरुद्धं विनाशपदेनोच्यते । यथा ग्रामं गच्छतो देवदत्तस्य यो व्यापारस्तस्य यत् फलम्, तस्य ज्ञानस्य विनाशो नान्यत् किञ्चित् । अनया रीत्या धर्माधर्मयोः सुखदुःखसंवेदनम् । अपरं फलापदेशो न तु वस्तुतः फलम् । यथा मुद्गराभिघाताज्जायमाना घटस्य कपालादयः, शीर्णस्य पटस्य तन्तवः फलत्वेनापदिश्यमाना विनाशव्यपदेशमासादयन्ति ।

ननु वस्त्वन्तरं कथं वस्तुनो विनाश इत्याशङ्क्याह—

नैवास्ति नैव नास्तीति वस्तुनो ग्रहणाद् विना ।
कल्पते पररूपेण वस्त्वन्यदनुगम्यते[3] ॥ इति ।

यथा कस्यचिद्रूपस्यानुगमं विना अस्तीति व्यवहारो न कल्पते, तथा नास्तीत्यपि इति दृष्टान्तगर्भाभिधानम् । यथा संसर्गिवस्तुनो रूपस्याविवेकेन न कश्चिदपि वस्तुनो व्यवहार इति, यथा सत्ताभिसन्धानादिना अस्तीति व्यवह्रियते, तथा फलाद्युपजने नास्तीति व्यवहारोऽपि युज्यते । भावप्रतियोगी ह्यभावः, स च शून्यतारूपो न युज्यते अकिञ्चिद्रूपस्य प्रत्येतुमशक्यत्वात् । न हि प्रत्ययश्च जायते प्रत्येतव्यं च नास्तीति युज्यते । तस्माद् वस्त्वन्तरं फलाद्येव विशेषनाश इति युक्तमुच्यते । पररूपेणैव हि वस्तुनो ब्रह्मकल्पस्यान्यान्यरूपतया व्यवहारावतरणम् ।

---

१. तदेव—३।८।२८ । २. वा० प० ३।८।३१ । ३. तदेव—३।८।३२ ।

दर्शनान्तराश्रयेण व्यापकं प्रधानतत्त्वं क्वचिद् देशे काले वा तनुतामापद्यते, साऽवस्था नाश इत्युच्यते। क्वचित् तदेव व्यापकं वस्तु स्वनिमित्तवशात् सङ्घातरूपतां भजते, इति साऽवस्थाविर्भावात्मिका इति जायत इत्युच्यते। तदेवं निरुक्तकारमताश्रयेण भावविकारा व्याख्याताः, एतत् सर्वं परिणामवादेनोक्तम्।

वाक्यपदीये हि क्वचित् परिणामवादः, क्वच्चि विवर्तवाद इति द्वयोरप्युपन्यासात् कतर एको भर्तृहरेरभीष्ट इति निश्चेतुं न पार्यते।

यद्वा निष्क्रिय एको व्यापकः परब्रह्माभिधानो भावोऽचिन्त्यप्रभावशक्तियुक्तो जन्मनाशव्यवहारमविद्यादशायां वर्तयति। न तु भावतो जन्मनाशौ क्वचित् स्तः।

अधुना विवर्तवादानुसारेणोच्यते—

सर्वरूपस्य तत्त्वस्य यत् क्रमेणैव दर्शनम्।
भागैरिव प्रक्लृप्तैश्च तां क्रियामपरे विदुः॥ इति।

सर्वकल्पनातीततत्त्वमपि ब्रह्म समाविष्टसर्वशक्तित्वात् सार्वरूप्येणावभासमानं कालाख्यशक्तिप्रवर्तितक्रमावभासं पूर्वापरीभूतावयवसमाहारात्मिकां क्रियाप्रतिपत्तिमुपजनयति साध्यस्वभावभावविषयाम्। सिद्धस्वभावविषये तु दिक्शक्तिप्रकल्पितभागभेदप्रकल्पनाद्, मूर्तिप्रविभागमारचयति। इदानीं सत्ताद्वैतदर्शनेन षड् भावविकारा भवन्तीति निरुक्तकारमतमेव निगमयितुमाह—

सत्ता स्वशक्तियोगेन सर्वरूपा व्यवस्थिता।
साध्या च साधनं चैव फलं भोक्ता फलस्य च॥ इति।

इयं हि कारिका हेलाराजेन निरुक्तटीकाकारमतानुकूल्येन व्याख्याता। तथा च सैव सत्ता सर्वशब्दानां विषयः। एवं च सैव स्वशक्तिरूपोपाधिनियमितशरीर सर्वात्मकत्वमनुभवन्ती सिद्धसाध्यरूपतया नामाख्यातपदवाच्यतामनुभवति, तद्भिन्नस्य पदार्थान्तरस्याभावाद् विचित्रशक्तित्वाद् भोग्यभोक्तृसाधनरूपतया विश्वयात्रामुद्वहति। सर्वत्र भोक्त्रादिषु सन्मात्रस्य संविद्रूपस्यानुगमात् तस्यैव सत्यता, विकल्पपरिघटितस्तु नानाव्यवहार इति सर्वाद्वैतिषु समानमेतत्।

अनया रीत्या शब्दाद्वैतवादोऽपि स्वाभिमतत्वेन समुपन्यस्तः। एतावत्पर्यन्तं साधारण्येन क्रिया समुद्दिष्टा, विशेषतस्तु शुद्धं व्याकरणाभिमतं तत्स्वरूपं पक्षान्तरोपन्यासपूर्वकं प्रतिमायां प्रकटयिष्यत इति शम्।

सूत्रादिषु कालसामान्यविशेषयोरुपन्यासः

क्रियानिरूपणानन्तरं **'क्रियाभेदाय कालस्तु[१]'** इति सदुक्त्यनुसारं कालो निरूप्यते। तत्र पाणिनिसूत्रे कालविषयकाणि बहूनि सूत्राणि वार्त्तिकानि च तदवान्तर-

१. वा० प० ३।९।२।

भेदसंभिन्नानि सन्ति। यथा **'समां समां विजायते'**, **'संख्यायाः संवत्सरसंख्यस्य च'**, **'दामहायनान्ताच्च**[१]**'**, **'वर्षस्याभविष्यति**[२]**'**, **'वर्षाल्लुक् च**[३]**'** इत्यादिसूत्रेषु, **'दामहायनान्तात् संख्यादेः**[४]**'** इत्यादिषु वार्त्तिकेषु च वर्षात्मककालवाचकशब्दनिर्देशः कृत। **'अयनञ्च**[५]**'** इति सूत्रे अयनशब्दोपादानेन अयनात्मककालोऽपि निर्दिष्टः। **'अल्पाच्तरम्**[६]**'** इति सूत्रे भाष्ये **'शिशिरवसन्तावुदगयनस्थौ**[७]**'**; इत्यनेन अवान्तरभूतमयनमपि निर्दिष्टम्। **'ऋतोरण्**[८]**'**, **'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्**[९]**'** **'ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण**[१०]**'**, **'ऋतोर्वृद्धिमद्विधावयवानाम्**[११]**'** इत्यादिषु सूत्रवार्त्तिकादिषु ऋतुसामान्यानि निर्दिष्टानि सन्ति।

'हेमन्तशिशिरावहोरात्रे च च्छन्दसि[१२]**'**, **'हेमन्ताच्च**[१३]**'** **'वसन्तादिभ्यष्ठक्**[१४]**'**, **'वर्षाभ्यष्ठक्**[१५]**'**, **'ग्रीष्मवसन्तादन्यतरस्याम्**[१६]**'**, **'ग्रीष्मावरसमाद्वुञ्**[१७]**'**, **'अव्ययीभावे शरत्प्रभृतिभ्यष्टच्**[१८]**'** इत्यादिषु सूत्रेषु बहुषु स्थलेषु भाष्ये च ऋतुविशेषाः सङ्गृहीताः।

'कार्त्तिक्या आग्रहायणी मासे[१९]**'**, **'मासाद्वयसि यत्खञौ**[२०]**'**, **'पद्दन्नोमास्**[२१]**'**, इत्यादिषु सूत्रेषु भाष्ये च मासस्योपादानं कृतम्।

'पक्षात्ति[२२]**'** इति सूत्रे पक्षस्योद्देशः कृतः। **'कालाः परिमाणिना**[२३]**'** इति सूत्रे मासस्य त्रिंशद्रात्रात्मकत्वमुपपादितमस्ति। किञ्च **'येन मूर्त्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमाहुः। तस्यैव हि कयाचित् क्रियया युक्तस्याहरिति च भवति रात्रिरिति च। कया क्रियया? आदित्यगत्या। तयैवासकृदावृत्तया मास इति भवति, संवत्सर इति च**[२४]**'**। इत्यनया भाष्योक्त्या कालस्वरूपं परिचेतुं शक्यते।

'सास्मिन्पौर्णमासीति[२५]**'**, **'विभाषा फल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः**[२६]**'** इत्यादिभिः मासविशेषस्यापि सूचना सूत्रे भाष्यादौ च दत्ताऽस्ति।

'फल्गुनीप्रोष्ठपदानां च नक्षत्रे[२७]**'** इत्यादिना सन्धिवेलादिगणे अमावास्यात्रयोदशी-चतुर्दशी-पञ्चमी-पौर्णमासी-प्रतिपदा तिथीनाम्, तथा **'अमावस्यदन्यतरस्याम्**[२८]**'**

---

१. अष्टा० ४।१।२७। २. तदेव—७।१।१६।
३. तदेव—५।१।८८। ४. अष्टा० ४।१।२७–वार्तिकम्।
५. अष्टा० ८।४।२५। ६. तदेव—२।२।३४। ७. तत्रैव—वार्तिकम्।
८. तदेव—४।४।४९। ९. तदेव—४।३।१६। १०. तत्रैव–२।२।३४–वार्तिकम्।
११. तत्रैव–१।१।७२–वा०। १२. तदेव—२।४।२८। १३. तदेव–४।३।२१।
१४. तदेव—४।२।३६। १५. तदेव—४।३।१८। १६. तदेव—४।३।४६।
१७. तदेव—४।३।४९। १८. तदेव—५।४।१०७। १९. तदेव—२।३।२८।
२०. तदेव—५।४।८१। २१. तदेव—६।१।६३। २२. तदेव–५।२।२५।
२३. तदेव—२।२।५। २४. तत्रैव–महाभाष्यम्। २५. तदेव—४।२।२१।
२६. तदेव—४।२।२३। २७. तदेव—१।२।६०। २८. तदेव—३।१।१२२।

इति सूत्रे अमावास्यायाश्च **'साऽस्मिन्पौर्णमासीति'** सूत्रे च अमावास्यायाः पौर्णमास्याश्च निर्देशः कृतः। **'रात्राह्नाहाः पुंसि**[१]**'**, **'रात्र्यहः संवत्सराच्च**[२]**'** इत्यादौ रात्रेर्दिवसस्य चोपन्यासः कृतः।

'सद्यःपरुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः[3]**'** इत्यादौ **'हैयङ्गवीनञ्च संज्ञायाम्**[४]**'** इत्यत्र च गतवर्षाणां गतदिवसस्य च ग्रहणम्। **'श्वसस्तुट् च**[५]**'** इत्यादौ आगामिदिवसस्य चोपादानं कृतम्।

'ऊकालोऽज्झ्रस्वदीर्घप्लुतः[६]**'**, **'तपरस्तत्कालस्य**[७]**'** इत्यादिसूत्रैस्तु मात्रापरिमितोऽपि कालो गृहीतोऽस्ति।

एतावता पाणिनीयव्याकरणे कालविभागविषये बहूनि सूत्राणि पाणिनिना निर्मितानि सन्ति। **'वर्तमाने लट्'**, **'भविष्यति'** इत्यादिभिः सूत्रैः कालोऽत्यन्तं संरम्भेण सामान्यविशेषात्मकः संगृहीतोऽस्ति। स च भूतभविष्यद्वर्तमानभेदेन त्रिविधः। उत्पन्नध्वस्ता यदा क्रिया भवति, तदा क्रियोपाधिः कालो भूत इति व्यपदिश्यते। यदा संनिहितसाधनाः सम्भाव्यमानोदयाः क्रियाः, तदा तदुपाधिः कालो भविष्यत्तां प्रतिपद्यते। ते च भूतादयः कालविभागाः पुनरवान्तरभेदेन एकादशधा भिद्यन्ते। कथमिति चेद्? वाक्यपदीयकार आह—

भूतः पञ्चविधस्तत्र भविष्यंश्च चतुर्विधः।
वर्तमानो द्विधा ख्यात इत्येकादश कल्पनाः[८]॥ इति।

तत्र च हेलाराजेन सामान्यः प्रथमो भूतभेदः, अद्यतनो द्वितीयो भूतभेदः, अनद्यतनस्तृतीयः। अद्यतनानद्यतनसमुदायस्ताभ्यामन्यत्वाच्चतुर्थः[९]।

'आद्यन्तौ टकितौ[१०]**'** इति सूत्रे **'तेनायं विशेषेण शब्दान्तरं समुदायं प्रतिपद्यते'** इति भाष्येण अवयवात्समुदायोऽतिरिच्यते। **'सामान्यमपि यथा विशेषस्तद्वत्'** इति। परोक्षस्तु अनद्यतनभेद एव इति न पृथग् गण्यते।

---

१. अष्टा०—२।४।२९। २. तदेव—५।१।८७।
३. अष्टा० ५।३।२२। ४. तदेव–५।२।२३। ५. तदेव ४।३।१५।
६. तदेव–१।२।२७। ७. तदेव–१।१।७०। ९. वा० प० ३।९।३८।

टि० कारिकार्थलापने मार्गः—वस्तुतस्तु अस्याः कारिकाया अर्थो न हि समीचीनः। यतो हि अद्यतनभूतः कश्चिन्नास्तीति तदर्थं नैव कस्यचिल्लकारस्य विधानम्। एतदर्थं सामान्यभूतः, अनद्यतनभूतः, भविष्यति भूतवदतिदेशः अतिदिष्टो भूतः, क्रियातिपत्तिभूतः परोक्षानद्यतनभूतश्चेत्यनयैव रीत्या तद्भेदः स्वीकार्यः। एवं भविष्यन्नपि चतुर्विधः–सामान्यभविष्यः, अनद्यतनभविष्यः, अतिदिष्टभविष्य इति क्रियातिपत्तिभविष्यश्चेति। वर्तमानः, अतिदिष्टो वर्तमानश्चेति द्विविधो वर्तमानः। अनयैव रीत्या कारिकार्थोऽभिलापनीयः।

१०. अष्टा० १।१।४६।

यस्तु भविष्यन्नप्यतिदेशाद् भूतकार्याणि लभते, स पञ्चमो भूतभेदोऽध्यारोपितभूतभावो गौणः । भविष्यत्सामान्यम् । अद्यतनः, अनद्यतनः, अद्यतनानद्यतनसमुदायश्चेति चत्वारो भविष्यद्भेदाः । यस्तु अनद्यतनवत्प्रतिषेधाद्भविष्यत्सामान्यकार्याणि प्रतिपद्यते, सोऽनद्यतनोऽपि शास्त्रव्यवहारे भविष्यत्सामान्यमेव[1] ।

मुख्यो वर्तमान एकः । अमुख्यस्तु योऽतिदिष्टवर्तमानभावो भूतभविष्यतोः **'वर्तमानसामीप्ये[2]'** इति सूत्रविहितः, स द्वितीयः । तदेते शास्त्रकार्यप्रविभागार्थं कालस्य भेदाः कल्पिताः । न त्वसावियत्संख्यः ।

अत्रेदं विचार्यते:—स्वयमेव टीकाकारः 'तदेते' इत्यादिना कथयति । तथा च कालस्य भेदकल्पना तत्तत्कालावच्छिन्नक्रियावाचकधातुभ्यो लकारविधानप्रयुक्तैवाभ्युपगन्तव्या । तत्र प्रथममनद्यतनभूते 'अनद्यतने लुङ्[3]' इत्यनेन लङ् विधीयते । अद्यतने भूतेऽर्थे लकारविधायकं किञ्चित्सूत्रं नास्ति । तत्र अद्यतनत्वस्य भानं तेन रूपेण भवेदेव नहि; किन्तु तत्र 'लुङ्[4]' इति सूत्रेण भूते सामान्ये लुङ्विधानेन भूतसामान्यत्वेनैव भानं स्यात् । अनद्यतनभूतस्य तु द्विधा भानं, परोक्षत्वेन शुद्धानद्यतनत्वेन च । एवं सति भूतस्य परोक्षानद्यतनत्वेन शुद्धानद्यतनत्वेन सामान्यत्वेन आतिदेशिकत्वेन क्रियातिपत्तित्वेन वर्तमानसमीपत्वेन च भानात् षड्विधमेव भूतं ग्राह्यम् ।

भविष्यंश्च अनद्यतनत्वेन सामान्यत्वेन वर्तमानसमीपत्वेन क्रियातिपत्तित्वेन चतुर्विधमेव मन्तव्यम् । वर्तमानत्वं तु द्विविधमस्माभिरभ्युपगम्यते । अस्यां स्थितौ वाक्यपदीयोक्ता एकादशकालकल्पना चिन्त्या । एवं च द्वादशविधैव लकारविषयिणी कालस्थितिर्युक्तियुक्ता प्रतिभाति ।

स्वातन्त्र्यापरपर्याया कालाख्या शक्तिः

अधुना सूत्रवार्तिकभाष्यवाक्यपदीयादिग्रन्थानां कालविषये सारांशो निर्दिश्यते । तथा हि **'स्वतन्त्रः कर्त्ता'** इत्यादिवचनचयैः शब्दब्रह्मणः स्वातन्त्र्यापरपर्याया कलाद्यनेकावान्तरशक्तिविशिष्टा कालाख्या शक्तिः समुज्जृम्भते । सैव शक्तिर्निमित्तरूपमुपादन-

---

१. युक्त्या कालभेदस्वरूपम्—अत्रेदं रहस्यम्—तत्तत्कालभेदे किं मूलम् ? यदि हि कालभेदः, उपाधिकल्पितम्, न तु शास्त्रविहितं मत्वा व्यवस्थाप्यते, तदा तु अनन्ता भेदा भवेयुः । एतदर्थं शास्त्रकृद् यदि उपाधिं परिकल्प्य तत्र लकारं विदधाति, तदा तत्प्रयुक्तभेदेनैव भूतादिकालभेदः स्वीकार्यः । अनया रीत्या भूतस्तावद् अनद्यतनत्वेन, परोक्षानद्यतत्वेन, सामान्यत्वेन, अतिदिष्टत्वेन, वर्तमानसमीपत्वेन, क्रियातिपत्तित्वेन च भिद्यते । एवं भविष्योऽपि अनद्यतनत्वेन, वर्तमानसमीपत्वेन, सामान्यत्वेन, क्रियातिपत्तित्वेन चेति दिङ्मात्रमेतत् । एवं वर्तमानः सामान्यत्वेन आतिदेशिकत्वेन चेति तद्द्विधा भिद्यते इति । विशिष्टोविचारः प्रतिमायां भविष्यति ।

२. अष्टा० ३।३।१३१ । ३. अष्टा०–३।२।१११ । ४. तदेव—३।२।११० ।

रूपञ्च धत्ते। एवञ्च जन्मादिमय्यः शक्तयस्तद्विज्जृम्भितमेव। सैवात्र अभ्यनुज्ञाशक्ति-पुरस्कारेण विश्वं सृजति। प्रतिबन्धशक्तिं पुरोधाय विश्वं विलापयति। तथा चोक्तं वाक्यपदीये—

एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥
अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः[1]॥

इति वाक्यपदीयात् कालाख्यस्वातन्त्र्यशक्त्या सर्वाः परतन्त्रा जन्मवत्यः शक्तयः समाविष्टाः। कालशक्तिवृत्तिमनुपतन्ति, ततश्च प्रतिभावं वैश्वरूप्यस्य प्रतिबन्धाभ्यनुज्ञाभ्यां शक्त्यवच्छेदेन क्रमवानिवाभासोपगमो लक्ष्यते। ततश्च सैव कालाख्या शक्तिः प्रतिबन्धाभ्यनुज्ञाख्यावान्तरशक्तिव्यपाश्रयेण विश्वं सृजति, संहरति चेति निष्कृष्टोऽर्थः।

अपि च तत्रैव कालसमुद्देशे अभिन्नेन कालेन व्यवहर्त्तुमशक्यतया क्रियोपाधिः भूतभविष्यवर्तमानभेदाद् अभिन्नोऽपि कालो भिद्यते। एकस्यैव कालस्य तिस्रः शक्तयः सन्ति। तत्र भूतशक्तिसम्बन्धेन प्रध्वंसाभावः, भविष्यसम्बन्धेन च प्रागभावः प्रतिपाद्यते। वर्तमानशक्तिसम्बन्धेन सतां भावानामभिव्यक्तिर्जन्म कथ्यते। तत्र प्रथमं प्रतिबन्धाभ्यनुज्ञात्मकं शक्तिद्वयमुपन्यस्तम्। तत्र प्रतिबन्धशक्तिर्भूतभविष्यभेदेन द्विधा भिद्यते।

अभ्यनुज्ञाशक्तिस्तु स्वरूपसत्येव विद्योतते। अतीतानागतावध्वानौ भावावरण-हेतुत्वात्तमःस्वभावौ। आवरणं हि तमोधर्मः **'गुरुवरणकमेव तमः'**[2] इति सांख्यकारिकायामुक्तत्वाद् वर्तमानोऽध्वा प्रकाशतुल्यः सत्त्वसदृशः। **'सत्त्वं लघुप्रकाशकमिष्टम्'**[3] इत्युक्तेः। रजस्तु प्रवृत्तिसामान्यं कालस्वरूपं सर्वत्रान्वयि। प्रतिबन्धाभ्यनुज्ञाभ्यां प्रवर्तकं प्रेरणानुरूपं रजः कालात्मकमेव। अनेन एतत् सूच्यते यद् विश्वात्मा एक एव, परब्रह्माभिधानः सत्यो भावः स एव नानाविधकार्यकारितया अनन्तशक्तित्वेन व्यवह्रियते। तथा च क्रमिकांश्चक्रभ्रमिवत् परावर्तमानान् भावान् प्रकाशयन् कालयति भूतानीत्युच्यते। स विभुः स्वतन्त्रश्च। अत एव स्वातन्त्र्यशक्तिः काल इति **'अध्याहितकलां यस्य'**[4] इत्यादिना सिद्धान्तितम्।

कालसमुद्देशे च—**'शक्त्यात्मदेवतापक्षैर्भिन्नं कालस्य दर्शनम्'**[5] इत्यनेन कालाख्या स्वातन्त्र्यशक्तिर्ब्रह्मण इति भर्तृहरेरभिप्राये सत्यपि व्याख्यातारः कारणशक्तिरेव काल इति व्याचक्षते।

---

१. वा० प० १।२–३। २. सां० का० १३। ३. तदेव–१३।
४. वा० प० ३।९।३। ५. तदेव–३।९।६२।

तथा हि बीजशक्तिरङ्कुरोपलम्भमभ्यनुजानती काण्डप्रसवञ्च तदानीं प्रतिबध्नती कालकार्यकरणात् कालः। एवमङ्कुरादिशक्तावपि यथोत्तरमनन्तकार्यजननाद् व्यवहित-तत्कार्यप्रतिबन्धाच्च कालतत्त्वं बोद्धव्यम्। एतच्च अयुक्तमिति प्रतीयते। यतो हि नियतकारणा भावाः स्वकारणसान्निध्ये भवन्ति, नान्यथा इति कारणसामर्थ्यमेवेदम्। तत्तु नियतकालत्वात् सहकारी कालस्तदन्य एव प्रोक्तः। कारणपरम्परया भावानामुत्प-द्यमानानां क्रमदर्शनाच्च क्रमाख्या कालशक्तिः भावोपाधिरित्येवाभ्युपगन्तव्यम्। ततश्च भावभेदावभासने प्रभुः स एव। स एव च तत्र तदनुयायिक्रमावभासनेऽपि समर्थ इति स्वतन्त्रस्य चिदात्मन एव जीवात्मगतेयं शक्तिः कालाख्या युक्ता।

चिदात्मनः शक्तिः कालः

तादृशशक्तिविशिष्ट आत्मा पुरुषो जीवो वा कथ्यते। स एव यथातत्त्वमर्थवान् प्रत्येतुमसमर्थः स्वाभासकालानुसारेण तत्र क्रममध्यवस्यति। ततश्च कालभेदप्रक्लृप्तेः स एवोपचारेण कालाख्यां प्रतिपद्यते। स एव हि कालशक्तेरविद्याशक्तिसहचारिण्याः फलभूमिः। तददृष्टादिवशेनैव च भावेषु प्रतिबन्धाभ्यनुज्ञे भवतः।

विग्रहवती देवता कालः

अन्ये तु विग्रहवतीं महाप्रभावां देवतां कालत्वेन प्रतिपन्नाः। अत्रापि चिद्रूपस्य ब्रह्मणः शक्तिर्देवतैव सकलजगद्ग्रासघस्मरेत्येतदानुगुण्यमेवेतीदमेवात्र दर्शनम्। अत एवैतत्कालदर्शनमविद्यायां संसारहेतुभूतायां प्रथमम्। भेदावभासमयो हि संसारः, भेदश्च देशकालाभ्याम्, तत्र च कालभेदो जगत्सृष्टेराद्यः। अक्रमा हि पश्यन्तीरूपा संवित् प्राणवृत्तिमुपारूढा कालात्मना परिगृहीतक्रमेव चकास्ति। आविर्भूतायां तु विद्यायां सर्वस्य भेदप्रपञ्चस्यापगमादयमप्यपैति। व्यवहारे सर्वस्यैवासत्यतया युक्तायुक्तविचारो निष्फलः। तदेवमयं जन्मवतां पदार्थानां व्यवहारकाले उपयोगीति सिद्धम्।

सत्त्वमेव तिरोभूतमसत्त्वम्

अस्माकं मते सत्त्वादसत्त्वस्य भेदो नास्ति, सत्त्वमेव तिरोभूतमसत्त्वमिति व्यवह्रियते। न त्वभावो नाम किञ्चित्पदार्थान्तरम्। तदुक्तं पातञ्जलेन **'धर्मी त्र्यध्वा, धर्मास्तु त्र्यध्वानः। तल्लक्षितास्तां तामवस्थां प्राप्नुवन्तोऽन्यत्वेन प्रतिनिर्दिश्यन्ते। अवस्थान्तरतो न द्रव्यान्तरत इति'** इति। कथं तर्हि नित्यानां शब्दानां नित्येन कालेन कृतो ह्रस्वत्वादिभेदः? कल्पित इत्येव ब्रूमः। तद् यथा चिरमिदं क्षिप्रमिदं कृतमिति ज्ञानयोः स्वतः समानकालत्वेऽपि विषयगतप्रचयापचयाभ्यां कालप्रतिभास इव स्वात्मनि

१. पातञ्जलसू० वृ० पृ० २०१८।

लक्ष्यते, तथा ह्रस्वादावपि शब्दतत्त्वस्य नित्यत्वात् समानकालत्वेऽपि समुपचरितः कालभेदः ।

तदुपचरितश्चेत्थम्—यावान् क्षणसन्तानः संकलनाबुद्धया एकत्वेन गृह्यते, तावानेकः कालो दिनपक्षमासादिरूपेण व्यवस्थाप्यते । एवञ्च अपचयकाष्ठागतः क्षणः उपचयकाष्ठागतो मन्वन्तरादिरिति । तत्परिच्छेदिका नालिकाविवरादम्भःस्रुति । अन्यच्च घटिकायन्त्रादिकम्, चन्द्रसूर्यसञ्चारादिकञ्च तत्परिच्छेदकम् ।

योगिनः प्राणसंचारेण कालं कलयन्ति

योगिनस्तु प्राणसञ्चारेण कालं कलयन्ति । एवञ्च स्त्रीत्वपुंसत्वाभ्यामपचयोपचयाभ्यामजस्रप्रवृत्तिभ्यां सर्वभावानां सम्बन्धः, अतश्च अतिक्रान्तेन्द्रियसम्बन्धं भूतम् । भविष्यदिन्द्रियसम्बन्धं भावि । वर्तमानेन्द्रियसम्बन्धं वर्तमानमिति संक्षेपः ।

यत्तु केनचित्, पाणिनिमहर्षिणा स्वप्रणीतायामष्टाध्याय्यां कालतत्त्वविषये न किञ्चिदभिहितम्, इत्याद्युक्तम्, तत्तु अयुक्तम् । **'कालोपसर्जने च तुल्यम्[1]'** इति सूत्रयता भगवता पाणिनिना कालस्य लक्षणं नैव कर्तव्यमन्यत्र तस्य प्रसिद्धत्वादित्युक्तत्वात् । सैव प्रसिद्धिः 'येन मूर्त्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते, तं कालमाहुः[2]' इत्यनेन भगवता पतञ्जलिना प्रदर्शिता । कालविषये विस्तरस्तु प्रतिमायां द्रष्टव्यः ।

त्रयाणां पुरुषाणामाविर्भावक्रमः

क्रियानिरूपणावसरे पुरुषविचारः समयप्राप्तः । तत्रास्मिन् व्याकरणे प्रथममध्यमोत्तमभेदेन त्रयः पुरुषाः सन्ति । एषां प्रादुर्भावोऽपि **'एकोऽहं बहु स्यां प्रजायेय[3]'** इति श्रुतिमूलक एव । तथा हि अहमित्यर्थो यदा स्वात्मनि अनेकत्वं द्रष्टुं स्पन्दते, तदा स एवैको द्विधा भवतीति युष्मदर्थं प्रसूते । एवमहं त्वञ्चेति द्वयोरुद्भवो भवति । तत्र सत्त्वादुत्तमः पुरुषः, रजसो मध्यमस्तमसस्तु प्रथमः पुरुष उद्भवति । अत एव **'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः[4]'** इत्यादिसूत्रत्रयव्याख्यावसरे भगवान् पतञ्जलिः, युष्मदस्मदोरन्येषां च प्रयोगे अस्मदनुसारेणैव क्रियावाचकशब्दप्रयोगो भवति, तथा च स, च त्वं च, अहं च पचामः इति प्रयोगमेव सिद्धान्तसिद्धमसूचयत् । स च त्वं च पचथ इति च प्रयोगं निरदिक्षत् । एतदेव सूचयति यत् प्रथमस्य युस्मदि लयः, युष्मदश्च अस्मदि लयो भवतीति ।

किञ्च **'ब्रह्म वा इदमग्र आसीत्[5]'**, **'तदात्मानमेवावेदहं ब्रह्मास्मीति[6]'** इति बृहदारण्यके । **'त्वं वा अहम्, अहं वे त्वम्'**, **'कस्त्वमहमिति होवाच त्वमेवेदं सर्वं**

---

१. अष्टा० १।२।५७ ।
२. तदेव–२।२।५–महाभाष्यम् ।
३. तै० उ० ३।८ ।
४. अष्टा० १।४।१०५ ।
५. बृ० उ० १।४।२ ।
६. तदेव—१।४।१ ।

तस्मादहमिति सर्वाभिधानम्' इति तापनीये । **'हंसः सोऽहम्'** इत्यादिश्रुतिजातैः सर्वेषां पुरुषाणामभेदेऽपि अस्मद एव प्राधान्यम् । अस्मत्सन्निधावन्येषां लोपात् । अनया रीत्या संक्षेपतः पुरुषव्यवस्था प्रदर्शिता । अहं च, त्वं च, स च, इति दशायां सहविवक्षाया-मेकशेषे वयमित्येव शिष्यते । तद्गता संख्यापि केवलमस्मद्येव विश्राम्यति । स एवास्मत् पदवाच्यो युष्मदर्थमन्यपुरुषार्थञ्च बोधयितुं क्षम इति च भाष्ये स्पष्टम् । किञ्च प्रत्यक्ता उत्तमपुरुषवाच्योऽर्थः । मध्यमपुरुषस्य तु परत्वम् । तथा च स्वपराधिष्ठानचैतन्यं भाविकमध्यारोपितमाभ्यामभिधीयते । चैतन्यभागे प्रथमः पुरुषो न वर्तते । स च, त्वं च, अहं च, पचामः इति उत्तमपुरुषस्त्रयाणामपि पुरुषाणामर्थं बोधयितुं सहते । अन्यान् पुरुषानात्मनि विलाप्य अस्मदर्थे एवावतिष्ठते ।

तथा च प्रथमपुरुषेण प्रकृतिः, अस्मदर्थेन परचैतन्यम्, युष्मदर्थेन त्वपर-चैतन्यं ग्राह्यम् ।

द्वित्वादिसंख्या भेदव्यवहारे कारणम्

इदानीं संख्यां विचारयति । तत्र वैशेषिकाणां मते द्रव्याश्रिता गुणात्मिका संख्या । सर्वोऽपि सत्त्वभूतोऽर्थः संख्यायुक्तः प्रतीयते । यथा घटशब्देन एकस्य बहूनां वा घटानां प्रतीतौ एकस्मिन् घटे अभेदव्यवहारहेतुरेकत्वसंख्या विद्यते, द्वित्वादिका संख्या तु भेदव्यवहारे कारणतां भजते, तथा च तादृशभेदाभेदव्यवहाररूपात् कार्यात् कारणी-भूता संख्याश्रीयते । एवं च सर्वोऽपि सत्त्वभूतोऽर्थः संख्यावानेव प्रतीयते ।

आश्रयादव्यतिरिक्ता संख्या

धर्मो धर्मिणो नातिरिच्यत इत्यव्यतिरिक्तधर्मवादिन आश्रयादव्यतिरिक्तां संख्यां मन्यन्ते । समवायेन तिरोहितभेदत्वाद् व्यतिरेकानवधारणाच्चेदं मतं सिद्ध्यति, तन्मते हि अत्यन्तभेदे तद्विशिष्टप्रत्ययानुदय इति काल्पनिक एव भेदः । अत्र हि **'अस्माकं वैयाकरणानां पदार्थविचारे नास्ति समादरः, अन्यशास्त्रप्रणेतृभिः पदार्थानां निर्णीतत्वात्, तदभ्युपगमेनैवास्माकं व्यवहारोदयात्'**[1] इत्युक्तं प्राचीनैर्वाक्यपदीय-टीकाकारैः; परं ते व्याकरणरहस्यमजानानाः संग्रहरूपं नावागच्छन् । यदि अवा-गमिस्यंस्तर्हि नैवमवक्ष्यन् ।

अतो वाक्यपदीयकार आह—

स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथा ।
भेदहेतुत्वमाश्रित्य संख्येति व्यपदिश्यते[2] ॥ इति ।

---

१. वा० प० ३।३।३—हेलाराजटीकायाम् ।

२. वा० प० ३।११।२ ।

द्रव्ये समवेता संख्या आत्मनोऽपि भेदं साधयति

संख्यालक्षणो धर्मः, तेषां सत्त्वभूतानां संख्येयानामात्मैव अभिन्न एव वास्तु, व्यतिरिक्तो वास्तु किमनेन निष्प्रयोजनेन विचारेणास्माकम्, शब्दार्थस्येह विचारयितुं प्रक्रमात्। यदि द्रव्याश्रिता संख्या कथं गुणादीनां तन्निमित्तो व्यवहार इति चेत्, न, अस्माकं मते द्रव्ये समवेताऽपि संख्या आत्मनोऽपि भेदं साधयति शतम्, शते, शतानीत्यादि। एवं च गौणमुख्यभेदेन संख्याया व्याप्तिः सर्वत्र वर्ण्यते। अनया रीत्या त्रीणि रूपाणि इति व्यवहारोपपत्तये गुणेऽपि तस्याः सत्ता स्वीकार्या। अनया पद्धत्या सामान्येषु सामान्यम्, विशेषे विशेषः, संख्यासु संख्या, लिङ्गेषु लिङ्गमपि व्यवहारदर्शनादवकल्पते। तथा च भाष्यकारो **'भावो भावेन युज्यते, स्त्रीत्वं स्त्रीत्वेन'**[१] इत्याह।

अनया रीत्या एकविंशत्यादयः संख्यावाचकाः शब्दाः सन्ति। तत्र सा संख्या न हि संख्याद्वयारब्धा, किन्त्वन्यैव। एवमेव सितपीतनीलादिव्यतिरेकेण यथारूपमन्यन्नास्ति, तथैकत्वादिसंख्याभेदव्यतिरेकेण संख्या नामावयविनि काचिन्नास्ति, समाख्यामात्रमेषां सर्वेषां सामान्यभूतम्।

वचननिरूपणम्

इदानीं वचनविषये किञ्चिद् विचार्यते। अन्यासु बह्वीषु भाषासु एकवचनबहुवचने इति द्वौ एव भेदौ समुपलभ्येते। तच्च नैव युक्तम्। न हि एकस्माद् द्वित्वं विना बहुत्वस्यास्ति सम्भव इति स्वीकारात्। अनित्यत्वेनावभासमानेषु पदार्थेषु यद्येकस्मादेकस्यैवोत्पत्तिः स्यात्, तदा सृष्टेर्विकास एव नहि भवेत्। अतो यथा शब्दतन्मात्रतः स्पर्शतन्मात्रमुदेति, तत्र वायौ शब्दस्पर्शतन्मात्रे तिष्ठतः। तथा च एकस्माद् बीजाद् अङ्कुरो जायते। तस्माद् अङ्कुरादभिनवं पत्रद्वयं समुत्पद्यते इति कारणं मिलित्वा तत्र त्रयं कथयितुं शक्यते[२]। एकवचनद्विवचनबहुवचनानामुपन्यासो युक्तियुक्तः। किञ्चास्माकं भाषासु तथा परिगणिताः शब्दाः सन्ति, यत्र द्विवचनं विहाय भाषाया व्याकृतिः कर्त्तुमेव न शक्यते। अतोऽस्यां देवभाषायां द्विवचनप्रयोगो युक्त एवेति सिद्धान्तः।

इदानीमुपग्रहस्वरूपं समुपन्यस्यते

यद्यपि **'व्यत्ययो बहुलम्'**[३] इति सूत्रे सिद्धान्तकौमुद्यामुपग्रहः परस्मैपदात्मनेपदे इत्युक्तम्, तथापि वाक्यपदीये उपग्रहस्वरूपं यादृशं प्रकटितम्, तादृशं दर्शयामि।

---

१. महाभा० ४।१।३।

२. अस्यां स्थितौ न हि वयं दर्शनान्तरमुखप्रेक्षिणः। अस्माकं मतं न हि मतान्तरमनुसरति।

३. अष्टा० ३।१।८५।

व्यत्ययो बहुलमिति सूत्रे लादेशव्यङ्ग्यं स्वार्थत्वादि इह तत्प्रतीतिनिमित्ते परस्मैपदात्मनेपदे उपग्रहपदेन लक्षणयोच्येते। **'तौ सत्'**[1] इति सूत्र भाष्ये **'उपग्रह-प्रतिषेधश्च', 'उपग्रहस्य च प्रतिषेधो वक्तव्यः', 'उपग्रहस्येति आत्मनेपदसंज्ञाया'** इत्यर्थः। **'सर्वधातुके युक्'**[2] इति सूत्रे प्रदीपः (उपग्रहोऽनेकप्रकारः, स्वार्थपरार्थत्वा-दिकः)। वाक्यपदीये तु आत्मनेपदपरस्मैपदव्यङ्ग्यः कर्त्रभिप्रायतदितरादिरूपो विशेषो यः क्रियायाः साधनस्य, स उपग्रहः, क्वचित्साधनं कर्म उपग्रहः, पच्यते गम्यते इति। आदिशब्दात्कर्ता भावश्च। तत्र कर्ता लादेशव्यङ्ग्यः एधते यातीति, भावे आस्यते सज्ज्यते इति आत्मनेपदव्यङ्ग्य एव। तथा च येन प्रकारेण यमेव वा क्रियाविशेषण-मर्थमन्तर्भाव्य परस्मैपदात्मनेपदे विधीयेते, स सर्वोऽप्यर्थ उपग्रहपदाभिधेयः। परमत्र तद्वत् प्रत्यायकात्ममेपदपरस्मैपदे लक्षणया उपग्रहपदबोध्ये इति संक्षेपः।

लिङ्गविचारः

तत्र **'स्त्रियाम्'**[3] इति सूत्रे का स्त्री नाम? इति प्रश्ने लोकत एते शब्दाः प्रसिद्धाः। स्त्री, पुमान्, नपुंसकमिति प्रघट्टके। किं लिङ्गमिति प्रश्ने—

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकम्॥

इत्युत्तरिते स्तनकेशादेः कुमार्यामभावाद् अन्यस्यापि स्त्रीप्रतिपत्तिनिमित्तस्य कुमार्यादि-गतस्य योन्यादेरुपलक्षणम्। एवं लक्षणे भ्रूकुंसे टाबापत्तिमुपपाद्य खरकुटीः पश्येत्यत्र नत्वापत्तिम्, खट्वावृक्षयोश्च लिङ्गाभावं प्रदर्श्य क्वचन समाधाय तटे सर्वेषां लिङ्गा-नामसम्भवं निश्चित्य—**'तस्मान्न वैयाकरणैः शक्यं लौकिकं लिङ्गमास्थातुम्। अवश्य-मेव कश्चित् स्वकृतान्त आस्थेयः'**[4] इत्यादिना पूर्वपक्षमुपसंहृत्य **'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः'**[5] इत्यनेन स्वसिद्धान्ते लिङ्गलक्षणमुपन्यस्तम्।

लिङ्गव्याप्तिः

यद्यपि लोकेऽपि संस्त्यानप्रसवौ एव स्त्रीपुंसौ, यतो हि स्त्यायति अस्यां गर्भ इति स्त्री, सूतेऽसौ पुमान् इति तदर्थो गम्यते। तथापि संस्त्यानप्रसवशब्दयोर्भाव-साधनत्वेन तिरोभावप्रादुर्भावार्थकत्वात् स्थितेश्च तन्मध्ये पाताद् गुणानामाविर्भावः पुंस्त्वम्, तिरोभावः स्त्रीत्वम्, स्थिततदन्तरालावस्था नपुंसकत्वम् इति सर्वत्र लिङ्ग-त्रयावस्था न विरुध्यते। अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु इति शब्दभेदेन त्रयाणा-मपि लिङ्गानां सर्वत्र व्याप्तिरायाति; तथापि शिष्टव्यवहाराद् यत्र यो हि गुण आविर्भवति, तिरोभवति च, तेषां शिष्टानां दृष्टौ तत्र तस्यैव लिङ्गस्य व्यवहारः।

---

१. तदेव–३।२।१२७–महाभाष्यम्। २. तदेव–३।१।६७। ३. अष्टा० ४।१।३।
४. तदेव–महाभाष्यम्। ५. अष्टा० ४।१।३–महाभाष्यम्।

ननु निर्गुणे पुरुषे कथं चैतन्यं चितिः पुरुष इत्येवं लिङ्गत्रययोग इति चेत्, न, बिम्बप्रतिबिम्बन्यायेन प्रकृतिगतलिङ्गानां तत्र प्रतिबिम्बात्। एतच्च प्रतिमायां विशिष्टतया प्रस्फुटीभविष्यति।

गुणानामुपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्

वाक्यपदीयेऽपि अयमेवार्थो विस्तरेण प्रतिपादितोऽस्ति। सोऽत्यन्तं संक्षिप्ततया प्रदर्श्यते। तथा हि सांख्याः सत्त्वरजस्तमसां गुणानां सततपरिणामिनाम् उपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, साम्यावस्था नपुंसकत्वमिति भाष्यकाराभिमतं दर्शनमङ्गीकुर्वन्ति। तथा चोक्तम् महाभाष्ये—'**संस्त्यानप्रसवौ लिङ्गम्। सर्वाश्च मूर्त्तय एवमात्मिकाः संस्त्यानप्रसवगुणाः**[1]' इति सर्वा इति वदता भाष्यकारेण वृक्षादावपि लिङ्गयोग उपपादितः, त्रिलिङ्गता च समर्थिता। परं क्वचिदेकं लिङ्गम्, क्वचिल्लिङ्गद्वयम्, क्वचन च लिङ्गत्रयमिति नियमे कारणं वक्ष्यते।

तत्र संस्त्यानं संहननं प्रविलयस्तिरोधानमिति यावत्। इयमवस्था स्त्रीत्वम्। प्रसवः प्रवृत्तिरारम्भ आविर्भाव इति यावत्। इयमवस्था पुंस्त्वम्। न स्त्रीपुंसौ नपुंसकमिति स्थितिर्नपुंसकत्वमर्थाल्लक्षितम्। तथा हि संग्रहकारः पठति—'**संस्त्यानं संहननम्, तमः निवृत्तिः, अशक्तिः उपरतिः प्रवृत्तेः, प्रतिबन्धः तिरोभावः स्त्रीत्वम्। प्रसवो विष्वग्भावः, वृद्धिः शक्तिः, वृत्तिलाभः अभ्युद्रेकः, प्रवृत्तिराविर्भाव इति पुंस्त्वम्। अविवक्षातः साम्यं स्थितिः, औत्सुक्यनिवृत्तिः अपरार्थत्वम् अङ्गाङ्गिभावनिवृत्तिः कैवल्यमिति नपुंसकत्वम्**[2]' इति।

अवस्थाविशिष्टा गुणा लिङ्गम्

अवस्थाविशिष्टा गुणा एव लिङ्गमित्यत्रैव दर्शने पक्षान्तरम्। ते हि कार्यान्तरवत् स्त्र्याद्यवभासमपि प्रत्ययमुपजनयन्तो भवन्ति लिङ्गव्यपदेश्याः। एकस्यापि वस्तुनः शब्दभेदेनार्थो व्यक्तिः वस्त्वित्रि लिङ्गभेदस्य दर्शनाद् बहिरसन्नेव शब्दैरुत्पादित इव बाह्ये वस्तुनि लिङ्गयोग इति शब्दाभिधेयस्वभावं लिङ्गमिति केचित्।

लिङ्गं शब्दसंस्कारमात्रम्

तटस्तटी तटमित्यभिन्नेनापि शब्देन अभिन्नं वस्तु त्रिलिङ्गं प्रत्याय्यते इति शब्दसंस्कारमात्रं लिङ्गमाश्रितं कैश्चित्। एवमपि बाह्यत्वेनावसायान्नोदात्तादिधर्मवच्छब्दधर्मत्वं लिङ्गस्य; किन्तु स्त्रियां पुंसि नपुंसके इति शब्दान्वाख्याननिमित्तभावदर्शनाच्छब्दसंस्कारत्वमस्य। तथा प्रतिपादितम्—'**तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः**[3]' इति भाष्ये वर्णितम्।

---

१. अष्टा० ४।१।३—महाभाष्यम्।

२. वा० प० ३।१३।२—टीकायाम्।

३. महाभाष्यम्—४।१।३।

सप्त विकल्पाः

एवं स्थितौ लिङ्गानां ग्रहणविकल्पाः सप्त सन्ति। तत्र विकल्पेन चत्वारः, संनियोगेन त्रयः। तथाहि विकल्पेन स्त्रीपुंनपुंसकानां शब्दैः प्रत्यायने चत्वारो भेदाः। ते च—

१. केचित् पुन्नपुंसकविषयाः शङ्खः, पद्मः, शङ्खं पद्मम् इत्यादयः पद्मशङ्खौ निधौ पुंसि स्थितौ पुंसि च तोयजे इति।

२. केचित् स्त्रीनपुंसकनियताः, भागधेयम् भागधेयी, भेषजम् भेषजी, अर्चिरित्यादयः।

३. अन्ये स्त्रीपुंससाधारणाः। यथा इषुः अशनिः, वत्सः वत्सा इत्यादयः।

४. अपरे त्रिलिङ्गाः। तटस्तटी तटमित्यादयः।

सन्नियोगो नियमस्तेन त्रयो विकल्पाः—१. वृक्षादयः पुंस्येव नियताः, २. खट्वादयः स्त्रियामेव, ३. द्रव्यादयो नपुंसके एवेति सप्त विकल्पाः।

पूर्वोक्तस्य भङ्ग्यन्तरेण समर्थनम्

तत्र प्रकाशः प्रसवः, आविर्भावः सत्त्वधर्मः। प्रवृत्तिः क्रिया रजोधर्मः। वरणं तिरोभावः, स्थितिस्तमोधर्मः। एत एव धर्मा लिङ्गम्। तथा हि आविर्भावः प्रकाशनियमरूपसत्त्वतमोधर्मानुगतः प्रवृत्तेः क्रियाया रजोधर्मलक्षणाया विशेषः पुंस्त्वम्। एवं तिरोभावः स्त्रीत्वम्। सामान्यरूपा तु प्रवृत्तिः तमोबहुला स्थितिर्नपुंसकम् इति लिङ्गत्रयं सार्वत्रिकम्।

पुंस्त्वादिरूपा लिङ्गजातिर्वैशेषिकाणाम्

वैशेषिकाः सर्वत्राभिन्नाभिधानप्रत्ययोन्नीतसद्भावाज्जातिं मन्यन्त इति स्तनाद्युपव्यञ्जनाभिव्यक्तविशेषस्त्रीत्वपुंस्त्वनपुंसकत्वरूपा लिङ्गजातिरित्याहुः। सा चाचेतनेष्वपि यथास्वमुपव्यञ्जनाभिव्यक्ता विद्यत एवेति। ननु स्तनाद्युपव्यञ्जनाऽपि जातिः कथमचेतनेष्वपि नहि तत्र स्तनादयः सन्ति। **'स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः**[1]' इत्यत्रादिग्रहणाद् यथायथं विशिष्टमेवोपव्यञ्जनम्।

एवं सति स्तनकेशादिसम्बन्ध इत्यादि पूर्वोक्तमपि पक्षद्वयं नाव्यापकम्। अचेतनेष्वपि यथास्वमुपव्यञ्जनविशेषस्य ग्रहणात्। अस्ति हि खट्वादीनामपि किञ्चिन्निमित्तम्, यद्वशात् स्त्र्याद्याकारप्रत्ययप्रसवः। सत्यमेतत्। अर्थव्यक्तिवस्तुशब्दानां तु त्रिलिङ्गानां सर्वभावेषु अव्याहतप्रसवत्वात् त्रिलिङ्गयोगस्तदाकारप्रत्ययान्यथानुपपत्त्यानुमीयते। तत्र च परस्परविरोधिनियतव्यञ्जनसम्बन्धरूपं लिङ्गत्रयं लौकिकं कथं स्यादिति तदवधीरणेन जातिपक्षावलम्बनम्। जातीनां हि सर्वगतत्वादेकाश्रयसमवायित्वं बह्वीनामप्युपपद्यते। एवं गुणावस्थानामपि लिङ्गानां सर्वत्राविरोधः। तथा चोक्तं वाक्यपदीये लिङ्गसमुद्देशे—

स्तनकेशादिसम्बन्धो विशिष्टा वा स्तनादयः।
तदुपव्यञ्जना जातिर्गुणावस्था गुणास्तथा॥ इति।

---

१. वा० प० ३।१३।१।

लिङ्गं शब्दनिष्ठम्

तच्च लिङ्गं शब्दनिष्ठमर्थनिष्ठं वेति विचारे 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वम्' इति भाष्यपङ्क्तेः एकार्थे अर्थैक्येऽपि शब्दान्यत्वात् शब्दभेदाद् बुद्धिः, प्रत्ययः, ज्ञानमित्यादौ लिङ्गान्यत्वस्य दर्शनाद् लिङ्गं शब्दनिष्ठमेवेत्यर्थकरणेन कश्चन लिङ्गं शब्दनिष्ठमेव मन्यते। पुराहमपि **'एकार्थे शब्दान्यत्वादित्यादेः'** एकस्मिन्नप्यर्थे शब्दभेदेन लिङ्गभेदो दृश्यते, यथा व्यक्तिः पदार्थ इत्यादिशब्दभेदेन लिङ्गभेद एकस्मिन्नप्यर्थे वर्तते, तथा च शब्दनिष्ठमेव लिङ्गं सिध्यतीति अर्थमवागमम्।

अर्थनिष्ठं केवलान्वयि

